आधुनिक युग के प्रसिद्ध वैदिक विद्वान् समीक्षा चक्रवर्ती पण्डित मधुसूदन ओझा ने बहुत पहले इस भ्रान्ति की ओर स्पष्ट शब्दों में संकेत किया था- 'यत्तु कैयटेन प्रक्रमः स्थानमुच्यते, स्थानञ्च ताल्वादिकमूर्ध्वाधरभागयुक्तम् इत्येवं व्याख्यातम्। काशिका- कौमुदीकारादिभिरपि कैयटवर्त्मैवानुसृतम्। तदेतत् सर्वं भगवत्पतञ्जल्यादि-महर्षितात्पर्यविरुद्धत्वादुपेक्ष्यम्। न हीमानि ताल्वादिस्थानानि तथोर्ध्वाधरभागयुक्तानि श्रूयन्ते वा स्मर्यन्ते वानुभूयन्ते वा। तिर्यग्भागैः सभागत्वेऽप्यूर्ध्वाधरभागैः सभागत्वस्य अप्रामाणिकत्वात्। अथ खल्वेकैकस्मिन् स्थाने प्रकल्पितेषु अग्रमध्यमपश्चाद्भागेषु उच्चादीनामभिनिष्पत्तिरिष्यते इति चेत्-स्यादेतदेवम्, यदि नाम ताल्वादीनि स्थानानीह विवक्षितानि स्युः। न च तथा विवक्षां पश्यामः। द्विविधानि हि वर्णस्थानानि भवन्ति- सवनस्थानानि च मुखस्थानानि च। तत्रोरःकण्ठ-शिरोरूपैस्त्रिभिः सवनस्थानैरेवैतेषां सम्बन्धः सूत्रवार्तिकभाष्येषु प्रदर्श्यते। तस्मात् ताल्वादिसभागस्थानेषूर्ध्वभागनिष्पन्न उदात्तः। अधोभागनिष्पन्नोऽनुदात्त इत्येवमुक्तिः केषाञ्चिद् अपदार्थत्वादुपेक्ष्येति दिक्'।

महामहोपाध्याय गिरिधरशर्मा चतुर्वेदी ने भी उक्त स्थल पर महाभाष्य-व्याख्याताओं के इस प्रमाद का स्पष्टतया उल्लेख किया है-

एवमेव 'उच्चैरुदात्तः' इति सूत्रेऽपि शब्दोत्पत्तिप्रक्रिया या वैज्ञानिकी महाभाष्यकृतोक्ता, सा व्याख्याकृद्भिरन्यथैव नीता.... वर्णानां हि द्विविधानि स्थानानि पाणिनीयशिक्षादौ दर्शितानि, सवनस्थानानि , आस्यान्तर्गतस्थानानि च। बुद्ध्यार्थान् समर्थ्यात्मना प्रेरितेन मनसाऽभिहतः कायाग्निर्यदा शारीरं मारुतं प्रेरयति, तदा स वायुः उरसि शरसि कण्ठे वा मनोऽभिप्रायोऽनुकूलमेव क्वचित्प्रक्रमं करोति , तान्येतानि त्रीणि सवनस्थानानि शिक्षायामारम्भ एव स्पष्टीकृतानि-....। प्रत्यात्ममनुभवसिद्धं चेदम्- स्वसामर्थ्यानुसारं कदाचित्कश्चिदुच्चैर्वदति, कदाचिन्नीचैः, कदाचिच्च समेन स्वरेण इति। सोऽयं भेदः सवनस्थानकृत एव। तान्येतानि सवनस्थानान्येव प्रक्रमशब्देनोक्त्वा भाष्यकारेण उच्चैस्त्वनीचैस्त्वयोरव्यवस्थायाः समाधानं कृतम्, यद्यथाविधो यस्योपक्रमः, तत्रा यदुच्चैस्तदुदात्तमिति विज्ञातव्यम्, कामं तदन्यापेक्षया नीचैर्भवतु, न तेनास्माकं प्रयोजनमिति। परं कैयटमहाशयः सवनस्थानानामास्यस्थानानां च भेदमविचार्यैव 'उरः कण्ठः शिरः' इति स्थानत्रयमष्टानामपि स्थानानामुपलक्षणं मत्वा तत्रा च प्रत्येकं स्थानेषु काल्पनिकमनुष्वभवविरुद्धं बिन्दुत्रयमुररीचकारेत्येकदेशितात्रापराध्यति। एवं महाभाष्यस्य गूढा आशया व्याख्याकृतां कृपया अन्यथैव नीता इति निदर्शनमात्रमिदम्''।

भाष्य के आधुनिक व्याख्याकारों में आचार्य चारुदेव शास्त्री, पं. युधिष्ठिर मीमांसक आदि ने कैयटादि के व्याख्यान को ही गतानुगतिकतया स्वीकार कर पुष्ट करने का प्रयास किया है। अतः उक्त स्थलगत इनकी व्याख्याएं भी संशोधनीय हैं।

'कः पुनः प्रक्रमः? उरः कण्ठः शिर इति।' यहाँ तीनों के अनन्तर इति शब्द लगाकर भाष्यकार ने स्पष्ट कर दिया है कि ये तीन ही प्रक्रम हैं। अतः यहाँ ये उच्चारणस्थान या उनके उपलक्षण के रूप में कथमपि निर्दिष्ट नहीं माने जा सकते हैं।

यहाँ भाष्यकार द्वारा बोले गए 'उरः कण्ठः शिर इति' ये पस्पशोक्त 'त्रिधा बद्धः- त्रिषु स्थानेषु बद्धः, उरसि कण्ठे शिरसीति' की ओर स्पष्टतः सङ्केत करते दिखाई देते हैं। जब हम पस्पशा के उक्त वाक्य को पढ़ते हैं तो संवादितया- 'कः पुनः प्रक्रमः उरः कण्ठः शिर इति' यह वाक्य याद आ जाता है तथा जब इसे पढ़ते हैं तो पस्पशागत- 'त्रिषु स्थानेषु बद्धः उरसि कण्ठः शिरसीति' यह याद आ जाता है। ये दोनों स्थल निःसन्देह शब्द के त्रैस्वर्यरूप वैशिष्ट्य को सूचित कर रहे हैं।

त्रिधा बद्धः वाला पूर्वप्रस्तुत उद्धरण ऋग्वेद से लिया गया है, अतः उक्त वेदमन्त्र द्वारा शब्द के त्रैस्वर्यरूप धर्म को बताना वैदिक भाषा की दृष्टि से तो अतीव महत्त्वपूर्ण है। क्योंकि यह वैदिक शब्दों की बहुत बड़ी विशेषता है, जो उच्चारण व अर्थनिर्धारण में महत्त्वपूर्ण भूमिका निभाती है। यद्यपि लौकिक संस्कृत में भी स्वर अर्थविशेष का निर्धारण करते हैं, अष्टाध्यायी के षष्ठाध्यायगत द्वितीयपाद में लौकिक

भाषा के शब्दों में अर्थविशेष में स्वरविधान विशेषरूप से उपलब्ध है। परन्तु वेदशब्दों में तो यह अतीव महत्त्वपूर्ण है। वेदशब्दों की इसी विशेषता को उक्त मन्त्र में त्रिधा बद्धः से प्रकट किया है। महाकवि कालिदास भी इसे देवगण द्वारा की गई ब्रह्मा की स्तुति के प्रसङ्ग में निम्न प्रकार से प्रस्तुत करते हैं-

**उद्घतः प्रणवो यासां न्यायैस्त्रिभिरुदीरणम्।**
**कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम्।।**

अर्थ- देवगण ब्रह्माजी की स्तुति करते हुए कहते हैं- हे ब्रह्मन्! जिन वेदवाणियों का आरम्भ प्रणव (ओ3म्) से होता है, जिनका उदीरण (उच्चारण) तीन न्यायों से (उदात्त, अनुदात्त, स्वरित) इन तीन स्वरों से होता है, जिनका कर्म यज्ञ तथा फल स्वर्ग है, उन वेदवाणियों के प्रभव (उद्गमस्थान) आप ही हैं। यहाँ मल्लिनाथ लिखते हैं -''नीयन्ते एभिरर्थविशेषा इति न्याया: स्वरा:। उक्तञ्च स्वरविशेषादर्थविशेष-प्रतिपत्तिः, यथेन्द्रशत्रुः स्वरतोऽपराधादिति''।

इस प्रकार स्पष्ट है कि- उरः कण्ठः शिरः ये वर्णोच्चारण स्थान न होकर उदात्त, अनुदात्त व स्वरित इन तीन स्वरों के साधक तीन प्रक्रम हैं। उच्चैरुदात्तः-नीचैरनुदात्तः सूत्रभाष्य में भी उरः कण्ठः शिरः इन स्वरसाधक प्रक्रमों को न समझकर कैयटादि ने इन्हें उच्चारणस्थान के रूप में मान लिया और काशिका वाली वृत्ति की ओर झुक गए।

मुनित्रय के अभिप्राय के विरुद्ध व्याख्यान करने वाले आधुनिक वैयाकरण सिद्धान्तकौमुदी या लघुसिद्धान्तकौमुदी आदि के व्याख्यान-प्रसङ्ग में कहते हैं कि यदि उच्चैरुदात्तः में ऊर्ध्वभागनिष्पन्नता न लेकर ऊँचा स्वर लिया जाए तो उपांशु उच्चारण में उदात्तादि स्वर नहीं हो सकेंगे। इनके इस आशय वाले कथन यहाँ प्रस्तुत हैं-

'नादधर्मविशेषः उच्चैस्त्वं नेह विवक्षितम्, उपांशूच्चार्यमाणे अव्याप्तेः। किन्तूच्चैश्शब्दोऽधिकरणशक्तिप्रधान ऊर्ध्वभागे इत्यर्थे वर्त्तते'।

'कुछ लोग 'जो ऊँचे स्वर से बोला जाए वह उदात्त होता है-' ऐसा अनर्थ किया करते हैं। उनके अनर्गल-प्रलाप से सावधान रहना चाहिए। क्योंकि तब मानसिक जप में उदात्तत्व आदि न माना जा सकेगा, अतः यह अनिष्ट है'।

इन लोगों के इस तर्क का उत्तर यह है कि उपांशु का अर्थ दूर तक न सुनाई देने वाला स्वर है- 'उप समीपे अश्नुते व्याप्नोतीति उपांशु।' आचार्य हेमचन्द्र भी कहते हैं- 'उपाश्नुते उपांशु'। उपांशु का यही स्वरूप स्मृतियों में भी निर्दिष्ट है-

**त्रिविधो जपयज्ञः स्यात्तस्य तत्त्वं निबोधत।**
**वाचिकश्च उपांशुश्च मानसश्च त्रिधाकृतिः।।**

**शनैरुच्चारयन्मन्त्रं किञ्चिदोष्ठौ प्रचालयेत्।**
**किञ्चिच्छ्रवणयोग्यः स्यात् स उपांशुर्जपः स्मृतः।।**

उपांशु उच्चारण में श्रवणगोचर होने वाले बाह्य स्वर को दबाकर भी पाणिन्युक्त मन्द, मध्य व तीव्र इस त्रिविध प्रयत्न से बोला जा सकता है। जैसे कि कोई किसी भयावह स्थिति में प्रियजन को उससे बचाने के लिए बाह्य ध्वनि को दबाकर भी उसके प्रति जोर लगाकर, आयामादि-पूर्वक बोलता है। इस रीति से उपांशु में भी उदात्त स्वर निर्बाध रूप से संभव है। केवल कर्णगोचर बाह्य ध्वनि का तारतम्य (न्यूनाधिकत्व) ही उदात्तत्व आदि का साधक नहीं है, यह तथ्य 'सिद्धं तु समानप्रक्रममवचनात्' की व्याख्या में स्पष्ट किया जा चुका है। अतः यह कोई समस्या नहीं है।

## सन्दर्भ


१. वाक्यपदीयम्- २.४८०
२. ऋग्वेद- ४.५८.३
३. महाभाष्यम्, पस्पशाह्निकम्
४. कुमारसम्भवम्- २.१२
५. अष्टाध्यायी-१.२.२९-३०
६. वार्तिक-१.२.२९-३०
७. महाभाष्यम्- १.२.२९-३०
८. अमरकोश-३.२.२६
९. पाणिनीयशिक्षा श्लोकात्मिका- ६
१०. शिक्षासूत्राणि- पाणिनीयशिक्षा, आरम्भ से तीसरा पद्य
११. शिक्षासूत्राणि- पाणिनीयशिक्षा, नाभितलप्रकरण, सूत्र- २०-२३
१२. शिक्षासूत्राणि- पाणिनीयशिक्षा, नाभितलप्रकरण, प्रथम सूत्र
१३. शिक्षासूत्राणि- पाणिनीयशिक्षा, नाभितलप्रकरण, सूत्र २१
१४. शिक्षासूत्राणि- पाणिनीयशिक्षा, नाभितलप्रकरण, सूत्र २२
१५. शिक्षासूत्राणि- पाणिनीयशिक्षा, नाभितलप्रकरण, सूत्र २३
१६. पाणिनीयशिक्षा श्लोकात्मिका-६-८
१७. पाणिनीयशिक्षा श्लोकात्मिका-३६-३७
१८. प्रपञ्चहृदयम्, पृ.- २२
१९. महाभाष्यम्- १.२.२९-३०
२०. महाभाष्यम्- १.२.२९-३०

२१. तैत्तिरीयप्रातिशाख्यम्- २२.९-१०
२२. वैदिक-स्वर-बोध, पृ.- १-२
२३. अष्टाध्यायी- १.२.३२
२४. महाभाष्यम्- १.२.३२
२५. अष्टाध्यायी- ८.२.८३
२६. अष्टाध्यायी- ८.२.८४
२७. शिक्षासंग्रहः- याज्ञवल्क्यशिक्षा, श्लोक- ११८, पृ. १७
२८. शिक्षासंग्रहः- सटीक नारदीयशिक्षा, श्लोक- ७, पृ. ३३१
२९. शिक्षासंग्रहः- सटीक नारदीयशिक्षा, श्लोक- ७, पृ. ३३१
३०. नाट्यशास्त्रम्- १४.१०२-१०३
३२. सङ्गीतनारायणः- खण्ड-१, परिच्छेद-१, श्लोक-३१
३३. सङ्गीतसमयसार ॥पार्श्वदेवकृत, प्रथमाधिकरणम्-१०-१३
३४. शिक्षासङ्ग्रहः- याज्ञवल्क्यशिक्षा, श्लोक- ६-७
३५. महाभाष्यप्रदीप- १.२.२९-३०
३६. उद्योत- १.२.२९-३०
३७. काशिका- १.२.२९
३८. काशिका- १.२.२९
३९. काशिका- १.२.३०
४०. पदमञ्जरी- १.२.२९
४१. महाभाष्यप्रदीपः- १.२.२९
४२. वैयाकरणसिद्धान्तकौमुदी, संज्ञाप्रकरणम्
४३. शिक्षासंग्रहः- याज्ञवल्क्यशिक्षा, श्लोक- ६
४४. शिक्षासंग्रहः- माण्डूकीशिक्षा, श्लोक- ९-१०
४५. पस्पशागत 'चत्वारि शृंगा' पर उद्योत।
४६. ऋग्वेदादिभाष्यभूमिका, स्वरव्यवस्थाविषयः, पृ.- ३४०
४७. वर्णसमीक्षा, पृ.- १४४
४८. महाभाष्यम्, नवाह्निकम्, गिरिधरशर्मचतुर्वेद-लिखिता भूमिका, पृ.-३३-३४
४९. कुमारसम्भवम्- २.१२
५०. कुमारसम्भवम्, मल्लिनाथीया टीका- २.१२
५१. सिद्धान्तकौमुदी- 'उच्चैरुदात्तः' पर बालमनोरमा
५२. लघुसिद्धान्तकौमुदी- ६-७, भैमीव्याख्या, प्रथम भाग, चतुर्थ संस्करण

५३. अभिधानचिन्तामणि स्वोपज्ञवृत्ति-१५३८

५४. लघुहारीतस्मृतिः- ४१, ४३

## सन्दर्भ-ग्रन्थ


१. वाक्यपदीयम्, सम्पादक- काशिनाथ वासुदेव अभ्यंकर, विष्णु प्रभाकर लिमिये, पुण्यपत्तन-विद्यापीठ, पुणे, १९६५ ई.

२. ऋग्वेदसंहिता, वैदिक यन्त्रालय, केसरगंज, अजमेर (राजस्थान)

३. महाभाष्यम्, प्रदीपोद्योतसहितम्, (गुरुप्रसादशास्त्रिसम्पादितम्) राष्ट्रियसंस्कृत-संस्थानम्, जनकपुरी, नई दिल्ली- ५८. पुनर्मुद्रण- १९९९ ई.

४. कुमारसम्भवम्, राष्ट्रियसंस्कृतसंस्थानम्, जनकपुरी, नई दिल्ली-५८ पुनर्मुद्रण- २००५ ई.

५. अष्टाध्यायी, वैदिक यन्त्रालय, केसरगंज, अजमेर (राजस्थान), २०६५ वि.

६. अमरकोशः, राष्ट्रियसंस्कृतसंस्थानम्, जनकपुरी, नई दिल्ली- ५८ पुनर्मुद्रण- २००३ ई.

७. पाणिनीयशिक्षा (श्लोकात्मिका, शिक्षासंग्रह के अन्तर्गत) सम्पादक-रामप्रसाद त्रिपाठी, सम्पूर्णानन्द संस्कृत-विश्वविद्यालय, वाराणसी-१९८९ ई.

८. शिक्षासूत्रणि, सम्पादक- युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट, रेवली, सोनीपत (हरियाणा)

९. प्रपञ्चहृदयम्, सम्पादक- ति. गणपति शास्त्री, शिवालिक प्रकाशन २७/१६ शक्तिनगर दिल्ली- ११०००७, पुनर्मुद्रण- २००२ ई.

१०. तैत्तिरीयप्रातिशाख्यम्- सम्पादक- जमुनाप्रसाद पाठक, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, प्रथम संस्करण, २००७ ई.

११. वैदिक-स्वरबोध, लेखक- डा. ब्रजबिहारी चौबे, कात्यायन वैदिक साहित्य प्रकाशन, चतुर्वेद निकेतन, जोधामल मार्ग, गौतमनगर, होशियारपुर (पंजाब) संशोधित एवं परिवर्धित संस्करण, अक्तूबर, २००४ ई.

१२. शिक्षासङ्ग्रहः, याज्ञवल्क्यशिक्षा, नारदीयशिक्षा, माण्डूकी शिक्षा, सम्पादक-रामप्रसाद त्रिपाठी, सम्पूर्णानन्द संस्कृतविश्वविद्यालय वाराणसी-१९८९ ई.

१३. नाट्यशास्त्रम् (द्वितीय भाग), सम्पादक-रविशंकर नागर,परिमल प्रकाशन, २७/२८ शक्तिनगर, दिल्ली ७, १९९५ ई.

१४. सङ्गीतनारायणः, सम्पादक- मन्दाक्रान्ता बोस, इन्दिरा गाँधी राष्ट्रीय कलाकेन्द्र, दिल्ली, २००९ ई.

१५. सङ्गीतसमयसार (पार्श्वदेवकृत), सम्पादिका- डा. एम. विजयलक्ष्मी, शिवालिक प्रकाशन, २७-१६ शक्तिनगर, दिल्ली- ३२. प्रथम संस्करण-२००३ ई.

१६. काशिका-रामलाल कपूर ट्रस्ट, बहालगढ़, (सोनीपत) हरियाणा, प्रथम संस्करण-२०५४ वि.

१७. पदमञ्जरी (प्रथमभागः १-४ अध्यायाः) संस्कृतपरिषद, उस्मानियाविश्व-विद्यालय, हैदराबाद, प्रथमसंस्करणम्-१९८५ ई.

१८. वैयाकरणसिद्धान्तकौमुदी, सम्पादक- पाशीकर वासुदेव शर्मा, मेहरदास लछमनदास, अंसारी रोड़, दरियागंज, नई दिल्ली, २, पुनर्मुद्रण- १९८५ ई.

१९. ऋग्वेदादिभाष्यभूमिका (महर्षिदयानन्दकृता), वैदिक पुस्तकालय, दयानन्द आश्रम, केसरगंज, अजमेर, त्रयोदश वार, २००८ ई.

२०. वर्णसमीक्षा, लेखक- मधुसूदन ओझा, राजस्थान संस्कृत अकादमी, श्रीवीरेश्वर भवन, गणगौरी बाजार, जयपुर (राजस्थान), २०५१ वि.

२१. महाभाष्यम्, नवाह्निकम्, रुद्रदत्तझाप्रणीत-तत्त्वालोकटीकोपेतम्, गिरिधरशर्मचतुर्वेद-लिखिता भूमिका, प्रकाशक-चौखम्बा संस्कृत संस्थान, वाराणसी, चतुर्थ संस्करण १९९६ ई.

२२. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमासहिता) प्रथम भाग, सम्पादक-गोपालदत्त पाण्डेय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, षष्ठ संस्करण, १९९८ ई.

२३. लघुसिद्धान्तकौमुदी,भैमीव्याख्या, प्रथमभाग, चतुर्थ संस्करण-२००० ई., भीमसेन शास्त्री, भैमी प्रकाशन, ५३७, लाजपतराय मार्केट, दिल्ली-११०००६.

२४. अभिधानचिन्तामणि (स्वोपज्ञवृत्तियुत), सम्पादक- हेमचन्द्रविजयगणि, श्रीजैनसाहित्यवर्धकसभा अहमदाबाद, गुजरात, २०३२ वि.

२५. लघुहारीतस्मृतिः (अष्टादशस्मृति, भाषाटीका सहित, के अन्तर्गत), सम्पादक व अनुवादक- पं. मिहिरचन्द, राष्ट्रिय संस्कृत संस्थानम्, जनकपुरी, नई दिल्ली- ५८. पुनर्मुद्रण- २००५ ई.

# महाभाष्यस्य लौकिकोपयोगिता

**–बनमाली बिश्वालः**
राष्ट्रिय-संस्कृत-संस्थानम्
श्रीरघुनाथकीर्तिपरिसरः
देवप्रयागः, पौडी गढवाल, उत्तराखण्ड
आवासीय-सङ्केतः
५७, वसन्त विहार, झूसी, इलाहाबाद - २११०१९

व्याकरणेषु त्रिमुनिव्याकरणस्य महत्त्वं बहुधा प्रतिपादितमस्ति। तत्रापि वैयाकरणैः यथोत्तरं मुनीनां प्रामाण्यम् इति वदद्भिः पाणिन्यपेक्षया कात्यायनस्य, कात्यायनापेक्षया पतञ्जलेश्च कथनमधिकं प्रामाणिकं वर्तते इति प्रतिपादितम्। किन्तु 'यथोत्तरं मुनीनां प्रामाण्यमिति प्रायोवादः' इत्यपि केषाञ्चन मतमुपलभ्यते। वस्तुतः सर्वेषामपि एतेषामाचार्याणां स्व-स्व-स्थाने प्रामाणिकत्वम्। अन्यथा शब्दानां नित्यत्वमेव हीयते। तेन हि सर्वेषामेव मुनीनां प्रामाण्यं न तु यथोत्तरमेव।

वस्तुतः यथा पतञ्जलिना पाणिनिः समाद्रियते तथैव कात्यायनः अपि। तेन न केवलं कात्यायनस्य वार्तिकानि व्याख्यातानि किन्तु तेषां सम्भावितं प्रत्याख्यानम् उपस्थाप्य तत् समादधाति अपि। किन्तु दार्शनिकपक्षे सः कात्यायनस्य उपरि व्याडेः प्रभावमनुमन्यते। पक्षान्तरे पतञ्जलिः किन्तु कात्यायनापेक्षया अधिकमेव वैदिक-मार्गानुसारी प्रतीयते। कात्यायनात् शताब्देः अनन्तरं पतञ्जलिना अपि पाणिनीय-व्याकरणस्य परिष्करणे महद् योगदानं कृतम्। वार्तिक-भाष्ययोः विषये अधोलिखिता कारिका अस्माकं मार्गदर्शनं करोति -

**यद् विस्मृतमदृष्टं वा सूत्रकारेण तत् स्फुटम्।**
**वाक्यकारो व्रवीत्येव तेनादृष्टं च भाष्यकृत्॥**

पतञ्जलिना पाणिनेः सूत्राणि अधिकृत्य वार्तिकानां समावेशनपूर्वकं महाभाष्य-मित्याख्यः प्रसिद्धः भाष्यग्रन्थः लिखितः। स्व-सरलतम-शैली-निमित्तं प्रसिद्धं पतञ्जलिना विरचितं महाभाष्यं जनेषु अद्यापि आदृतम् अस्ति।

महाभाष्यस्य परिगणनं भाष्य-विधायां भवति। भाष्यस्य लक्षणम् अस्माकं परम्परायाम् एवं वर्तते -

**सूत्रार्थो वर्ण्यते यत्र पदैर्वर्णानुसारिभिः।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥**

तदनुसारं सूत्रानुसारिभिः वाक्यैः यत्र सूत्रार्थः वर्ण्यते यत्र च स्व-पदानि अपि वर्ण्यन्ते तद् भाष्यमिति विद्वांसः वदन्ति। पतञ्जलेः महाभाष्ये अपि उपर्युक्तं भाष्य-लक्षणं सर्वथा संघटते। अस्य महाभाष्यस्य प्रसिद्धिः एतस्माद् वक्तव्याद् अनुमातुं शक्यते यत् केनचिद् विदुषा एतदपि उद्घोषितं यत् महाभाष्यं वा पठनीयं महाराज्यं वा पालनीयम् इति। स्वामी विजयानन्दसरस्वती अष्टाध्यायिना सह पातञ्जल-महाभाष्यस्य प्रशंसायाम् उक्तवान्-

**अष्टाध्यायी-महाभाष्ये द्वे व्याकरण-पुस्तके।**
**ततोऽन्यत् पुस्तकं यत्तु तत् सर्वं धूर्तचेष्टितम्।।**

महाभाष्यं नाम मूलतन्त्रं वार्तिकं च आधृत्य प्रणीतः महान् ग्रन्थः। एतस्य प्रवक्ता भगवान् पतञ्जलिः वर्तते। कैयट-प्रणीतः प्रदीपः तथा नागेश-विरचितम् उद्योतं च महाभाष्यस्य द्वे प्रसिद्धे व्याख्ये स्तः। वस्तुतः मूलतन्त्रम् आदाय अनेके भाष्यग्रन्थाः प्रणीता आसन् येषां मूलस्वरूपं तु सम्प्रति नैव उपलभ्यते किन्तु तेषाम् अस्तित्वं महाभाष्यम् इति नामकरणादनुमातुं शक्यते। उक्तमेव केनचिद् विदुषा -

**वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।**
**पाणिनिं सूत्रकारञ्च...............।। इति**

एतत्कारिकानुसारं सूत्रकारः पाणिनिः, वाक्यकारः वररुचिः तथा पदकारश्च पतञ्जलि रिति व्याकरण-परम्परायां त्रिमुनि-व्याकरणं प्रसिद्ध्यति। एवमपि प्रसिद्धिरस्ति यत् पतञ्जलिः न केवलं व्याकरणशास्त्रे किन्तु योगशास्त्रे, वैद्यकशास्त्रे च ग्रन्थान् निर्माय पाठकान् आत्मानं च उपचकार। एतत्प्रसङ्गे परम्परया प्राप्ता अधोलिखिता कारिका अस्माकं मार्गदर्शनं करोति -

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।**
**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।।**

किन्तु अत्र मतवैविध्यं वर्तते यद् एतेषां ग्रन्थानां प्रणेतारः नैके पतञ्जलयः आसन् अथवा एकः पतञ्जलिः। योगस्य वैद्यकस्य च रचयितारौ अन्यौ पतञ्जली आस्ताम् इति विद्वांसः वदन्ति। यद् वा तद् वा भवतु अस्माभिः अत्र केवलं वैयाकरणस्य पतञ्जलेः, तस्य महभाष्यस्य वा लोकन्यायमाश्रित्य चर्चा विधास्यते।

भगवान् शेषावतार एव पतञ्जलिः आसीद् इति सर्वजन-स्वीकृतं तथ्यं वर्तते। तस्य मातुः नाम गोणिका इति प्रमाणमुपलभ्यते। वस्तुतः पतञ्जलेः अनेकानि नामानि प्रसिद्धानि सन्ति। नैकेषु ग्रन्थेषु सः अनेकैः नामभिः स्मर्यते। तद्यथा गोनर्दीयः,

गोणिकापुत्रः, नागनाथः, अहिपतिः, फणी, फणिभृत्, शेषः, शेषराजः, शेषाहिः, चूर्णिकारः तथा पदकारः चेति। गोनर्द-देश-सम्बद्धत्वेन सः गोनर्दीय इति कथ्यते। वस्तुतः गोनर्दः नाम कश्चिद् ग्रामः सम्प्रदायः वा भवितुमर्हति। यादवप्रकाश-प्रणीते वैजयन्तीकोशे पतञ्जलिः एव, गोनर्दीयः इति नाम्ना सम्मतः। कैयटः भर्तृहरिश्च तं, गोनर्दीय, इति नाम् ना अभिधत्तः। गोणिकायाः पुत्रः इत्यतः सः गोणिका-पुत्रः इत्यपि अभिधीयते। तद्यथा पण्डिता गोणिकापुत्रो काव्यकार इत्याहुरिति नागेशः। अहिपतिः, फणी, फणिभृत्, शेषः, शेषराजः, शेषाहिः चेति नामानि तस्य शेषावतारत्वं सूचयन्ति। कैयट अपि तं नागनाथः इति नाम्ना अभिदधाति। एवमेव चक्रपाणिः तं चरक-व्याख्यायाः प्रारम्भे 'अहिपतिः' इति नाम्ना स्तौति। तद् यथा -

**मनोवाक्कायदोषाणां हन्त्रेऽहिपतये नमः।। इति**

नागेशः अपि तं पतञ्जलिं फणिन् इति नाम्ना स्मरति। यथा -

**फणि-भाषित-भाष्येऽस्मिन् कृतभूरि-परिश्रमः।**
**नत्वा फणीशं नागेशस्तनुतेऽर्थप्रकाशकम्।। इति**

भोज अपि तं फणिभृत् इति नाम्ना स्मरति। तद्यथा -

**वाक्चेतो वपुषां मलः फणिभृता भर्त्रैव येनोद्धृतः। इति**

हैमवृहद्-वृत्यवचूर्णिकारः अमरचन्दः तं श्रीशेषराजः, इति नाम्ना अभिदधाति। चूर्णि इति भाष्यस्य नामान्तरं प्रसिद्ध्यति। क्षीरस्वामी 'चूर्णिः' इति भाष्यस्य परिभाषां प्रस्तौति। तस्य कर्ता इति सः चूर्णिकारः कथ्यते। भर्तृहरि 'अपि पतञ्जलिं' चूर्णिकारः, इति पदेन उल्लिखति। पदानां कर्ता इति सः पदकारः भवति। स्कन्दस्वामि-प्रभृतयः तं पदकारः इति नाम्ना अभिदधति। एवमेव उव्वट अपि तं 'पदकारः' इति कथयति।

बहुभिः विद्वद्भिः नैकैः नामभिः बहुधा स्मृतः परम-प्रामाणिकः आचार्यः भगवान् पतञ्जलिः कुत्रत्यः इति सम्प्रत्यपि नैव निश्चितम्। केचित् गोनर्दीयसंज्ञकं तं पौर्वात्यं मन्यन्ते। मत्स्यपुराणे हि गोनर्द-जनपदः प्राच्यदेशेषु परिगणितः भवति। अपरे तु काश्मीरेषु गोनर्दनाम्ना त्रयाणां राज्ञां सत्त्वात् काश्मीरेषु हि गोनर्द-जनपदः अस्ति इत्यपि मन्यन्ते। स्वयं पतञ्जलिः महाभाष्ये पाटलिपुत्र-मथुरा-साकेत-कौशाम्बी-प्रभृति जनपदान् संस्मरति। पाटलिपुत्रे हि तेन चिरमुषितं विद्याध्ययनाय इति, 'इह वसामः' इह पुष्यमित्रं याजयामः चेति महाभाष्यवचनात् प्रमाणितं भवति।[२] तथैव राजशेखरः अपि पाटलिपुत्रे शास्त्रकारत्वेन पतञ्जलेः परीक्षणविषये उल्लिखति। तथा चोक्तं काव्यमीमांसायाम्- ''पाटलिपुत्रे शास्त्रकारपरीक्षा अत्रोपवर्ष-बर्षाविह पाणिनि-पिङ्गलाविह व्याडिः। वररुचि-पतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः'' इति।

अपरं च पतञ्जलिः अपि महाभाष्ये तथा अन्यत्र च बहूनां देशानां स्मरणं

कृतवान् – ''राम-कृष्ण-विहारभूमित्वेन स्मर्तव्ये एव सर्वैः। कौशाम्बीं च सः वाक्यकार-जन्मभूमित्वेन स्मरति। एवमेव सः असकृत् काश्मीराणां स्मरणं कृतवान्। तद्यथा देवदत्त काश्मीरान् गमिष्यामः तत्र सक्तून् पास्यामः.,'' इति सः समुल्लिखति। अन्यत्र च सः स्मरति यत् काश्मीरेषु गोनर्द-मण्डले जन्म अवाप्य विद्याध्ययनार्थं पाटलिपुत्रं गतः तथा पुष्यमित्रेण च सत्कृतः तत्रैव न्युवास इति। वस्तुतः तस्य हि काश्मीर-गमनोत्कण्ठा तं सततं बाधते स्म इति महाभाष्ये तेन उपस्थापितेभ्यः उदाहरणेभ्यः प्रमाणितं भवति। सक्तून् पास्यामः, इति वचनेन तस्य काश्मीर-परम्परया सह घनिष्ठः सम्बन्धः सूच्यते।

पार्वत्य-प्रदेशे हि भृष्टम् अकायं पेषणके पिष्ट्वा सक्तून् निर्माय जलेन, पयसा, दध्यादिभिः सह वा केवलमपि वा भुज्यते। किन्तु तत्र सक्तवः भुज्यन्ते इति प्रमाणमुपलभ्यते न तु पीयन्ते इति। सक्तूनां पानं तु मध्यदेशीय-प्रभाव एव। सः स्वयमपि तज्जानाति एव। यतोहि सः तैलभुक्तं, घृतभुक्तम् इति समुल्लिखति। किन्तु पाटलिपुत्र-प्रभावात् सः सक्तून् पास्यामः इति कथयति न तु सक्तून् भक्ष्यामः इति। तेन अस्य पतञ्जलेः काश्मीरेषु जन्म, पाटलिपुत्रे च कर्म इति तु स्पष्टमेव। स्थाने स्थाने सः गोनर्दीय-शब्द-प्रयोगेण स्वकीयं जन्मस्थानं स्मरति। केचित्तु गोनर्दीय-शब्देन साम्प्रतिकम् उत्तरप्रदेशस्य गोण्डामण्डलम् आकलयन्ति। किन्तु तन्न समीचीनम्। गोण्डा इति तु घ्गोनर्दी शब्दस्य अपभ्रंशः प्रतीयते। गोभिः सुखेन यत्र पेया नदी विद्यते सा घ्गोनदीघ। अथवा घास-बहुलत्वाद् यत्र गावो नन्दन्ति सः गोनन्दः, तस्य अपभ्रंशः च गोण्डा इति।

अपरं च काश्मीरेषु एव महाभाष्यस्य सकृदुद्धारः अभवदिति उल्लेखः प्राप्यते राजतरङ्गिणी-प्रभृतिषु प्रसिद्ध-गन्थेषु। एतदपि सम्भवति यत् महाभाष्यं भगवता पतञ्जलिना अन्यत्र लिखितं स्यात् किन्तु तस्य शिष्यैः महाभाष्यं काश्मीरेषु नीतं स्यात्। तस्य शिष्येषु काश्मीराः दाक्षिणात्याः च आसन्। ते च समये समये स्व-सङ्गृहीतं पाठं स्वान् स्वान् प्रदेशान् नयन्तः स्युः। इदमपि सम्भवति यद् विद्वदनुरागशीले पुष्यमित्रे उपरते तस्य पुत्रः अग्निमित्रः मगध-साम्राज्यम् अवाप। स हि विद्याविरतः आसीदिति मालविकाग्निमित्रे चित्रितेन तच्चरित्रेण अग्निमित्रेण अननुमोदितः – भगवान् वार्धक्ये पुनः काश्मीरानेव प्रतिनिवृत्तः स्यात् इत्यपि सम्भवेत्। यद् वा तद् वा भवेत् किन्तु काश्मीरराज्ञा अभिमन्युना.,जयापीडेन च भाष्यस्य उद्धारः कृत इति राजतरङ्गिणी प्रमाणयति यथोक्तं तत्र –

**चन्द्राचार्यादिभिर्लब्ध्वा देशं तस्मात्तदागमम्।**
**प्रवर्तितं महाभाष्यं स्वञ्च व्याकरणं कृतम्।।**[४]

एवमेव

**तदा भगवतः शाक्यसिंहस्य परनिर्वृतेः।**

**अस्मिन् महीलोकधातौ सार्धं वर्षशतं ह्यगात्।।**[५]

तथ्यमिदं भर्तृहरिः अपि स्मरति वाक्यपदीये। तद्यथा -

**प्रायेण संक्षेपरुचीमल्पविद्याहिरगहान्।**
**कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।।**

**सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ।**
**अलब्धगाधे गाम्भीर्यादुत्तान इव सौष्ठवान्।।**

**तस्मिन्नकृतबुद्धीनां नैवावस्थितनिश्चयः।**
**बैजिशौष्वहर्यक्षैः शुष्कतर्कानुसारिभिः।।**

**आर्षं विप्लाविते ग्रन्थे सङ्ग्रहप्रतिकञ्चुके।** (नाम व्याडिप्रणीतो ग्रन्थः)
**यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः।।**

**काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः।**
**पर्वतादागमं दृष्ट्वा भाष्यबीजानुसारिभिः।।**

**स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः।**

अत्र उष्यस्मिन्नेव कथने काश्मीरादेव लुप्तप्रायस्य भाष्यस्य उपलब्धिः पुनश्च कालेन प्रणष्टे महाभाष्ये काश्मीरेण राज्ञा जयापीडेन क्षीरादि-विद्वत्साहाय्येन विच्छिन्नं महाभाष्यं पुनः प्रवर्तितमिति राजतरङ्गिणीतः ज्ञायते। तथा चोक्तं राजतरङ्गिण्याम् -

**उत्पत्तिभूमौ देशेऽस्मिन् दूरदूरतिरोहिता।**
**काश्यपेन वितस्तेव तेन विद्यावतारिता।।**

**वचो मूर्खोऽयमित्येव कस्मैचिद्वदते स्फुटम्।**
**सर्वज्ञानान् ददच्चक्रे सर्वान् विद्याभियोगिनः।।**

**देशान्तरादागमय्य व्याचक्षाणान् क्षमापतिः।**
**प्रावर्तयत विच्छिन्नं महाभाष्यं महीतले।।**

**क्षीराभिधाच्छब्दविद्योपाध्यायात्सम्भृतश्रुतः।**
**बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः।।**

केचित् पुनः तस्माद्देशात्तदागमम् इत्यत्र 'तस्माद्' इत्येतस्य कस्माच्चिद् दाक्षिणात्य-प्रदेशाद् इति निरर्गलम् अर्थं कुर्वन्ति। तत्तु तेषां प्रान्तप्रीतिरेव भवेत्। वस्तुतस्तु प्रकरणानुसारेण तस्माद् इति पदेन घ्काश्मीर-संज्ञकाद् इत्यर्थः ग्रहीतव्यः। यथा च प्रकरणम्

**स्वनामाङ्क-शशाङ्काङ्कशेखरं विरचय्य सः।**
**परार्ध्यविभवं श्रीमानभिमन्युपुरव्यधात्।।**[६]

अनेन एतज् ज्ञायते यद् भगवान् पतञ्जलिः जन्मना, कर्मणा अथवा अन्यैः अपि अज्ञातैः कारणैः च काश्मीरैः सह घनिष्ठरूपेण सम्बद्धः आसीत्। अतः एवमुपसंहर्तुं शक्यते यत् तस्य जन्मभूमिः काश्मीर-मण्डलम् आसीत् तथा तस्य कर्मभूमिः च पाटलिपुत्रम् आसीत् इति।

यथा पतञ्जलेः देशविषये विद्वत्सु विवादः वर्तते तथा तस्य काल-विषयेऽपि पण्डिताः विवदन्ते। वस्तुतः विवादो हि विद्वद्भ्यः वैदुष्य-प्रदर्शनाय उचितम् अवसरं ददाति। वादे वादे तत्त्वबोधः अपि जायते। केचित्तु तं पाणिनि-समकालिकं मन्यन्ते, केचित् पुनः पुष्यमित्र-समकालिकम्, केचिद् अपरे च तं विक्रम-समकालिकमपि स्वीकुर्वन्ति। उपर्युक्तेषु एषु च त्रिषु मतेषु पतञ्जलेः पाणिनि-समकालिकत्वमिति मतस्य समर्थनं केवलं वादार्थमेव वादः इति प्रतीयते। तत्र समर्थं प्रमाणं नोपलभ्यते।

राजतरङ्गिणीकारस्य मतानुसारेण अभिमन्युः हि बुद्ध-निर्वाणानन्तरं सार्द्धैकशत-वर्षाण्यभित आसीत्। तदा महाभाष्यं हि प्रणष्टम् आसीदिति तस्य कथनेन महाभाष्यस्य तस्मादपि पूर्ववर्तित्वं सिद्ध्यति। कनिष्कस्य अवस्थितिम् अपि तत्कालमभितः एव मन्यते राजतरङ्गिणीकारः। यद्यपि वास्तविकं तथ्यमिदानीमपि गुहासु निहितं प्रतीयते. ,एतत्प्रसङ्गे च महद् अन्वेषणम् अपेक्ष्यते तथापि सामान्यतः अभिमन्युः हि पुष्यमित्राद् अनन्तरवर्ती वर्तते एव। राजतरङ्गिणीकारः तु अभिमन्योः अनन्तरवर्तीन १३०२-मितवर्षा अभितः विक्रमस्य अवस्थितिं मन्यते। महाभाष्यस्य अभिमन्योः पूर्ववर्तित्वम् अपि तत्रैव वर्णितम् इति दृष्ट्या तु पतञ्जलेः अवस्थितिः विक्रमपूर्व-पञ्चदश-शतकमभितः सम्भवति। तेन हि विक्रम-पूर्व-पञ्चदश-शतकम् आरभ्य दशम-शतकात् पूर्वपर्यन्तं सामान्यतः पतञ्जलेः अवस्थितिम् अनुमातुं शक्यते। अतः सामान्यतः विक्रमपूर्व-दशमशतकमेव पतञ्जलेः स्थितिकालः इति मतं समीचीनं प्रतीयते। अरुणद्यवनः यवनः', 'साकेतम्, अरुणद्यवनो माध्यमिकाम्, अनुशोणं पाटलिपुत्रम्', 'मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः', 'पुष्यमित्रसभ इह पुष्यमित्रं याजयामः पुष्यमित्रो यजते याजका याजयन्ति -इत्यादीनि महाभाष्य-गतानि वाक्यानि च आदाय पण्डिताः पतञ्जलेः अवस्थिति-विषये स्वाभिमतं पक्षम् उपस्थापयन्ति।

तत्र यवनः साकेतम्, इति वाक्ये लङ्-लकारस्य प्रयोगम् आदाय तत् च प्रयोक्तुः दर्शनविषयं मत्वा घ्मिनाण्डर. ,इति संज्ञकस्य यवनस्य आक्रमणेन सह संयोजयन्ति। किन्तु यवनस्य उल्लेखस्तु प्राचीनेषु पुराणेषु अपि दृश्यते। केन सह घटना इयम् अन्विता इति न शक्यते यथार्थतः वक्तुम्। किन्तु अत्र वेदवेदाङ्ग-पुराणादिषु उपलब्धानि प्रमाणानि अस्माकं शरणम्। भागवत-विष्णुपुराणादि-ग्रन्थानुसारेण धर्मराजस्य युधिष्ठिरस्य शासनकाले सप्तर्षय एकस्मिन् नक्षत्रे शतं वर्षाणि तिष्ठन्ति स्म। यदा ते पूर्वाषाढासु विचरन्तः आसन् तदा नन्दाभिषेकः सम्पन्नः। ते च यदा श्रवणेषु आसन् तदा युधिष्ठिरः

जनिं लेभे। स च युधिष्ठिरः ८९- मिते वर्षे साम्राज्यम् अवाप तथा द्वानवतितमे वर्षे अश्वमेधेन ईजे च। तेन हि कलेः २०९४ मितेषु वर्षेषु व्यतीतेषु पुष्यमित्रस्य अभिषेकः अभवद् यस्य प्रधानाचार्यः पतञ्जलिः आसीद् इति प्रायः सर्वैः स्वीक्रियते। एवं तस्य अवस्थितिः विक्रमपूर्व-दशमशतमेव न्याय्यम्। तदनुसारं भगवतः पतञ्जलेः समयः ई. पू. द्वितीयशतकं स्वीकर्तुं शक्यते।

पतञ्जलिना महाभाष्यातिरिक्ता अपि केचन ग्रन्थाः लिखिताः। तेषु अधोलिखिताः प्रसिद्धा ग्रन्थाः उल्लेखम् अर्हन्ति-महानन्दकाव्यं चरक-परिष्कारः, सिद्धान्त-सारावली कोषग्रन्थः, आर्यापञ्चाशीति, साहित्यशास्त्रं तथा लोहशास्त्रं च। समुद्रगुप्तः स्वकीये कृष्णचरिते पतञ्जलेः महानन्दकाव्यं स्मरति। अवशिष्टग्रन्थानां प्रणेता कतमः पतञ्जलिः इति अधुना अपि इदमित्थं नैव निर्णीतम्। केचित्तु चरकम् अपि पतञ्जले एव नामान्तरं मन्यन्ते।

पतञ्जलिविरचितं महाभाष्यं नाम पाणिनीय-व्याकरणस्य कश्चन प्रामाणिकः व्यख्याग्रन्थः वर्तते। भर्तृहरेः कथनानुसारेण इदं महाभाष्यं हि सर्वेषामेव न्याय-बीजानाम् आकरग्रन्थ अस्ति। वस्तुतः पाणिनीयं च व्याकरणम् अन्य-व्याकरणापेक्षया अभिनवम् आसीत्। तेन इदं व्याकरणं सर्वेषामेव कृते आकर्षकं सञ्जातम्। एतद् व्याकरणम् अधिकृत्य नेकैः विद्वद्भिः वृत्तिग्रन्थाः, वार्तिक-ग्रन्थाश्च लिखिताः। पुराकाले पाणिनीय-सूत्राणाम् उपरि व्याख्याग्रन्थानां प्रणयनं नाम किमपि प्रतिष्ठाजनकं कार्यम् मन्यते स्म। अत एव सूत्रान्तर-प्रणयने समर्थाः व्याडि-प्रभृतय आचार्याः अपि स्वतन्त्ररूपेण सूत्र-प्रणयनम् अकृत्वा तेषामेव सूत्राणां व्याख्याने प्रवृताः अभवन्। एवं सति वृत्ति-वार्तिक-ग्रन्थानां तु कश्चित् प्रवाह एव उद्भूतः। एतेन सूत्राणां मौलिक आशय एव रूपान्तरितः। यथा 'प्राचां देशे, इत्यत्र' प्राचाम्, इति पदग्रहणम् ''आचार्य-निदेशार्थं व्यवस्थित-विभाषार्थञ्चेति मत्वा आचार्याः यस्याचामादिस्तद्वृद्धसञ्ज्ञं भवति देशे बोध्ये प्राचां मतेन'' इति व्याख्यान्ति। अन्ये तु 'प्राग्देशे' इति व्याख्यान्ति। एवमेव सूत्रान्तरेषु अपि तदिदं प्रामाणिकम् अपि शास्त्रं विपन्नं दृष्ट्वा भगवता पतञ्जलिना सूत्राशय-संरक्षकं प्रमाणशास्त्रं महाभाष्यं प्रणीतम्। अनेन हि व्याख्यान-मुखेन व्याकरण-दर्शन-सिद्धान्तानाम् अपि तेन निरूपणं कृतं यद् आधारीकृत्य भर्तृहरिणा स्वकीयं वाक्यपदीयं प्रणीतम्।

भाष्यं नाम वार्तिक-व्याख्यानमिति सामान्य-प्रसिद्धिः। यत्र वार्तिकानि न सन्ति तत्र प्रायेण भाष्यमपि न दृश्यते। अतः संवादशैल्यां हि प्रोक्तं महाभाष्यमिदं मुख्यतया कात्यायन-कृतानां वार्तिकानामेव व्याख्यानमस्ति। वस्तुतः वार्तिकानि एव अवलम्ब्य अस्य ग्रन्थस्य प्रायः प्रवृत्तिः। किन्तु एतत् तु सूत्र-समर्थकम् एव। यत्र वार्तिककारेण सूत्रकार आचार्यः पाणिनिः प्रत्याख्यातः, तत्रापि पतञ्जलिः तस्य समर्थकः प्रतीयते। तत्रापि सः स्वकीये महाभाष्ये युक्त्या सूत्राणि एव मण्डयति। स्वतन्त्ररूपेण अपि अत्र

कानिचिदेव सूत्राणि व्याख्यातानि। सूत्राणां वार्तिकानाञ्च यत् न्यूनत्वं तत् सर्वं भाष्येण पूरितम्। अत्र सांख्यिकी एवं वर्तते – चतुर्दशप्रत्याहारसूत्रैः समम् अष्टाध्याय्याः ३९९५ सूत्रेभ्यः १६८९ सूत्राणामुपरि भाष्यमुपलभ्यते। तेषु तेन १२२८ सूत्रेषु कात्यायनस्य वार्तिकानां, २६ सूत्रेषु अन्येषामाचार्याणां वार्तिकानां भाष्यमयी व्याख्या कृता। ४३५ सूत्रोपरि स्वतन्त्ररूपेण भाष्यमुपन्यस्तम्। ३६ सूत्रेषु वार्तिककारस्य मतं भ्रान्तियुतं मत्वा पाणिनेर्मतं समर्थितम्। १६ सूत्राणि अनावश्यकानि मतानि। वस्तुतः पतञ्जलिना अनेकत्र कात्यायनस्य आक्षेपात् पाणिनिसूत्राणां रक्षा कृता। एवं यद्यपि पतञ्जलिः कात्यायनस्य वार्तिकानां प्रथमो भाष्यकारो नासीत् किन्तु सः श्रेष्ठो भाष्यकारस्तु आसीदेव। सूत्राष्टाध्यायी-क्रमेण पञ्चाशीत्याह्निकेषु लिखितम् एतत् महाभाष्यम् इदानीं द्वात्रिंशदाह्निकमात्रम् उपलभ्यते। एषः गद्यशैल्या प्रणीतः संस्कृतव्याकरणस्य प्रमाणभूतः मूलग्रन्थो वर्तते। वस्तुतः ब्राह्मणारण्यकानामनन्तरमयं प्राचीनतमः श्रेष्ठः गद्यग्रन्थः वर्तते। अस्य ग्रन्थस्य निरूप.णपद्धतिः मौलिकी तथा तर्कशैल्याधृता वर्तते।

महाभाष्यस्य उद्धारः प्रथमं चन्द्राचार्येण कृतः इति अस्माभिः पूर्वमुक्तम्। द्वितीयः उद्धारश्च क्षीराख्येन विदुषा कृतः इति राजतरङ्गिण्यां स्पष्टं प्रतिपादितं वर्तते। एवं पुनः पुनः उद्धारे सति यत्र कुत्रचित् मौलिकता रूपान्तरिता भवेदपि किन्तु तथापि ग्रन्थान्तरापेक्षया महाभाष्यम् इदानीमपि मौलिकग्रन्थ-रूपेण स्वीकृता वर्तते।

वस्तुतः दुरूह-व्याकरण-सम्बद्धमपि एतत् महाभाष्यं सरलं सरसं च वरीवर्ति। अत्र प्रयुक्ता संवादशैली प्रतिपाद्य-विषयाणां स्पष्टरूपेण उपस्थापनाय नितान्तमेव समर्था वर्तते। वस्तुतः अत्र स्वीकृतायाः शैल्याः सरलता प्राञ्जलता च विस्मयावहा वर्तते। अत्रत्या विषय-प्रतिपादन-क्षमता च अनन्यपूर्विका एव अस्ति।

'शब्दविद्येव नो भाति राजनीतिरपस्पशा' इति माघ-कवेरुक्तौ व्याकरणशास्त्रे महाभाष्यस्य प्रथमाह्निकस्य वैशिष्ट्यं सम्यक् सङ्केतितम् अस्ति। यथा गुप्तचरैः विना राजनीतिः न शोभते तथा पस्पशाह्निकं विना शब्दविद्या च न शोभते। एवमेव अन्या एका कारिका पस्पशाह्निकस्य प्रशस्तौ मुखरा दृश्यते –

**शास्त्रेष्वाद्यं व्याकरणं मुख्यं तत्रापि पाणिनेः।।**
**रम्यं तत्र महाभाष्यं हृद्या तत्रापि पस्पशा।।**

किन्तु वस्तुस्थितिः तु एवं वर्तते यत् न केवलं प्रथमाह्निकात् किन्तु सम्पूर्णात् महाभाष्यात् तत्कालिक-भारतीय-समाजस्य, संस्कृतेश्च पर्याप्तं ज्ञानं भवति। वस्तुतः अत्र भारतीय-संस्कृतेः, राजनीतेः, राजतन्त्रस्य, शासनस्य, दण्डस्य, शिक्षायाः, सदाचारस्य, धर्मस्य, दानस्य,व्रतस्य, कृषेः, वेश-भूषायाः, भक्ष्याभक्ष-सामग्रीणां च सर्वाङ्गीणं निदर्शनं द्रष्टुं शक्यते। किं बहुना, अत्र सम्पूर्णरूपेण तात्कालिकी भारतीया पद्धतिरेव दिग्दर्शिता। पतञ्जलिकालीन भारत (प्रभुदयाल अग्निहोत्री, बिहारराष्ट्रभाषापरिषद्, पटना) इत्यनेन

विशिष्ट-ग्रन्थेन देशस्य, लोकस्य, समाजस्य, धर्मस्य, दर्शनस्य, शास्त्रस्य च महान् उपकारः सञ्जातः इत्यत्र नास्ति अतिशयोक्तिलेशः।

## महाभाष्ये लोक-न्यायाः

सर्वथा लोकप्रचलित-भाषायां प्रोक्तत्वात् महाभाष्यमिदं सर्वत्र लोकप्रियं सञ्जातम्। अस्य हि यथार्थानुवर्तिता सर्वातिशायिनी वर्तते। अस्मिन् प्रसङ्गे सूतवैयाकरणसम्वादप्रसङ्गे 'देवानां प्राप्तिज्ञः न तु इष्टिज्ञः इति कथनं महत्त्वपूर्णमस्ति। वस्तुतः महाभाष्यकारः तु उभयः एव आसीत्-प्राप्तिज्ञः इष्टिज्ञश्च। व्यवहारे प्राप्त्यपेक्षया इष्टेः एव अधिकं महत्त्वं भवति। सूत्राणाम् एव अनुसरणं प्राप्तिः, प्रयोगाणाम् अनुसरणं च इष्टिः। पतञ्जलिः जानाति यद् भाषा नैसर्गिकी भवति। व्याकरणसूत्रैः साधुशब्दनिष्पत्तिस्तु भिन्ना कथा। किन्तु तेषां प्रयोगप्रसङ्गः भिन्नः। सारथीत्यस्मिन्नर्थे व्याकरणनियमैः निष्पन्नः शब्दो वर्तते 'प्रवेता' इति। किन्तु लोके 'प्राजिता' इति शब्दस्य प्रचलनं वर्तते। इष्टिज्ञत्वेन पतञ्जलिः लोकप्रचलितं शब्दं साधुं मनुते।

महाभाष्ये शब्दगुडमात्रं, काकपेया नदी, चञ्चा (तृणमयः पुरुषः) चेत्यादीनां लौकिक-शब्दानां प्रयोगाः तस्य व्यावहारिकपक्षं द्योतयन्ति। एवमेव तत्र प्रयुक्तानि लोकव्यवहार-सम्बद्धानि वाक्यानि अपि तस्य प्रभावोत्पादकतां साधयन्ति। पतञ्जलिः महाभाष्ये शताधिकाः परिभाषाः तथा त्रिशताधिकांश्च लैकिक-न्यायान्, दृष्टान्तान्, उपमानान् वा प्रयुक्तवान्। तेषु केचन एव लैकिक-न्यायाः, दृष्टान्ताः, न्यायस्वरूपाः शब्दाः तथा कानिचित् उपमानानि, सुभाषितानि वाक्यानि च अत्र उदाह्रियन्ते येषां समाजे बह्व्यः व्यावहारिक्यः उपयोगिताः भवन्ति। तद्यथा सामाजिकोपयोगिताः, राजनैतिकोपयोगिताः, अर्थनैतिकोपयोगिताश्चेति।

यथासम्भवमत्र तेषां किमपि वर्गीकरणमपि कृतं वर्तते। तद् यथा -

## भौतिकविज्ञान-सम्बद्धानिवचनानि

यथा वयं जानीमः गुरुत्वाकर्षणसिद्धान्तः न्यूटनेन ऐदम्प्राथम्येन प्रतिपादितः इति। एवमुच्यते यत् इंग्लैण्डदेशीयः न्यूटनः १६८७ तमे वर्षे स्वरचिते 'प्रिन्सिपिओमेथमेटिका' इत्यस्मिन् ग्रन्थे गुरुत्वाकर्षणसिद्धान्तम् ऐदम्प्राथम्येन प्रतिपादयामास। तदनुसारम्–

Statement that any particle of matter in the universe attracts any other with force (F) that is proportional to the product of their masses (m1 and m2) इति।

किन्तु ततः त्रिसहस्रात् वर्षेभ्यः पूर्वमेव पतञ्जलिमहर्षिः गुरुत्वाकर्षणसिद्धान्तस्य चर्चाम् अकरोत्। भाष्ये गुरुत्वाकर्षणसिद्धान्तः इति नाम्नः प्रयोगाभावात् स सिद्धान्तः नात्र प्रचारितः। नामविशेषस्य प्रयोगाभावेऽपि गुरुत्वाकर्षणसिद्धान्तस्य यः प्रकारः साम्प्रतिकैः

वैज्ञानिकैः अङ्गीक्रियते स एव प्रकारः तत्र भाष्ये वर्णितः। स्थानेन्तरतमः (पा. १.१.४९) इति पाणिनीयपरिभाषासूत्रेण यत् प्रयोजनं सिद्ध्यति तत् लोके दृश्यमानस्य चेतनानाम् अचेतनानाञ्च व्यवहारस्य आश्रयणेन सिद्ध्यति हेतोः भाष्यकारेण अस्य सूत्रस्य प्रत्याख्यानं कृतम्। तत्र अचेतनानां दृष्टान्ते भाष्यकारः गुरुत्वाकर्षणसिद्धान्तं प्रतिपादितवान्–अचेतनेष्वपि। तद् यथा लोष्टः क्षिप्तो वायुवेगं गत्वा नैव तीर्यग्गच्छति, नोर्ध्वमारोहति। पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः [१०क] इति। टीकाकारैः तस्य भावः एवं स्पष्टीकृतः–

अचेतनेष्वपि यो यस्य गुरुतरसमुदायस्य अवयवः विकारो वा भवति, स स्वभावतः एव केन्द्रस्थानं स्वगुरुतरसमुदायं प्रति आकृष्यते सादृश्यत्। तद् यथा पृथिव्याविकारः अवयवो वा लोष्टखण्डः वायुवेगे आकाशं प्रति क्षिप्तो नोच्चौरारोहति न वा तीर्यग् दिशि गच्छति, अपितु स गुरुतरसमुदायस्य पृथिवीरूपस्य विकारः - लघिष्ठः अवयवः इति हेतोः पृथिवीं प्रत्येव आगच्छति। इत्थमेव यः आदेशः यस्य स्थानिनः अन्तरतमः सदृशतमः तत्स्थाने स आदेशः अनायासं स्वयमायाति।

### आयुर्विज्ञान-सम्बद्धानि वचनानि

- मूत्राय कल्पते यवागूः। उच्चाराय कल्पते यवान्नम्।
- श्लेष्मघ्नं मधु। [११]
- पित्तघ्नं घृतम्। [१२]
- दधिभोजनमर्थसिद्धिरादिः।१३ (अर्थसिद्धेः समीपम् उच्यते)।

व्यावहारिक-शब्दानामर्थविज्ञान-परकाणि वचनानि

- तुन्दपरिमृजोऽलसः [१४]

  (यो हि तुन्दं परिमार्ष्टि तुन्दपरिमार्जः स भवति।)
- निवासो नाम यत्र सम्प्रत्युष्यते। अभिजनो नाम यत्र पूर्वैरुषितम् [१५]
- भक्षं च नाम क्षुत्प्रतिघातार्थमुपादीयत[१६]
- व्रतं च नामाभ्यवहारार्थमुपादीयत[१७]
- यूपश्च नाम पश्वनुबन्धार्थमुपादीयते[१८]
- दक्षिणापथे महान्ति सरांसि सरस्य इत्युच्यन्ते[१९]
- त्रयः प्राच्याः त्रयः उदीच्याः त्रयो मध्यमाः सर्वे निवासलक्षणाः[२०]
- शवतिर्गतिकर्मा कम्बोजस्वेव[२१]
- यो हि राष्ट्रे प्रायेण भवति तत्र भवोऽसौ भवति[२२]

- बुध्यते यद् राष्ट्रं नाम कश्चन राज्ञः अधीनस्थः प्रदेशः भवति
- सौर्यं हिमवतो शृङ्गे। तद्वान् सौर्यं हिमवान्[२३]
- गुहा गिर्योषधयोरिति वक्तव्यम्। गूढिरन्या[२४]
- घटेन तरति घटिकः[२५]
- दारयन्ति इति दाराः,दीर्यते तैर्दाराः चेति[२६]।

**प्राणिविज्ञान-सम्बद्धानि वचनानि**

- हस्ती-मशकयोस्तुल्यः सन्निकर्षः[२७]
- मातृकं गोवोऽनुहरन्ते[२८]
- पैतृकमश्वा अनुहरन्ते[२९]
- व्याददते पिपीलिकाः पतङ्गमुखम्[३०]
- नगरघातो हस्ती[३१]
- कपोतः शरदं पश्पशाते[३२] (कपोतः शरदृतौ मैथुनं काङ्क्षते इत्यर्थः)
- हंसस्य वरटा योषित्[३३]
- श्वानः खल्वपि मुमूर्षवः एकान्तशीलाः सूनाक्षाश्च भवन्ति[३४]
  (मरणासन्नाः श्वानः एकान्तशीलाः सूनाक्षाश्च भवन्ति।)
- गोषु कृष्णा बहुक्षीरा३५
- गौरिवाकृतनोशारः प्रायेण शिशिरे कृशः[३६]
- गोमयाद् वृश्चिको जायते[३७]
- गोलोमाविलोमयोर्दुर्वा जायन्ते[३८]

**सामाजिक-सांस्कृतिक-धर्मशास्त्र-परकाणि वचनानि**

- अब्राह्णणोऽयं यस्तिष्ठन् मूत्रयति। अब्राह्णणोऽयं यो गच्छन् भक्षयति[३९]
- तैलं न विक्रेतव्यम्[४०]
- घृतं न विक्रेतव्यम्[४१]
- गावः सर्षपाश्च विक्रीयन्ते[४२]
- न स्त्री वंश्या। अपर आह द्वावेव वंशौ - मातृवंशः पितृवंशश्च[४३]
- आत्मम्भरिश्चरति यथमसेवमानः[४४]
  (कुक्षिम्भरिणः चाटुकाराश्च हीनाः मन्यन्ते स्म।)

- अपस्किरते कुक्कुटो भक्षार्थी[४५]
- प्रियतद्धिता: दाक्षिणात्या:[४६]

(तद्यथा लोके वेदे चेति प्रयोक्तव्ये तयो: तद्धितरूपे प्रयुज्येते।)

- ब्राह्मणेन निष्कारणो धर्म: षङ्गो वेदोऽध्येय:[४७]
- अभक्ष: ग्राम्यकुक्कुट: अभक्ष: ग्राम्यशूकर:[४८]
- खेदात् स्त्रीषु प्रवृत्तिर्भवति। समानश्च खेदविगमो गम्यायामगम्यायाञ्च[४९]
- वरतनु। सम्प्रवदन्ति कुक्कुटा:[५०] (प्रात:काल: अभवदिति सूच्यते)।

शकुनशास्त्रसम्बद्धानि वचनानि

- वाताय कपिला विद्युदातपायातिलोहिनी।
  पीता भवति शस्याय दुर्भिक्षाय सिता भवेत्।।[५१]
- जायाघ्नस्तिलकालक:, पतिघ्नी पाणिलेखा[५२]।

## अभिनव-शास्त्रीयविषय-प्रतिपादनशैली।।

महाभाष्यस्य विषयनिरूपणपद्धति: प्रवाहमयी सम्भाषणात्मिका च वर्तते। कठिनविषयाणां प्रारम्भ: 'इदमिह सम्प्रधार्यम्' इत्यनेन वाक्येन क्रियते। येन पाठक: सावधान: जागरुकश्च भवेत्। पतञ्जलि: पूर्वपक्षस्य स्थापनामपि तटस्थतया तन्मयतया च करोति तथा 'विषम उपन्यास:' इत्यादिवाक्यै: उत्तरपदस्य प्रतिपादनं करोति। मध्ये मध्ये 'किं वक्तव्यमेतत्', 'कथमनुच्यमानं गंस्यते' इत्यादिभि: सम्वादात्मकै: वाक्यै: पाठकानां ध्यानमाकर्षति। कदाचिद् 'यथा न दोषस्तथास्तु' इति वदता तेन पाठकस्योपरि निर्णयस्य भार: स्थाप्यते, कदाचित् 'यथान्यासमेवास्तु' इत्युक्त्वा सूत्रकारं समर्थयति। कदाचिद् 'गोनर्दीयस्त्वाह' इति कथयित्वा अधिकग्राह्यपक्षं पुष्णाति, कदाचिद् 'उभयथा गोणिकापुत्र:' इति उक्त्वा उभयपक्षस्य समर्थनं करोति। कदाचिद् 'देव एव जानाति' इति उक्त्वा विनोदात्मकोत्तरै: पाठकमनांसि रञ्जयति। एवं पतञ्जलिना व्याकरणसदृश: क्लिष्ट: नीरसश्च विषय: सरसीकृत:।

**व्यङ्ग्योक्तय:**

वस्तुत: अस्य ग्रन्थस्य सरसत्वे तस्य आकर्षणमयी भाषा एव कारणं विद्यते। विरोधीनां तर्क-खण्डनावसरे तेन बहुधा कटाक्षपूर्णा व्यंग्यमयी भाषा प्रयुक्ता। एवं शुष्कसिद्धान्तानां निरूपणेऽपि तादृशी भाषा स्फूर्तिदा प्रतीयते। यथा -

- कश्चेदानीं भवतो मत्सर: यदि सर्वं लोकोऽभ्युदयेन युज्यते[५३]
- कश्चेदानीमन्यो भवज्जातीयक: पुरुष:[५४]

- सैषोभयतस्पाशा रज्जुर्भवति[५५]
- अनुगृहीता स्मो यैरस्माभि:[५६]
- आम्रान् पृष्ट: कोविदारानाचक्षते.,
  (हिन्दीभाषायाम् - पूछे खेत की, कहे खलिहान की)
- प्रमत्तगीत एष तत्र भवत:
- अद्यत्वे वेदमधीत्य त्वरिता वक्तारो भवन्ति।

**उपमानानि**

एवमेव महाभाष्यप्रयुक्तानि उपमानानि तत्रत्या: न्याया:, सूक्तय:, दृष्टान्ता अपि अतीव रमणीया वर्तन्ते। एतेषां प्रयोगे ग्रन्थशैल्यां महती रोचकता समागता। उदाहरणार्थमत्र तत्प्रयुक्तानि कानिचन सुपरिचितानि प्रभावोत्पादकानि उपमानानि उदाह्रियन्ते

- यदि पुनरिमे वर्णा: शकुनिवत् स्यु:। शकुनय आशुगामित्वात् पुरस्तादुत्पतिता: पश्चाद् दृश्यन्ते।[६०]
- यदि पुनरिमे वर्णा: आदित्यवत् स्यु:। तद्यथा, एक आदित्यो नैकाधिकरणस्थो युगपद्देशे पृथक्त्वेषूपलभ्यते।[६१]
- कथं पुनरसम्नायलिङ्गं शक्यं द्रष्टुम्। मृगतृष्णावत्। तद्यथा मृगास्तृषिता: पयोधारा: पश्यन्ति न च ता: सन्ति।[६२]
- गन्धर्वनगराणि यथा दूरतो दृश्यन्ते उपसृत्य च नोपलभ्यन्ते। तद्वत् खट्वावृक्ष-योरसल्लिङ्गम् द्रष्टव्यम्। यथा आदित्यस्य गति सती नोपलभ्यते तद्वत् खट्वावृक्षयो: सल्लिङ्गं नोपलभ्यते। यथा वस्त्रान्तर्हितानि द्रव्याणि नोपलभ्यन्ते तद्वत् खट्वावृक्षयो: सल्लिङ्गं नोपलभ्यते।[६३]
- गोयूथवदधिकारा:। तद्यथा गोयूथमेकदण्डप्रघट्टितं सर्वं समं घोषं गच्छति तद्वद् अधिकारा:।[६४]
- अकृतकारि खल्वपि शास्त्रमग्निवत्। तद्यथा अग्निर्यदग्धं तद् दहति, कृतकारि खल्वपि शास्त्रं पर्जन्यवत्। तद् यथा पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति।[६५]
  इतरेतराश्रयाणि कार्याणि न प्रकल्प्यन्ते। नौर्नावि बद्धा नेतरत्राणाय भवति[६६]।
  व्यञ्जनानि पुनर्नटभार्यावद् भवन्ति। तद्यथा नटानां स्त्रियो रङ्गं यो यो पृच्छति कस्य यूयम् कस्य यूयम्, तं तं तव तवेत्याहु:[६७]।

**दृष्टान्ता:**

उपर्युक्तेषु उदाहरणेषु भाष्यकार: स्ववक्तव्यस्य पुष्ट्यै प्रतिदिनं व्यवहारे समागतानाम्

उपमानानामुपयोगः स्वरीत्या कृतः। तेन समानगुणकेनोपयोगेन पाठकः विना तर्केण वक्तुः मन्तव्यं स्वीकर्तुं विवशः भवति। एषा एव स्थितिः भाष्यप्रयुक्तानां दृष्टान्तानामेव वर्तते। उपमानसदृशस्ते सुपरिचिताः दृष्टान्ता अपि सुग्राह्याः वर्तन्ते। अत्र केषाञ्चन दृष्टान्तानामुदाहरणानि प्रस्तूयन्ते। वस्तुतः एतेषु दृष्टान्तेषु अपि केचन न्यायस्वरूपाः वर्तन्ते–

- नष्टाश्वदग्धरथवत् –तवाश्वो नष्टो ममापि रथो दग्धः। उभौ सम्प्रयुज्यावहा इति। एवमिहापि तवाप्यन्तरतमा प्रकृतिर्नास्ति, ममाप्यन्तरतम आदेशो नास्त्यस्तु नो सम्प्रयोग इति,। व्याकरणे एषः नष्टाश्वदग्धरथन्यायरूपेण परिचितो वर्तते।
- अभ्यन्तरो हि समुदायस्यावयवः। तद्यथा वृक्षः प्रचलन् सहावयवैः प्रचलति।
- असिद्धं बहिरङ्गमन्तरङ्गे एषा परिभाषा लोकतः सिद्धा। प्रत्यङ्गवर्ती लोको सन्दृश्यते । तद्यथा पुरुषोऽयं प्रातरुत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत् करोति ततः सृहृदान्ततःसम्बन्धिनम्।
- न ह्यन्यस्यासिद्धत्वादन्यस्य पुनर्भवो भवति। नहि देवदत्तस्य हन्तरि हते देवदत्तस्य पुनर्भवो भवति।,
- नञ्-प्रयुज्यमानः पदार्थं निवर्तयति। कील-प्रतिकीलवत्। तद्यथा कील आहन्यमानः प्रतिकीलं हन्ति।
- प्रसक्तस्य चानभिनिवृत्तस्य प्रतिषेधेन निवृत्तिः शक्या कर्तुं नाभिनिर्वृत्तस्य। यो हि भुक्तवन्तं ब्रूयान्मा भुङ्क्था इति किं तेन कृतं स्यात्
- न खल्वप्यन्यत् प्रकृतमनुवर्तनादन्यद् भवति। नहि गोधा सर्पन्ती सर्पणादेवाहि-र्भवति।
- अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते उपस्पृश्यते च। शालयश्च भव्यन्ते।,
- आमिश्रस्यायमादेशः उच्यते। स नैव पूर्वग्रहणेन गृह्यते नापि परग्रहणेन। क्षीरोदके सम्पृक्ते आमिश्रत्वान्नैव क्षीरग्रस्तेन गृह्यते नाप्युदकग्रहणेन।
- उष्यत्राश्रयेनान्तादिवत्। तद्यथा लोके यो द्वयोस्तुल्यबलयोरेकः प्रेष्यः भवति स तयोः पर्यायेण कार्यं करोति। यदा तु तमुभौ युगपत् प्रेषयतो नानादिक्षु च कार्ये भवतस्तत्र यद्यप्यसावविरोधार्थी भवति तत उभयोर्न करोति।

**लोकन्यायाः**

एवं महाभाष्येण जीवनस्य सामान्य-तथ्यानां सहायताभिः व्याकरणस्य नैके महत्त्वपूर्णाः सिद्धान्ताः परिभाषाश्च सृष्टाः। एतस्य केचन न्यायास्तु अतीव प्रसिद्धाः

सन्ति। ते च न्याया: यद्यपि दृष्टान्ता एव सन्ति किन्तु तदपेक्षया संक्षिप्ता: तथा विशिष्टार्थग्राहिणश्च भवन्ति। केचन प्रमुखा: न्यायास्तावदधोलिखिता: सन्ति–

- **स्थालीपुलाकन्याय:** - पर्याप्तोऽप्येक: पुलाक: स्थाल्या निदर्शनाय।
- **कूपखानकन्याय:** - तद्यथा कूपखानक: कूपं खनन् यद्यपि मृदा पांसुभिश्चावकीर्णो भवति। सोऽप्सु सञ्जातासु तत एव तं गुणमासादयति येन च स दोषो निर्हण्यते भूयसा चाप्यभ्युदयेन योगो भवति
- कुम्भिधान्यन्याय: - यस्य कुम्भ्यामेव धान्यं स कुम्भिधान्य:। यस्य पुन: कुम्भ्यां चान्यत्र च नासौ कुम्भिधान्य:।[८०]
- काकतालीयन्याय: काकागमनमिव तालपतनमिव काकतालम्। काकतालमिव काकतालीयम्।
- अविरविकन्याय: - तद्यथा अवेर्मांसमिति विगृह्य अविकशब्दादुत्पत्ति-र्भवत्यविकमिति। एवं च पञ्चसु कपालेषु संस्कृत इति विगृह्य पञ्चकपाल इति च भविष्यति। पञ्चकपालाभ्यां संस्कृत इति विगृह्य वाक्यमेव।
- एकदेशविकृतन्याय:- एकदेशविकृतमनन्यवत्।

  (श्वा कर्णे वा पुच्छे वा छिन्ने श्वैव भवति नाश्वो न गर्दभ:)
- आम्राश्च सिक्ता: पितरश्च प्रीणिता: (अत्र द्विगता अपि हेतवो भवन्ति),

एष: प्रयोग: तत्र उपयुज्यते यत्र द्विगता अपि हेतवो भवन्ति। लोके यदा एकेन कार्येण प्रयोजनद्वयं सिद्ध्यति तत्र अस्य न्यायस्य प्रयोग: दृश्यते। 'एक पन्थ दो कार्य' इति हिन्दी-भाषायामुच्यते।

एवमेव अजाकृपणन्याय:, मत्स्यकण्टकन्याय:, धान्यपलालन्याय:, पञ्जरस्थ-सिंहन्याय:, काकाक्षिगोलकन्याय:, देहलीदीपन्याय:, जलतुम्बीन्याय:, प्रासावासीन्याय:, चम्पकपुष्पिकान्यायश्चेति।

**सूक्तय:**

महाभाष्ये नैकेषु स्थलेषु मनोरमसूक्तीनां समावेश: दृश्यते। तत्र लोकप्रसिद्धानां सूक्तिनामपि प्राचुर्यं दृश्यते। यथा द्विर्बद्धं सुबद्धं भवति। तास्ता: सूक्तय: प्रवचनानि च कदाचित् सोदाहरणमुपलभ्यन्ते कदाचिच्च साररूपेण। भाष्यकारेण तासां सूक्तीनामुपयोग: स्वाभिमतपुष्टये एव विहित:। महाभाष्ये समुपलब्धासु सूक्तिषु काश्चन प्रमुखा: सूक्तय: एवंविधा: सन्ति -

- केशेषु चमरीं हन्ति।
- चर्मणि द्वीपिनं हन्ति।

- सीम्नि पुष्कलको हतः।
- समानगुणे एव स्पर्धा भवति। न ह्यभिरूपौ स्पर्धेते। अदूरविप्रकर्ष एव स्पर्धा भवति।
- आसीनं वर्धते विषम् (पातितं विषं स्वयं वर्धते इत्यर्थः)
- कथं नाम स्त्री सभायां साधुः स्यात्।
- एको व्रीहिः सम्पन्नः सुभिक्षं करोति।
- अभ्यन्तरोऽहं लोके न त्वहं लोकः (यदि कश्चन अङ्गं भवति न तु अङ्गी तर्हि एष न्यायः प्रवर्तते)
- फलवता च नाम प्रयत्नेन भवितव्यम्
- न च प्रयत्नः फलाद् व्यतिरेच्यः
- तप्ते भ्राष्ट्रे तिलाः क्षिप्ता मुहूर्तमपि नावतिष्ठन्ते
- न च भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते
- न च मृगाः सन्तीति यवा नोप्यन्ते
- नहि निष्कधनः शतनिष्कधनेन स्पर्धते (शतनिष्कसम्पन्नेन न स्पर्धते इत्यर्थः)
- एकेन कुद्दालकेन खारीसहस्रम
- न वै कामानां तृप्तिरस्ति
- बुभुक्षितं न प्रतिभाति किञ्चित्
- नहि गोधा सर्पन्ती सर्पणादेवाहिर्भवति
- केवलं सर्पणादेव गोधा अहिः न भवति।
- वेदान्नो वैदिका शब्दाः सिद्धाः लोकाच्च लौकिकाः[१०३]
- एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति (एकेनैव वाक्येन साधुशब्दप्रयोगस्य महत्त्वं प्रतिपादितं वर्तते)
- न हि गूड इत्युक्ते मधुरत्वं गम्यते शृङ्गवेरमिति वा कटुकत्वम्
- देवरक्ताः किंशुकाः[१०५] यज्ञकर्मणि प्रयुज्यन्ते।
- प्रधाने च कृतो यत्नः फलवान् भवति
- हिमवानपि गच्छति।
- वदरीपिटके रिक्तको लोहकंसस्तद्गुण उपलभ्यते।

**शब्दन्यायाः**

महाभाष्ये प्रयुक्ताः नैके शब्दाः संस्कृतशब्दकोशस्य अमूल्यनिधिरूपाः सन्ति। सम्पूर्ण महाभाष्यं विशिष्टावसरेषु प्रयुक्तैः विशिष्टार्थकशब्दैः समृद्धमस्ति। नैके एवंविधाः शब्दाः भाष्ये प्रयुक्ताः सन्ति येषां कृते सम्पूर्णवाक्यस्यावश्यकता भवति। वस्तुतः अयमेकः स्वतन्त्रविषयः यमधिकृत्य अस्माकं ध्यानाकर्षणमावश्यकम्। अत्रोदाहरणरूपेण केचन एव शब्दाः उदाह्रियन्ते -

- शब्दगूडमात्रम् (शब्दाडम्बरः इति हिन्दी-भाषायाम्)
- उष्ट्रासिकाः (उष्ट्रवत् विविधप्रकारकमुपवेशनम्)
- हतशायिकाः (मृतवत् अव्यवस्थितरूपेण भूमौ लुठनम्)
- काकपेया (क्षीणजला नदी)
- चञ्चा (तृणमयः पुरुषः यः कृषिक्षेत्रे शृगालादीन् पशून् भीषयितुं कृषकैः निर्मीयते)
- सांन्यासिकः (शठे शाठ्यं समाचरणम्)
- भ्रूकुंशः (नाटके स्त्रीभूमिकायामभिनेता पुरुषः)
- अयःशूलिकः (मृदु करणीयं कार्यं यः बलात् सम्पादयति)
- अपस्किरणम् (प्रमुदितैः बलिवर्दैः शृङ्गैः मृत्तिकाखोदनमथवा कुक्कुर-मार्जारादिभिः पदैः भूमिखोदनम्।)
- केशकः (केशप्रेमी पुरुषः)
- अषडक्षीणः (द्वयोः जनयोः मध्ये गुप्तमन्त्रणा)
- वृहतीका (प्रावारकम्)
- पथकः (पद्भ्यां गमने कुशलः)
- आशितङ्गु (एतादृशं क्षेत्रं यस्य घासाः पशुभिश्चरिताः)
- अन्ववसर्गः (कार्यं कर्तुमनुज्ञा)
- शीतकः (शीघ्रं करणीयं कार्यं यः शैथिल्येन सम्पादयति)
- तन्नकम् (सद्यः स्यूतं वम्)
- विपादिका (उत्पन्नः स्फोटः व्रणो वा)
- वहंलिट् (हलं कुर्वन्नेव क्षेत्रं चरन् पशुः)।

एते शब्दास्तु केवलं निदर्शनभूताः। सर्वेषां सङ्ग्रहणे दीर्घा एव सूची भविष्यति। अतएव विरम्यते विस्तारभयात्।

वस्तुतः भाष्यकारेण महत्त्वपूर्णसिद्धान्तानामुपस्थापनविषयेऽपि एतत् सुनिश्चितमेव कृतं यदेतत् शास्त्रमपि सरलतया सरसतया च सुग्राह्यं स्यात्। एतदर्थं तेन सर्वत्र लोकविज्ञानमुदाहृतम्, लोकव्यवहाराश्च आश्रिताः। तस्य अधिसंख्याकास्तर्काः पूर्वपक्षस्य भवन्तु उत्तरपक्षस्य वा भवन्तु लोकाश्रिताः सन्ति। उदाहरणार्थं यदा स वक्तुमिच्छति यत् प्रत्ययानां स्थानं निश्चितं भवेत् अन्यथा ते कदाचित् शब्दस्य आदौ, कदाचित् मध्ये कदाचिद् अन्ते च प्रयुक्ताः स्युः । एतस्मिन् प्रसङ्गेऽपि सः एकं लौकिकमुदाहरणं प्रस्तौति। यथा वत्सा कदाचित् स्वमातुः अग्रे, कदाचित् पश्चात् कदाचिच्च पार्श्वे चलति तथैव एते प्रत्ययाः । एवमेतादृशैः उदाहरणैः भाष्ये नैके न्यायाः, नियमाः, दृष्टान्ताः तथा नैकाश्च परिभाषाः निर्मिताः भवन्ति।

**उपसंहारः**

महाभाष्यस्य लोकप्रवृत्तिं दृष्ट्वा अथर्ववेदवदेतदपि लोकवेदत्वेनाभिधातुं शक्यते। अत्र तु तत्कालिकं सम्पूर्णं भारतवर्षं चित्रितं दृश्यते। डा. प्रभुदयाल अग्निहोत्रिण- 'पतञ्जलिकालीन भारत' इति पुस्तकं पश्यामश्चेत् तत्र द्रष्टुं शक्नुमो यत् महाभाष्ये तत्कालिकस्य सम्पूर्ण-भारतवर्षस्य भूगोलः चित्रितः वर्तते। पर्वत-वन-नदी-जनपद -नगर-ग्रामाणां विवरणं, समाजसङ्गठनं, वर्णजातिविवरणं तथा विविध-संस्कार-आश्रमादीनां वर्णनं ग्रामवासि-नगरवासीनां चित्रणं, नारीणां स्थितिः, गृहसामग्री-वेशभूषा-भोजन-पान-परिवहन-मनोरञ्जनादि- संस्कृति-चित्रणं, कृषि-वनस्पति-पशुपक्षि-शिल्प-वाणिज्य-धन-मुद्रा-श्रम-श्रमिकाणां चित्रणं, साहित्य-कलाप्रसङ्गे शिक्षास्वास्थ्यसङ्गीत-नृत्यनाट्यादिभिः दृष्टसाहित्य-प्रोक्तसाहित्य-व्याख्यातसाहित्य-उपञ्जातसाहित्य-कृतसाहित्यानां विवरणं तथा शिक्षा-वेदायुर्वेद-ज्योतिर्विज्ञान-स्वरूपं च चित्रितं वर्तते। एवमेव देव-यज्ञ-मूर्तिपूजा-भक्ति-दर्शन-व्रतोपवास-धर्म-धार्मिक-क्रियाणां च वर्णनं विविध-प्रसङ्गेषु उपलभ्यते। अतः महाभाष्यं महाभारतमिति यदि वदामः तर्हि अत्युक्तिः न स्यात्। एतेषु बहवः प्रसङ्गाः लोकन्याय-दृष्टान्तोपमान-सूक्ति-प्रवचनमाध्यमेन आगताः सन्ति।

महाभाष्यस्य रचनाशैली स्पष्टा सरला प्रसादगुणमयी च वर्तते। अत्र दैनन्दिन-व्यवहोरोपयोगि-शब्दानां वाक्यानाञ्च प्राचुर्येण प्रयोगो वर्तते। दीर्घसमासक्लिष्टपदावल्याः प्रयोगः न कुत्रापि दृश्यते। भाषासौष्ठवदृष्ट्याऽपि महाभाष्यं शरीरभाष्यादधिकं सरलमस्ति। अत्र यद्यपि शास्त्रीयग्रन्थरूपेण पारिभाषिकशब्दानां शास्त्रीयशब्दानाञ्च प्रयोगः स्वाभाविकस्तथापि लोकव्यवहारोपयुक्तानां निसर्गसुन्दराणां सुपरिचितशब्दावलीनां प्रयोगात् महाभाष्ये भाषाकाठिन्यं न कुत्रापि समागतम्। अत्रत्या विषयप्रतिपादनशैल्यपि मनोरमा। सरल-सुबोध-निसर्ग-रमणीय-भाषायाः प्रयोगः, स्थाने स्थाने वक्तृत्वच्छटा तथा संवादमयानां वाक्यानां मोहकता भाष्ये विशेषमाकर्षणमुत्पादयन्ति। यत्र प्रतिपाद्यविषयः गम्भीरः

कठिनश्च वर्तते तत्र मध्ये मध्ये विनोदयुक्तानि वाक्यानि प्रयुज्य तथा समयोचित-लौकिक-दृष्टान्त-वाक्यानां समावेशं कृत्वा पतञ्जलिना अत्र पाठकजिज्ञासा पठनीयता च समुत्पादिता येन प्रायः समे प्रसङ्गाः सजीवाः अभवन्।

एवमेषु लोकन्यायेषु पूर्णरूपेण भारतीया संस्कृतिः परम्पराश्च प्रतिविम्बताः सन्ति इति वक्तुं शक्यते। अतः एतेषामात्मसात्करणेन अस्माकं प्राचीन-संस्कृतेः परम्परायाश्च सुरक्षा भविष्यति।

महाभाष्ये प्रयुक्तेषु लोकन्यायेषु पतञ्जलिकालिकी सामाजिकी स्थितिः सामाजिकी चेतना च समङ्किता वर्तते इति अस्माभिः दृष्टम्। अद्यतनीये भारतीये समाजे तु बह्व्यः विसङ्गतयः दृश्यन्ते। सर्वत्र हिंसायाः साम्राज्यं प्रसरदस्ति। महाभाष्यीयलोकन्यायानां प्रचारमाध्यमेन अपि अद्यतनीयसामाजिकव्यवस्थायां परिवर्तनमानेतुं शक्यते इति न रूचिदतिशयोक्तिः।

पुनश्च अद्यत्वे संस्कृतसम्भाषण-प्रसङ्गे व्यावहारिक-शब्दानां कृते उचितशब्दाः नोपलभ्यन्ते। सा एव स्थितिः आधुनिक-संस्कृत-साहित्य-निर्माण-प्रसङ्गेऽपि। परन्तु सौभाग्यात् तादृशाः बहवः शब्दाः महाभाष्ये प्रयुक्ताः दृश्यन्ते। यथा चञ्चा। अस्य शब्दस्य अर्थः भवति  तृणमयः पुरुषः यः कृषिक्षेत्रे शृगालादीन् पशून् भीषयितुं कृषकैः निर्मीयते। यतोहि पतञ्जलेः मान्यता इयमस्ति यत् महान् हि शब्दस्य प्रयोगविषयः,

उपलब्धौ यत्नः क्रियताम्। सन्ति शब्दाः अप्रयुक्ताः इति कथनं तु केवलं साहसमात्रम्' वस्तुतः तन्मतानुसारं  सन्ति चाप्रयुक्ताश्चेति विप्रतिषिद्धम्[११०] यतो हि ''यदि सन्ति नाप्रयुक्ताः। अथाप्रयुक्ताः न सन्ति'' इति तस्य सिद्धान्तः। वस्तुतः महाभाष्ये प्रयुक्तानां लोकन्यायानां सूक्तिमयवाक्यानां प्रवचनानाञ्च प्रयोगः व्यावहारिक-संस्कृतसम्भाषणे साहित्यनिर्माण-प्रसङ्गे च साक्षात्कर्तुं शक्यते इति महती उपयोगिता एतेषां लोकन्यायानाम्। समकालिकरचनाकारैः स्वकीयं शब्ददारिद्र्यं दूरीकर्तुं महाभाष्यप्रयुक्तान् लोकन्यायान्, शब्दान्, वाक्यांशान्, वाक्यानि, प्रवचनानि, सुभाषितानि च अवश्यं प्रयोक्तव्यानि। अन्यथा कदाचित् तेऽपि पतञ्जलेः एकेन न्यायेनैव आक्षिप्ताः स्युः - नात्यन्तायाज्ञानं शरणं भवितुमर्हति[१११] इति दिक्।

**सन्दर्भाः**

१. म.भा., पा. ४.२.९३
२. म.भा., २३' झ.३.२.१
३. म.भा., पा. ३.२.११४
४. राजतरङ्गिणी १.१७६
५. राजतरङ्गिणी १.१७३

६. वाक्यपदीये २.४८२, राजतरङ्गिणी १. १७६-८१
७. राजतरङ्गिणी ४.४८६-८९
८. राजतरङ्गिणी १.१७६
९. राजतरङ्गिणी १.७५
१०क. म.भा.पा. २.३.१३
१०. म.भा.पा. १.१.४९
११. म.भा.पा. १५ ६.१.१२
१२. म.भा.पा. १५ ६.१.१२
१३. म.भा.पा. ६.४.१६१
१४. म.भा.पा. ३.२.५
१५. म.भा.पा. ४.३.९०
१६. म.भा.आ. १
१७. म.भा.आ. १
१८. म.भा.आ. १
१९. म.भा.पा. १.१.१९
२०. म.भा.पा. ४.२.१३८
२१. म.भा.आ १
२२. म.भा.पा. ४.३.३९
२३. म.भा.पा. १.१.५७
२४. म.भा.पा. ३.३.१०४
२५. म.भा.आ. २
२६. म.भा.पा. ३.३.२०
२७. म.भा.पा. १.४.१०९
२८. म.भा.पा. १.३.२१
२९. म.भा.पा. १.३.२१
३०. म.भा.पा. १.३.२०
३१. म.भा.पा. ३.२.५३
३२. म.भा.पा. ७.३.८७
३३. म.भा.पा. ६.३.३४
३४. म.भा.पा. ३.१.७
३५. म.भा.पा. ४.३.४२

३६. म.भा.पा. ३.३.२१

३७. म.भा.पा. १.४.३०

३८. म.भा.पा. १.४.३०

३९. म.भा.पा. २.२.६

४०. म.भा.आ. २

४१. म.भा.आ. २

४२. म.भा.आ. २

४३. म.भा.पा. ४.१.११४

४४. म.भा.पा. ३.२.२६

४५. म.भा.पा. ६.१.१४२

४६. म.भा.आ. १

४७. म.भा.आ. १

४८. म.भा.आ. १

४९. म.भा.आ. १

५०. म.भा.पा. १.३.४८

५१. म.भा.पा. २.३.१३

५२. म.भा.पा. ३.२.५२

५२. म.भा.आ. १

५४. म.भा.आ. १

५५. म.भा.पा. ६.१.६८

५६. म.भा.आ. २

५७. म.भा.पा. १.२.४५

५८. म.भा.आ. १

५९. म.भा.आ. १

६०. म.भा.आ. २

६१. म.भा.आ. २

६२. म.भा.पा. ४.१.३

६३. म.भा.पा. ४.१.३

६४. म.भा.पा. ..४.२७०

६५. म.भा.पा. ६.१.१७१

६६. म.भा.पा. १.१.१

६७. म.भा.पा. ६.१.२
६८. म.भा.पा. १.१.५०
६९. म.भा.पा. १.१.५६
७०. म.भा.पा. १.१.५७
७१. म.भा.पा. १.१.६५)
७२. म.भा.पा. २.२.६)
७३. म.भा.पा. ६.१.३७)
७४. म.भा.पा. ६.१.५०)
७५. म.भा.पा. ६.१.५०)
७६. म.भा.पा. ६.१.८५)
७७. म.भा.पा. ६.१.८५
७८. म.भा.पा. १.४.२३
७९. म.भा.आ. १
८०. म.भा.पा. १.३.७
८१. म.भा.पा. ५.१.१०६
८२. म.भा.पा. ४.१.८९
८३. म.भा.पा. २
८४. म.भा.पा. १.१.५६
८५. म.भा.पा. १.,पा. ८.२.३
८६. म.भा.पा. २.३.३६
८७. म.भा.पा. २.३.३६
८८. म.भा.पा. २.३.३६
८९. म.भा.पा. ३.२.१२६
९०. म.भा.पा. ४.१.१५
९१. म.भा.पा. १.२.५८
९२. म.भा.आ. १
९३. म.भा.आ. १
९४. म.भा.आ. १
९५. म.भा.पा. १.१.५०
९६. म.भा.पा. ६.१.१३
९७. म.भा.पा. १.१.३९

९८. म.भा.पा. ५.३.५५
९९. म.भा.पा. २.१.६९
१००. म.भा.पा. ६.१.८५
१०१. म.भा.पा. २.३.२
१०२. म.भा.पा. १.१.२३
१०३. म.भा.आ. १
१०४. म.भा.पा. २.१.१
१०५. म.भा.पा. ३.१.७९
१०६. म.भा.आ. १
१०७. म.भा.२३ पा. ३.२.१
१०८. म.भा.पा. १.२.३०
१०९. म.भा.आ. १
११०. म.भा.आ. १
१११. म.भा.आ. १

**सन्दर्भ-ग्रन्थाः**


१. महाभाष्य (Mbh of) iRk×Tkfy, Ed. by Kielhorn, Rev. Edn. K.V.Abhyankar, Bhandarkar Sanskrit Series, Poona, Vol.I (1962), II (1965), III (1972)

२. Joshi S.D & Roodbergen J.A.F. : Introduction and Notes to :Mbh (पस्पशाह्निकम्), University of Poona,1989

____________ : Mbh (अव्ययीभावत्तत्पुरुषाह्निकम्), Poona, 1969

____________ : Mbh (अनभिहिताह्निकम्), Poona,1976

____________ : Mbh (समर्थाह्निकम्), Poona,1968

____________ : Mbh (कारकाह्निकम्), Poona,1968

____________ : Mbh (बहुव्रीही-द्वन्द्वाह्निकम्), Poona, 1974

____________ : Mbh (प्रातिपदिकार्थशेषाह्निकम्), Poona,1981

____________ : Mbh (कर्मधारयाह्निकम्), Poona,1971

____________ : Mbh (तत्पुरुषाह्निकम्), Poona, 1973

३. Laddu, S.D. : Evolution of Sanskrit language from पाणिनि to पतञ्जलि, CASS, University of Poona, 1974

४. Abhyankar, K.V. & Shukla, J.M.: Introduction to Mbh (1&3), BORI, Poona, 1975

५. Pathak, S.Shastri & Chitrao S Shastri : Word Index to पतञ्जलि's महाभाष्यए BORI, Poona, 1972

६. Mimamsaka Yudhisthira : संस्कृत.व्याकरण का इतिहास, Part III, Ramlal Kapoor Trust, Haryana

७. Abhyankar, V.S.: व्याकरण महाभाष्य, मूल आणि मराठी भाषान्तर, (Vol.I), Deccan College Education Society, Poona 1938

८. Chakravarti, P.C.: The महाभाष्य, अध्याय १, पाद १, आह्निक १ Introduction), The Indian Historically Quarterly, Vol.I, pp.703&739 Ed. by N.N.Law, Calcutta, 1925,

११. Chatterjee, K. C. : पतञ्जलि, महाभाष्य पस्पशाह्निक, Introductory chapter), Ed. with English Translation, Notes & comms. Revised Fourth Edn., Calcutta, 1972

१२. Filliozat, P.: Le महाभाष्य de पतञ्जलि avecle प्रदीप de कैयट et I udyota de नागेश, अध्याय १, 9 M (?-1, Institute Francais d'Indologie, pondicherry 1975-

१३. Roy, K. R. : व्याकरण-महाभाष्य, (Section-I), Calcutta, 1963

१४. Shastri, Subramanya, p.c.: Lectures on पतञ्जलि's Mbh, vol.I , आह्निके 1&3, second Edn., Tiruvayur, 1960

१५. Trapp, V.: Die ersten finf आह्निकs des महाभाष्यम् , Insdent sche ubersetzt and erklart Leipzig , 1935-

१६. A Dictionary of Sanskrit Grammar, Gaikwad Oriental Series, Oriental Institute, Baroda, 1977

१७. महाभाष्यदीपिका of भर्तृहरि, Ed.K.V. Limaye, BORI, Series No.8, Poona, 1970

१८. वाक्यपदीय of भर्तृहरि, Ed. K.V.Abhyankar & V.P.Limaye, Poona, 1965

१९. महाभाष्य of पतञ्जलि, with कैयट's प्रदीप and नागेश उद्योत, Ed.B.B.Joshi, (Fifth Edn.), Bombay, 1951

# महाभाष्ये लौकिकन्यायाः

**–नारायणदाशः**

**प्रस्तावना–**

महर्षेः पतञ्जलेर्नाम तात्कालिकेषु विद्वत्सु अतिप्रसिद्धमासीत् यः खलु स्वजन्मना गोनार्द-ग्रामभुवं व्यभूषयत्। अयं ग्रामः कश्मीरे वा उत्तरप्रदेशे वेति विदुषां विप्रतिपत्तिः वर्तते। तस्य पितुर्नाम न ज्ञायते परन्तु माता गोणिका इति ज्ञायते। वैयाकरणाग्रेसराणां महामुनीनां पाणिनीनां प्रसिद्धव्याकरणसूत्रग्रन्थस्य अष्टाध्यायीत्यस्य चितानां सूत्राणामुपरि पतञ्जलिना महाभाष्यं रचितम्। पुष्यमित्रस्य नामग्रहणात् ई.पू. १४०-१२० वर्षेषु पतञ्जलेः स्थितिः प्रमाणिता। प्रायः १२०० पाणिनीयसूत्राणामुपरि महर्षेः कात्यायनस्य वार्तिकानि सन्ति। महर्षिः पतञ्जलिः तेषु अपरचतुश्शतप्रायसूत्रेषु च स्वव्याख्यानं रोचकशैल्या विस्तारितवान्।

महाभाष्यस्य भाषा सरला सुबोधा च वर्तते। प्रसङ्गतः विविधशास्त्राणामालोचनवशात् मुनेः बहुपाठित्वं प्रसिद्ध्यति। सहजा सरला प्रवाहमयी संवादमयी प्रश्नोत्तरमयी लौकिकी लोकोक्तिबहुला तस्य रचनाशैली यं कमपि प्रभावयितुमलं वर्तते। गम्भीरं नीरसं शुष्कं व्याकरणशास्त्रमपि स लौकिकरञ्जनेन रञ्जयित्वा लौकिकन्याय-दृष्टान्त-सूक्ति-उपमान-विनोदैर्वा संस्कृत्य स्वशास्त्रीयराद्धान्तान् प्रतिष्ठापितवान्। अतः तस्य ग्रन्थो स्वाभाविकतया लौकिकजनानां महदुपकाराय अभवत्। ग्रन्थारम्भे एव तेनोक्तं वर्तते- केषां शब्दानां लौकिकानां वैदिकानाञ्च। अतः लौकिकानामेव प्राथम्यं तस्य ग्रन्थे सर्वत्र दृश्यते। महाभाष्ये बहूनां लौकिकन्यायानां भव्यसमावेशो दृश्यते। अत्र केषाञ्चन न्यायानां विवरणं प्रदास्यते। केचन मुख्यन्यायाः सन्ति–

१. यत्कूटस्थेष्वविचालेषु न्यायः

२. कूपखानकवद् न्यायः

३. मण्डूकप्लुत्या न्यायः

४. प्रासादवासिन्यायः

५. कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः

६. चित्रगुरानीयतामिति न्यायः

७. भुक्तवन्तं ब्रूयात् मा भुक्था इति

८. नष्टाश्वदग्धरथवत्

९. देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति

१०. अभक्ष्यो ग्राम्यकुक्कुटोऽभक्ष्यो ग्राम्यशूकरः

११. बृद्धकुमारीवाक्यन्यायः

१२. सम्बन्धिशब्दा मातरि वर्तितव्यम्

१३. न हि भुक्तवानपि पुनर्भुक्ते कृतश्मश्रूश्च पुनः श्मश्रूणि कारयति

१४. ब्राह्मणो न हन्तव्यः सुरा न पेयेति

१५. गोमयाद् वृश्चिको जायते गोलोमविलोमेभ्यो दूर्वा जायते

१६. अभिरूपाय कन्यादेया

१७. प्रदीपवत्

१८. काकोलूकीयः

१९. उत्तप्यमानं सुवर्णं सुवर्णकारमुत्तपति

२०. आकाशं दृष्ट्वा ज्योतिरत्रेति गम्यते, ज्योतिर्निमित्त हि आकाशः

२१. आरण्यको न्यायः

२२. अविरकिकन्यायः

२३. तक्रकौण्डन्यन्यायः

२४. नटाङ्गनान्यायः

२५. स्थितौ तिलतण्डुलन्याय क्षीरनीरन्यायेन

२६. न हि भिक्षुका सन्तीति स्थाल्यो नाधिश्रीयन्ते, न च मृगाः सन्तीति यवा नोप्यन्ते

अत्र केषाञ्चन एव विवरणं प्रस्तुत-

**यत्कूटस्थेष्वविचालेषु न्यायः**

यत्कुटस्थेष्वविचालेषु न्यायः सिद्धे शब्दार्थसम्बन्धे इति वार्तिकसन्दर्भे लिखितोऽस्ति। अत्र सिद्धशब्दः। तस्य नित्यत्वं साधयितुं शब्दार्थयोः सम्बन्धस्य नित्यत्वस्य तुलना क्रियते। अयं न्यायः महान् व्यापकोऽस्ति। शब्दो नित्यः इति वैयाकरणानां सिद्धान्तो वर्तते, परं प्रक्रियादशायां शब्दस्य काल्पनिकमनित्यत्वमपि स्वीक्रियते। यथा अदर्शनं लोपः अनेन सूत्रेण प्रक्रियां निर्वोढुं लोपः स्वीक्रियते। इको यणचि-अनेन सूत्रेण

इकारस्य स्थाने यकारः क्रियते। एवमन्यत्रापि लोपप्रत्ययागमादेशादयः सर्वा अपि प्रक्रिया अनित्या स्वीक्रियन्ते। परं सिद्धान्तस्तु नित्यत्वमेव व्याहरति। शब्दस्य नित्यत्वविषये सर्वेषां वैयाकरणानाम् ऐकमत्यमस्ति। मन्ये तन्मतं पोषयितुं पतञ्जलिना सिद्धे शब्दार्थसम्बन्धे इत्यस्मिन् प्रकरणे उद्धृतः स्वीकृतश्च। यथा शब्दस्य प्रक्रियायाश्च भेदद्वयं विहितं तथैव अत्रापि सिद्धशब्दः। सिद्धे शब्दार्थसम्बन्धे - सिद्धे शब्दे अर्थे सम्बद्धे चेति। अथ सिद्धशब्दस्य कः पदार्थः? नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते यत्कूटस्थेष्वविचालेषु भावेषु वर्तते। तद्यथा - सिद्धा द्यौः, सिद्धा पृथिवी, सिद्धमाकाशमिति। सिद्धमन्नं, सिद्धः सूपः इत्याद्युदाहरणेन अनित्यत्वमपि लक्ष्ययति। नायं न्यायः लौकिकः। अयं तु वैदिकः न्यायः अस्ति। अनित्यत्वपक्षे तु वयं तथैव तर्कयामः यथा भगवता रामकृष्णादिना शरीरं धारयित्वा लोके जायमानं सुखदुःखादिकम् अनुभूतं तथैव अनित्यत्वमस्ति। अस्मिन् न्याये शब्दस्यानित्यत्वसाधनाय कूटस्थ- अविचालि-शब्दयोर्ग्रहणं कृतम्। कूटशब्दस्यार्थः - अयोघनः। विचालशब्दस्यार्थः स्थानान्तरसंक्रमो वर्तते। द्वे एव उदाहरणे प्रबलतमे वर्तते। किञ्च शब्दार्थयोर्नित्यसम्बन्धः। अयमर्थोऽपि अस्मिन् सन्दर्भे लभ्यते। ईश्वरः सर्वव्यापकः तथैव शब्दोऽपि सर्वव्यापकः सर्वत्राकाशत्वात्। अन्यैः शास्त्रकारैरपि शब्दार्थयोर्तुलना पार्वतीपरमेश्वराभ्यां सह स्वीकृता। स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते। यथा -

**द्वाविमौ पुरुषो लोके क्षरश्चाक्षर एव च।**
**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते॥**

**ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।**
**सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥**

यथा रघुवंशमहाकाव्यस्य मङ्गलाचरणम् -

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥**

**परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥**

तथैव ईश्वरो नित्यः कूटस्थोऽविचाली चास्ति। आकीटात् कुञ्जरपर्यन्तं सर्वेषां प्राणिनामात्मा नित्यः, ईश्वरस्यैव भेदाः सन्ति। तथैवाशयं गृहीत्वा लीके सूक्तयः सन्ति। तासु सूक्तिष्वयं संसारः ईश्वरस्यैव भेदप्रभेदभूतो वर्तते सृष्टिनियामकः एक एवास्ति तथैव शब्दोऽपि वाक्यपदीये-

**उत्पादविनाशशालित्वाद् ध्वनेर्नाशो भवति न तु शब्दस्य।**
**ईश्वरस्य नित्यत्वं शास्त्रसिद्धमस्ति लोकसिद्धञ्च।**

एवं शब्दस्यापि कैश्चित् श्लोकैः सह तुलना कृता। इदमपि वक्तुं शक्यते–

**अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रियाजगतो यतः॥**

एकस्येश्वरस्य भेदप्रभेदोऽपि लौकिकत्वं साधयति। तथैव शब्दोऽपि शास्त्रप्रक्रियां निर्वाहयति। शास्त्रस्य व्यवहारो लोके प्रतिपदं दृश्यते। यथा अयं व्याकरणस्य मूलभूतः प्रधानभूतश्च न्यायोऽस्ति तथैव ईश्वरो जगतः–

**एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्।**
**अपृथम्त्वेऽपि शक्तिभ्यः पृथक्त्वेनैव वर्तते॥**

**उत्पत्तौ च स्थितौ चापि विनाशे चापि तद्वताम्।**
**निमित्तं कालमेवाहुर्विभक्तेर्नात्मना स्थितम्॥**

### कूपखानकवद् न्यायः

कूपखानकः खनित्रेण कूपं खनति। तस्य खनित्रम् अङ्गप्रत्यङ्गञ्च कर्दमाक्तं भवति। यदा स जलं विन्दति, तदा तेन जलेन पुनः खनित्रम् अङ्गप्रत्यङ्गञ्च प्रक्षालयति। तथैव साधुशब्दज्ञानेन असाधुशब्दानां परिष्कारः भवति। - यथा बालानामुपलालना। असाधुप्रयोगोपरान्तः साधुष्वनुमानो न दोषाय भवति। लोके शिष्यो गुरुसमीपे गच्छति। पूर्वं तु तस्य समीपे ज्ञानस्याभावो भवति किन्तु ज्ञानप्राप्त्यर्थं सेवादिकं कृत्वा स्वकार्यं साधयति। शनैः शनैः कालेन आचार्यतः ज्ञानं प्राप्य जीवनं निर्वोढुं योग्यो भवति तथैव परिजनाः प्रथमे अशुद्धोच्चारणमेव अपभ्रंशानां प्रयोगं कृत्वा कालक्रमेणाभ्यासं कृत्वा कूपखानकः इव साधुशब्दान् प्रयुंक्ते। यथा हितोपदेशे सुहृद्भेदे–

**यात्यधोऽधः व्रजत्युच्चैर्नरः स्वैरेव कर्मभिः।**
**कूपस्य खनिता यद्वत् प्राकारस्यैव कारकः।।**

**यथा खनन् खनित्रेण नरो वार्यधिगच्छति।**
**तथा गुरुगतां विद्यां सुश्रूषुरधिगच्छति।।**

**करत करत अभ्यास के जडमति होत सुजान।**
**सररी आवत जातते सिलपर परत निशान।।**

### मण्डूकप्लुत्या न्यायः

इको गुणवृद्धिः इति सूत्रभाष्ये पदकारः मण्डूकप्लुत्या इति न्यायं स्वीचकार। महाभाष्ये उक्तं - संज्ञया विधाने नियमः। संज्ञया ये विधीयन्ते तेषु नियमः। किं वक्तव्यमेतत्। न हि कथमनुच्यमानं गंस्यते। गुणवृद्धिग्रहणसामर्थ्यात्। कथं पुनरन्तरेण गुणवृद्धिग्रहणमिको गुणवृद्धी स्याताम्। प्रकृतगुणवृद्धिग्रहणमनुवर्तते। क्व प्रकृतम्।

वृद्धिरादैजदेङ्गुण इति। यदि तदनुवर्तते अदेङ्गुणो वृद्धिश्च इत्यदेङां वृद्धिसंज्ञाऽपि प्राप्नोति। सम्बन्धमनुवर्तिष्यते। वृद्धिरादैच्। अदेङ्गुणः इति वृद्धिरादैच्। ततः गुणवृद्धी इति गुणवृद्धिग्रहणमनुवर्तते। आदैजदेङग्रहणं निवृत्तम्- अथवा मण्डूकगतयोऽधिकाराः। यथा मण्डूकाः उत्प्लुत्योत्प्लुत्य गच्छन्ति तदवदधिकाराः।

**प्रासादवासिन्यायः**

मुखनासिकावचनोऽनुनासिक इति सूत्रव्याख्यावसरे पदकारेण प्रासादवासिन्याय उररीकृतः। अस्य सूत्रार्थः सिद्धान्तकौमुद्यां यथा-मुखसहितनासिकयोच्चार्यमाणो वर्णोऽननुनासिकसंज्ञः स्यात्। तत्रा काशिकावृत्तिः यथा-मुखसहितनासिका मुखनासिका, तया य उच्चार्यते वर्णः सोऽनुनासिकसंज्ञो भवति। आङो अनुनसिकश्छम्दसि, अभ्र आ अपः, गभीर आ उग्र पुत्रे। चन्द्र आ इन्दः। मुखग्रहणं किम्। अनुस्वारस्यैव हि स्यात्। नासिकाग्रहणं किम्- कचटतपानां माभूत्। अनुस्वारस्यैव हि स्यात्। नासिकाग्रहणं किम्। कचटतपानां माभूत्। अनुनासिकप्रदेशाः-आङो अनुनासिकश्छन्दसि इत्येव मादयः। तत्रोक्तं महाभाष्यकारेणमुखग्रहणं शक्यमकर्तुम्। केनेदानीमुभयवचनानां सिद्धिः भविष्यति प्रासादवासिन्यायेन। तद्यथा-केचित्प्रासादवासिनः केचिद्भूमिवासिनः केचिदुभयवासिनः। तत्रा ये प्रासादवासिनो गृह्यन्ते ते प्रासादवासिग्रहणेन। ये भूमिवासिनो गृह्यन्ते ते भूमिवासिग्रहणेन। ये तूभयवासिनो गृह्यन्ते ते भूमिवासाग्रहणेन। ये तूभयवासिनो गृह्यन्ते ते प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च। एवमिहापि। केचिन्मुखवचनाः। केचिन्नासिका-वचनाः। केचिदुभयवचनाः। तत्रा ये मुखवचना गृह्यन्ते ते मुखग्रहणेन। ये नासिकावचना गृह्यन्ते ते नासिकाग्रहणेन। ये उभयवचना गृह्यन्ते ते मुखग्रहणेन नासिकाग्रहणेन च।

सूत्रे मुखस्य नासिकायाश्च उभयग्रहणार्थं पदकारः प्रासादवासिन्यायं स्वीचकार। यदि मुखं न गृह्यते तदपि न दोषः। प्रासादवासिन्यायस्यार्थस्तु स्वयमेव स्फुटीभवति। एवमेव लोकेऽपि जलजन्तूनाम् अम्भांसि, दुर्गनिवासिनां दुर्गस्योपरि एवं हिंसकजन्तूनां स्वस्थाने विशेषता दृश्यते एवं नृपतीनां विशेषबलं वरीवर्ति। उक्तमपि-

**अम्भसि जलजन्तूनां दुर्गे दुर्गनिवासिनाम्।**
**स्वभूमिः स्वपदवीनां राज्ञो मन्त्री परं बलम्।।**

हिन्दीभाषायामपि सूक्तिरेका परिलक्ष्यते- लोके ये जनाः यत्र निवसन्ति तं तस्य स्थानस्यैव वासिनो यथा ये मथुरायां निवसन्ति ते मथुरावसिनः ये गोकुले निवसन्ति ते गोकुलवासिनः ये तूभयस्थाने निवसन्ति ते तूभयवासिनो भवन्ति। यथा केशवं गङ्गायां गङ्गादासः कथयन्ति एवं यमुनायां यमुनादासः इति किन्तु केशवस्तु एक एव उभयस्थले भिन्नभिन्ननामाधारेण कार्यं करोति तथेव महाभाष्यकारस्य प्रासादवासिन्यायस्य स्वीकारे न कोऽपि दोषः। ये मुखवचना गृह्यन्ते ते मुखग्रहणेन। ये नासिकावचना गृह्यन्ते ते

नासिकाग्रहणेन। ये तूभयवचना गृह्यन्ते ते मुखग्रहणेन नासिकाग्रहणेन च। प्रयोगाणामाधारेणैव ग्रन्थकारो न्यायं स्वीकृत्यात्र कार्यं सम्पादयति।

**कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः**

बहुगणवतुडतिसङ्ख्याया इति सूत्रभाष्ये कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः इति लौकिकन्यायोऽङ्गीकृतः। एकादिकायाः सङ्ख्यायाः संख्याप्रदेशेषु संख्यत्वे संप्रत्ययो यथा स्यात्। अक्रियमाणे हि संख्याग्रहणे एकादिकायाः संख्यायाः संख्येत्येषु सम्प्रत्ययो न स्यात्। किं कारणम् कृत्रिमत्वात्। बह्वादीनां कृत्रिमा संज्ञा। कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति।

शास्त्रशब्देन ममायमभिप्रायो यत् सर्वे शास्त्राणि निजनिजपारिभाषिकान् शब्दान् स्वीकुर्वन्ति। यथा गुणशब्देन वेदान्ते सत्त्वरजस्तमाः ये गुणाः, न्यायशास्त्रे रूपरसगन्धादयः विंशतिगुणाः, साहित्ये माधुर्योजप्रसादादयः त्रयो गुणाः। लोके गुणशब्दः चातुर्यवाचकः, दयादाक्षिण्यादिवाचकः एवं व्याकरणशास्त्रेऽपि पाणिनिना सर्वा संज्ञा कृत्रिमाः कल्पिताः सन्ति। यथा- नदी, गुणः, वृद्धिः, टि, घु, घि इत्यादयः। तासां संज्ञानां कश्चित् सङ्केतः अस्ति। यः सङ्केतः व्याकरणशास्त्रं निबध्नाति। तदर्थमेव कृत्रिमशब्दः।

व्याकरणे लक्ष्याः शब्दाः लक्षणानि सूत्राणि। लक्षणानां सिद्ध्यर्थं कृत्रिमाणां संज्ञानामेव माहात्म्यमस्ति। लोके तु द्वयमेव दृश्यते कृत्रिमम् अकृत्रिमम् इति। अपि ये मिथ्यावादिनो भवन्ति ते सर्वमपि कृत्रिमं दर्शयन्ति। परं तेषां कृत्रिमत्वं लोकानां हानिकारकं भवति। अथवा कृत्रिमाकृत्रिमशब्दयोः प्रयोगः सत्यमिथ्याशब्देनापि वेदान्तशास्त्रे दृश्यते। तत्रा मिथ्या - कृत्रिमा, अकृत्रिमं सत्यम्। तत्रा तु यद्यपि व्याकरणतुल्यं कृत्रिमत्वं नास्ति तथापि जगत् कृत्रिममिव भाषते। एतद्वक्तुं तु कठिनमस्ति यल्लोके सर्वमपि कार्यं कृत्रिमं भवति।

अयं व्याकरणशास्त्रस्य प्रधानभूतो न्यायोऽस्ति। अस्य प्रयोगः केवलं संज्ञानां कृते वर्तते। जना लोके जानन्ति यदीश्वरो अकृत्रिमो जगच्च कृत्रिमम्। स्त्रिपुत्रादयोऽपि कृत्रिमाः तथापि अकृत्रिमम् ईश्वरं विहाय कृत्रिमे संसारे कार्यं कुर्वन्ति तस्य प्राप्त्यर्थं यतन्ते। अस्य न्यायस्य भावात्मकः प्रभावो बहुषु श्लोकेषु दृश्यते।

जगति कृत्रिमशब्दः किञ्चित् अन्यार्थवाचकः मिथ्यात्ववाचकः शास्त्रे परिभाषार्थ-वाचकः एवं मनसिकृत्य मया तुलना क्रियते। प्रायः सर्वेष्वपि शास्त्रेषु ईश्वरमेव अकृत्रिमत्वेन वास्तविकत्वेन स्वीकृतमस्ति। यथा लोके विशेषेश्वरीयकार्याणि विधानादिकरूपेण कुर्वन्ति तथैव व्याकरणशास्त्रेऽपि संख्यादिसंज्ञाः विशेषरूपेण स्वीकृताः सन्ति। मन्मते लोके एवं दृश्यते प्रायः जनाः आडम्बरेण अथवा चाकचिक्येन अधिकमुह्यन्ति ते वास्तविकतां न पश्यन्ति। केचन चात्र परिकरश्लोकाः-

**वयसि गते कः कामविकारः शुष्के नीरे कः कासारः।**
**नष्टे द्रव्ये कः परवारः ज्ञाते तत्त्वे कः संसारः॥**

**सुमसुकुमारं शोभितमारं रतिसुखसारं युवतिशरीरम्।**
**गतिजीवितमतिघोरविकारं दृष्ट्वा गच्छसि दूरं दूरम्॥**

**यमकिंकरकरमूले शूले पदतमियति हि फाले फाले।**
**दहति तनुं प्रतिकूले काले कं रमयसि तत्काले बाले॥**

**नरवाहनगजतुरगारुढा नारीसुतपोषणगुणगूढाः।**
**नानारञ्जकविधाप्रोढा नागरिकाः किं यतयो मूढाः।।**

### चित्रगुरानीयतामिति न्यायः

सर्वादीनि सर्वनामानि इति सूत्रव्याख्यायां चित्रगुरानीयतामिति न्याय उट्टंकितः। अत्र महाभाष्यं यथा– सर्वादीनि कोऽयं समासः। बहुव्रीहिरित्याह, कोऽस्य विग्रहः। सर्वशब्द आदि येषां तानि सर्वनामानीति। सर्वशब्दस्य सर्वनामसंज्ञा न प्राप्नोति। किं कारणम् अन्यपदार्थत्वाद् बहुव्रीहेः। बहुव्रीहिरयमन्यपदाथी वर्तते। तेन यदन्यत् सर्वशब्दात् तस्य सर्वनामसंज्ञा प्राप्नोति।

तद्‌यथा लोके चित्रगुरानीयताम् इत्युक्ते यस्य ताः गावो भवन्ति स एवानीयते न गावः। नैष दोषः भवति हि बहुव्रीहौ तद्‌गुणसंविज्ञानमपि तद्‌यथा चित्रवाससमान्यः लोहितोष्णीषा ऋत्विजः प्रचरन्तीति तद्‌गुण आनीयते तद्‌गगुणाश्च प्रवरन्तीति। चित्रगुसन्दर्भे मन्ये भाष्यकारो लक्ष्यार्थमपि स्वीकरोति स्म। बहुषूदाहरणेषु श्लोकेषु च वाच्यार्थं विहाय लक्ष्यार्थेन कार्यं निर्वाहयन्ति पण्डिताः।

मञ्चस्थजनानामित्युक्ते मञ्चस्थितजनानां बोधो जायते। गौर्वाहीकं पाठय इत्युच्चारणे यस्य गो सदृशानि लक्षणानि सन्ति तं पाठय न तु गाः। अन्यत्रापि श्लोकेषु यथा–

**कचस्त्रस्यति वदनं वदनात् कुचमण्डलं त्रसति।**
**मध्याद् विभेति नयनं नयनादधरः समुद्विजति।।**

**सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।**
**शूराश्च कृतविद्यश्च यश्च जानाति सेवितुम्।।**

### भुक्तवन्तं ब्रूयात् मा भुक्था इति न्यायः

स्थानेऽन्तरतमे इति व्याख्यावसरे महाभाष्ये भुक्तवन्तं ब्रूयात् मा भूक्था न्यायं स्वीचकार। निवृतप्रतिपत्तौ निवृत्तिर्न सिध्यति। सर्वे सर्वत्र प्राप्नुवन्ति किं तर्हि उच्यते निवृत्तिर्न सिद्धयतीति। न साधीयो निर्वृत्तिः सिद्धा भवति। न ब्रूमो निर्वृत्तिर्न सिद्धयतीति। किं तर्हि इष्टाव्यवस्थान प्रकल्पते। न सर्वे सर्वत्रेष्यन्ते। इदम् इदानीं किमर्थ स्यात्।

अनर्थकं च। अनर्थकमेतत् स्यात्। यो हि भुक्तवन्तं ब्रूयात् मा भुक्था इति किं ते न कृतं स्यात्। उक्तं वा। किमुक्तम्। सिद्धं तु षष्ठ्यधिकारे वचनादिति। षष्ठ्यधिकारे अयं योगः कर्तव्यः, स्थाने अन्तरतमः षष्ठीनिर्दिष्टस्येति।

अस्य न्यायस्यायमर्थः यदि कश्चिज्जनः पूर्वभोजनं करोति तदनन्तरं कश्चिज्जनः तं वारयति तस्य निवारणं व्यर्थम् भवति। न्यायस्तु स्थानेन्तरतमः सूत्रे सङ्गृहीतोऽस्ति। लोकेऽपि यदि कश्चित् जनः किमपि कुकर्म कुर्यात् तदनन्तरं तस्य निवारणं व्यर्थं भवति। अत्र भाष्यकारस्यायमाशयः यदि किमपि कर्तव्यं भवति तस्य विषये पूर्वं चिन्तनमावश्यकं भवति तस्य पितरौ तं पूर्वमेव निवारयति तदेव शिक्षाया सरणी वर्तते। यदि कश्चिदित्थं चिन्तयति सत्यापराधे वयं झटिति अपाकुर्म इति कदापि सम्भवितुं नैव शक्यते। एवंविधाः सूक्तयः लोके दृश्यन्ते। तासां सूक्तीनां भावः प्रायः पूर्णतया न्यायेन संगच्छते।

यथा भवने वह्निव्याप्ते सति वयं कृत्वा हुतभुजं शमयितुं न प्रभवामस्तथैवायं न्यायोऽस्मानुपदिशति। लोके प्रायः सर्वेऽपि समीहन्ते यत् किमपि कर्म सुविचार्य कर्तव्यम्। इयमाशयं गृहीत्वा बहवः कवयः विभिन्नासु भाषासु अकवयन्।

विना किञ्चत् प्रकारान्तरेण यदि वयं विचारयामः तदा यत् यस्य कृते आवश्यकं तदेव तस्मै दातव्यम्। यदि धनदानमपि कर्तव्यं स्यात् तदा दरिद्राणां कृते कल्याणाय भवति न तु धनिकानाम्।

**दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्।**
**व्याधिस्तस्यौषधं पथ्यं निरुजस्य किमौषधम्।।**

**वृथा वृष्टि समुद्रेषु वृथा तृप्तस्य भोजनम्।**
**वृथादानं समर्थस्य वृथा दीपो दिवापि च।।** सुभाषितावली।।

**नष्टाश्वदग्धरथवत् न्यायः**

स्थानेऽन्तरतमः इति सूत्रे नष्टाश्वदग्धरथवत् न्यायोऽपि स्वीकृतः। न वा ॥वर्णस्य स्थाने रपरप्रसंगात् अवर्णस्यान्तर्यम्। न वा एष दोषः। किं कारणम् ॥वर्णस्य स्थानेऽपरप्रसंगात् उ-स्थाने उण् प्रसज्यमान एव रपरो भवतीत्युच्यते। तत्रा ॥वर्णस्यान्तर्यतो रेफवतो रेफवानाकार एवान्तरतमो भवति। सर्वादेशप्रसंगत्वेन कालत्वात्। सर्वादेशस्तु गुणवृद्धिसंज्ञक-॥ वर्णस्य प्राप्नोति किं कारणम् अनेकाल्त्वात्। अनेकालशितसर्वस्येति। न वानेकालत्वस्य तदाश्रयत्वाद॥ वर्णदेशस्याविधानः। न वा एष दोषः। किं कारणम् अनेकालत्वस्य तदाश्रयत्वात् यदायमुः स्थाने अण् तदायमनेकालः। अनेकाल्त्वस्य तदाश्रयत्वात्॥ वर्णदेशस्य विधातो न भविष्यति। अथवा अनान्तर्यमेवैतयोरान्तर्यम्। एकस्याप्यन्तरतमा प्रकृतिर्नास्ति। अपरस्यान्तरतम आदेशो नास्ति। एतदेवैतयोरान्तर्यम् -

**सम्प्रयोगो वा नष्टाश्वदग्घरथवत्।**

अथवा नष्टाश्वदग्धरथवत् सम्प्रयोगो भविष्यति। तयथा - तवाश्वो नष्टो ममापि रथो दग्धो। उभौ सम्प्रयुज्यावहा इति। एवमिहापि तवाप्यन्तरतमा प्रकृतिर्नास्ति ममाप्यन्तरतमादेशो नास्ति। अस्तु नौ सम्प्रयोग इति।

तुलना -

**नष्टाश्वदग्धरथवन्नयायं चाश्रत्यभूमिपम्।**
**प्राह मानुषवित्ताद्यं दैववित्त समन्वितः।।**

अस्य न्यायस्यार्थस्तु द्वौ जनौ व्यापारार्थदेशान्तरमगमताम्। मार्गे एकस्य रथो दग्धो द्वितीयस्य वाजी विनष्टः। तदानीमेकेन अपरस्य रथं गृहीत्वा पुनः कार्यं साधितम्।

शास्त्रेऽपि ॥वर्णस्थाने गुणवृद्धिस्थले अन्तरतमप्रकृतित्वादान्तरतम आदेशत्वाच्च कार्यं साधितम्। लोके प्रायः यदि कस्यश्चित् पार्श्वे भूमिः, न भवेत् वृषभौ स्याताम् तदा असौ भूमिपतिना सह इमं न्यायमनुसरति तत्रा द्वयोः कार्यं सिध्यति।

**विपत्तिकाले स्वजना परस्परं सहायतां यान्ति हिताभिलाषिणः।**
**जलेषु नावा शकटं समुह्यते स्थले च नौस्तच्छकटेन नीयते॥**

किञ्चास्य न्यायस्य मया अयमपि अर्थे कल्पितः विपत्रकाले परस्यरं साहाय्यमवश्यं करणीयम्। यदि कश्चिदजनः एवं नाचरति तदा कष्टानुभवति। तस्य कृते अयमेव भावः सूकितमुखेन एवं लक्षयते।

विपत्तिकाले सज्जनाः परस्परं साहाय्यं आचरन्ति तेन हि तेषां सर्वदा मंगलं भवति। यथा नावाः सलिलेषु शकटं विभ्रति स्थले च नौ शकदेन नीयते। इयं सूकित महाभाष्यस्य न्यायेन पूर्णं संगच्छते।

अहं तु मन्ये न्यायापेक्षया सूकित अधिका भाववती दृश्यते।

हिन्दीभाषायामपि अस्याशयस्य लोकोक्तयः दृश्यन्ते। तेषामपि आशयः इमं न्यायं अनुसरति। अस्य न्यायस्य प्रभावः लोके बहुधा दृश्यते।

न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्रादुर्भावो भवति इति न्यायः

अचः परस्मिन् पूर्वविधौ इति सूत्रव्याख्यावसरे पदकारेण न हि देवदत्तस्य हन्तरि हते देवदत्रस्य प्रादुर्भवो भवति इति न्यायः स्वीकृतः।

असिद्धवचनात् सिद्धमिति चेन्नानेयस्यासिद्धवचनादन्यस्य भावः। असिद्धवचनात् सिद्धमिति चेत् तत्रा किं कारणम् नान्यस्यासिद्धवचनादन्यस्यभावः। न हयन्यस्या-सिद्धत्वादन्यस्य प्रादुर्भावो भवति। तद्वथा न हि देवदत्तस्य हन्तरि हते देवदत्तस्य प्राहुर्भावो भवति। तस्मात् स्थानिवद्वचनमसिद्धत्वं च। तस्मात् स्थानिवदभावो

वकतव्य:असिद्धत्वं च। पटव्या मृदव्येति स्थानिवदभाव:। वायवोरध्वयर्वोरित्यत्रासिद्धत्वम्।

अयं लौकिको न्याय: भाष्यकारेण सूत्रसन्दर्भे स्वीकृत:। केचिद श्लोकानेन न्यायेनांशतो अथवा अर्थत: संगच्छन्ते। न एकस्य नाशो अपरस्य कृते कदाचिदेतादृशं पश्चात्रापं मनसि आगच्छेत् येनाअसौ स्वजीवने अशान्त आत्मकृत्यं नित्ययेत। लौकिकन्यायशास्र्रार्थकला इति ग्रन्थेअप्यस्य न्यायस्य विषये –

३. देवदत्तस्य हन्तरि हते देवदत्तस्य नोज्जीवनम्।अतएव रघुनाथ:नन्वज्ञानबाधकेज्ञाने विनष्टे पुनरज्ञानोदयेन बन्धप्रसंग इति शङ्कायां देवदत्रहन्तृहतन्यायावतार:। यथा देवदत्रस्य हन्तरि हतेअपि न देवदत्रस्य जीवनं तथा प्रकृतेऽपि।

**लौकिकन्यायशास्त्रार्थकला एवंकूटशास्त्रार्थकला पृ. २३**

व्याकरणस्यायं न्यापोअस्मानुपदिशति यद अहिंसा शान्तिभूतदयादय: मानवीयगुणा: कदापि नैव हातव्या:। एकस्य मृते सतिअपरस्य हननेन प्रतिकारो नैव भारतीयसंस्कृति: अपि तु तस्य पश्चात्राप एव श्रेयान् पंथा अस्ति। अस्माकं वौद्ध जैनधर्मेष्वपि एतादृशीसरणिरक्षिलक्षयी भवति। हन्तारं न हन्यात् यदि वयं चिन्तयाम: यत् महर्षि: पतञ्जलि:बौद्धधर्म प्रभावित आसीत् इत्यपि वक्तुं न शक्यते यतो हि स तु वैदिक: परं शस्र्रं सम्पादयितुं तेनेयमुक्ति: स्वीकृता।

अद्यापि विश्वस्मिन् विश्वे प्राय:येऽपि महामनीषिणस्तपस्विनो दूरदर्शिन: समभूवन् तेऽपि प्रतिकारं न कामयन्ते। इत्येवमाशयं हृदि निधाय भाष्यकार: शब्दासिद्धिप्रकरणे अच: परस्मिन् पूर्वविधौ सूत्रमुखेन लौकिकं सकलजनहितकारकं न्यायं व्याजहार। अयं न्यायो लौकिक – सूक्तिभि: सह पूर्ण सामञ्जस्यमाकलयति।

**बृद्वकुमारीवास्य न्याय:**

'न मुने' इति सूत्रभाष्ये बृद्वकुमारी वाक्य न्याय उररीकृत:। तथा वाक्यानपि द्विगतानि दृश्यन्ते श्वेतो धावति अलम्बुसानां यातेति। अथावा वृद्वकुमारीवाकयवदिदं द्रष्टव्यम्। तद्यथा – वृद्वकुमारीन्द्रेणेकता वरं वृणीष्वेति सावरमवृणीत् पुत्रा मे बहुक्षीरघृतमोदनं कांस्यपात्र्यां मुञ्जोरनिति न च तावदस्या: पति: भवति कुत: पुत्रा: कुतो गाव: कुतो धान्यम्। तत्रा एकेन वाकयेन पति: पुत्रा: गावो धान्यामिति सर्व संगृहीतं भवति। एवमिहापि नेअसिद्वत्व प्रतिषेधं ब्रुवता नाभावोअपि सङ्गहीतो भवति।

अयं न्याय: कथानकोपरि आधारितोऽस्ति। न्यायस्यार्थ: भाष्ये स्फुटोऽस्ति कापि बृद्वकुमारी वरयाचनाय भगवता इन्द्रेणादिष्टा। सा किम् याचेत् इति सन्देहदोलायमाना बहुविध वाकयमचिन्तयत्। वृद्वकुमारीं भगवान् इन्द्र: प्राह एकं वरं ब्रूहि। तस्या मनसि बहव: कामना आसन् ता: सर्वा पूरयितुंमेकेन वाकयेन सा सर्वमपि स्वाभिलषितं याचितवती। अनेन न्यायेन किं प्रतीयते इत्यस्ति सन्देह:। किं याचकस्य प्रतिभा पाटवं

अभवा मनोरथानां पराकाष्ठा नास्ति यः किमपि लभते तस्मादधिकं प्राप्तुं समीहते। अनेन न्यायेन व्याकरणे द्विविधा गतिः प्रदर्शिता तदर्थं मन्मतेअपि द्वैविध्यमेवास्ति लोके एतादृशो भावो दृश्यते।

मनोरथानां विषये तु बहवः सूक्तयः एवं च बुद्धिविषयेअपि अनेके श्लोकाः वर्तन्ते। परमत्र द्वयोः साम्यं ललंक्षयते मनोरथानां विषये तपश्चरन्तीं पार्वतीं लक्षीकृत्य अयं भावः स्फुटो भवति। व्याकरणेअपि श्वेतो धावति अलम्बुसानां याता इत्यादिकं वाकयमपि द्विगतं वर्तते तस्मादस्यापि द्विगतो भावः मन्मते प्रतिभाति नोचेत् अत्र वरस्य तात्पर्यं नास्ति। परञ्जलेः

यथाश्रुतं वेदविदां वरत्वयाजनोऽअयमुञ्चैपदलंघनोत्सुकः।

तपः किलेदं तदवाप्ति - साधनं मनोरथानामगतिर्न विद्यते।

मन्ये एकस्मिन् वरे बहवोअर्थाः भवन्ति इत्यपि आशयः स्यात्। परं यद्ययं न्यायः द्विधा विभज्यते तदानीं तेनैवार्थेनाअयं लोकोक्तिषु चरिताथी भवति अस्य भावसाम्यं बहवः सूक्तयः श्लोकाश्च विभ्रति।

**उपसंहृतिः**

व्याकरणशास्त्रं सर्वं शास्त्रजातमनुशास्ति। सम्प्रति लोके विविधेषु व्याकरणेषु विद्यमानेष्वपि पाणिनीयं त्रिमुनिव्याकरणमेव प्रधानत्वेन स्वीकुर्वन्ति विपश्चितः। तत्रा महाभाष्यं सूत्राणां संज्ञात्वं परिभाषात्वं विधित्वं नियमत्वमतिदेशत्वमधिकारत्वं च सप्रमाणं लौकिकन्यायानाश्रित्य स्फोटयति। सर्वत्रोदाहरणानि विषयस्यार्थप्रतिपादनाय भवन्ति। पतञ्जलिना न्यायसन्दर्भे लोकानां सामान्यजीवनस्यातीव सूक्ष्मदृशाध्ययनं कृतमासीत्। लोकव्यवहारञ्च स पूर्णतया वेत्ति स्म। तत्राापि ग्रामीणानां कृषकाणां निर्धनानाञ्चोदाहरणानि प्रभूतानि लक्ष्यन्ते। उदाहरणेषु प्राचीनभारतस्य वास्तविकं चित्रमपि नरीनृत्यति। यथा अनुशासनहेतवे सूत्राणि विद्यन्ते। तथैव सूत्राणाम् अर्थ परिपोषयितुं न्यायाः परिकल्पिताः। न्यायेषु शब्दाः अतीव सरसाः स्वल्पाश्च सन्ति। परं भावा विविधाः प्रभूताश्च भवन्ति। केचन न्यायानुसारिण्यो बह्व्यः सूक्तयः सन्ति।

सर्वैरपि शास्त्रकारैः निजनिजशास्त्रं साधयितुं न्यायाः स्वीकृताः सन्ति। परं भाष्यकारस्य न्यायाः प्रक्रियोपयोगिनः साधारणजनगम्या रम्याश्च वर्तन्ते। यथा प्रासादवासिन्यायः नष्टाश्वरथदग्धवद् न्यायाः काकतालीयः अजाकृपा.ीयन्यायः। एवञ्च अभक्ष्यो ग्राम्यकुक्कुटो भक्ष्यो ग्राम्यशूकरः, बृद्धकुमारीवाक्यन्यायः, न हि भुक्तवानपि पुनर्भुक्ते कृतश्मश्रूश्च पुनः श्मश्रूणि कारयति, ब्राह्मणो न हन्तव्यः सुरा न पेया, अभिरूपाय कन्यादेया, उत्तप्यमानं सुवणं सुवर्णकारमुत्तपति, तक्रकौण्डन्यन्यायः, नटाङ्गनान्यायः, तिलतण्डुलन्यायः, क्षीरनीरन्यायः, न हि भिक्षुका सन्तीति स्थाल्यो नाधिश्रीयन्ते, न च मृगाः सन्तीति यवा

नोप्यन्ते इत्यादयो नितरां मार्मिकाः न्यायाः सारल्येन एव लौकिकरञ्जनेन पाठकान् छात्रान् रञ्जयति। यत्र तत्रा लौकिकोदाहरणैः सर्वसाधारणबोधगम्यभाषया महाभाष्यकारः व्याकरणमिव कठिनातिकठिनं विषयं प्रस्तुवन् शास्त्रपाठनपरम्परायां क्रोशशिलामेव समस्थापयतदित्यलं बहुना।

**सन्दर्भाः**


१. श्रीमद्भगवद्गीता, १५.१६.

२. तत्रौव

३. वाक्य. ब्रह्म. पृ. ७।।

४. वाक्यब्रह्म. पृ. ७

५. तत्रौव, पृ.२

६. श्लोकः. ४८ हितोपदेशे

७. हितोपदेशे मित्रलाभः, श्लोक.८६

८. चर्पटपञ्जरिकास्तोत्रम्।

९. यतिराजस्तोत्रम्, श्लो. २५।।

१०. तत्रौव, श्लो. २४।

११. तत्रौव, श्लो. २६।

१२. कुमारसम्भवम् ५-६४। सन्दर्भग्रन्थसूची

# महाभाष्योक्त व्यवहारिक लौकिक न्यायानुशीलन

**–अभिजित् दीक्षित**

पोस्टडॉक्टोरल फैलो, विशिष्ट संस्कृत अध्ययन केन्द्र,
जवाहरलाल नेहरू विश्वविद्यालय, नवदेहली – ६७

(लौकिक तथा वैदिक शब्दराशि के प्रकृतिप्रत्ययादिविभाग प्रकल्पित कर शब्दशास्त्र भाषाव्यवहार का प्रमुख स्रोत है। शब्दों का साधुत्वासाधुत्व विवेक शास्त्रों में अभिधान-अनभिधान, विवक्षा-अविवक्षानुरूप लोकप्रयोगानुरूप ही आश्रित है। वस्तुतः वाग्योगविद् महाभाष्यकार व्याकरणशास्त्र के समस्त सिद्धान्तों का प्रतिपादन लोकन्यायाश्रित तथ्यों द्वारा सिद्ध करते हैं।

प्रस्तुत शोधपत्र में महाभाष्योक्त कतिपय व्यावहारिक नीतियों का विवेचन व्याख्यायित है, जिनमें मुख्यतः अनग्निशुष्कैध, कूपखानक, अन्यतरोपदेश, भक्ष्याभक्ष्य, गम्यागम्या, सामान्यविशेष (उत्सर्गापवाद), फलव्यतिरेक, व्यपदेशि, ज्येष्ठकनिष्ठपुत्र, तक्रकौण्डिन्य, नष्टाश्वदग्धरथ, एकदेशविकृत, छिन्नकर्णपुच्छश्वा, आमिश्री, गोयूथ, शालिकुल्या (कुल्याप्रणयन), गौणमुख्य, प्रतिनिधि (उपाध्यायशिष्य), धान्यपलाल (सतुषपलालधान्य), कृत्रिमाकृत्रिम, मत्स्यकण्टक इत्यादि न्यायों का लोकव्यवहार तथा शास्त्रानुप्रयोग निर्दिष्ट है।)

**कूटशब्द** - महाभाष्य, संस्कृतव्याकरण, लौकिकन्याय, व्यवहारिकन्याय, लोकन्याय।

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**
**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः।।**

'ओमित्येतदक्षरमिदं सर्वम्' 'ओमिति ब्रह्म' शब्दब्रह्म ही इस चराचर जगत् का मूलकारण है। निखिल शब्दराशिज्ञान से ब्रह्मज्ञानप्राप्ति सर्वविदित है। अतः भाषा को रस कहा गया है – 'पुरुषस्य वाग् रसः वाच ऋग् रसः' भुवनत्रय के ज्ञानतमिस्र को शब्दज्योति ही प्रकाशित करती है –

**इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**

लौकिक वैदिक समस्त शब्दराशि का ज्ञान व्याकरणशास्त्र द्वारा सम्भव है। अतः व्याकरणशास्त्रमहिमा स्वतः प्रथित है। यथा –

**'व्याकरणज्ञाने सर्ववेदपारायणजं पुण्यमिति,**
**सकलदर्शनार्थज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्त्वम् प्रौढत्वम्।**

'लोकन्याय' से अभिप्राय यह है - 'लोक एवं शास्त्र में किसी विशिष्ट प्रसङ्ग में प्रयुक्त होने वाला दृष्टान्त-वाक्य या लोकरूढ़ नीतिवाक्य'। नीयन्ते निर्धार्यन्ते प्रमाणैरर्थो येन स न्यायः। 'न्याय' लोकप्रचलित, उपयुक्त दृष्टान्त-वाक्य है- जो उस तथ्य को परिभाषित करता है तथा प्रस्तुत प्रसङ्ग का उपयुक्तबोध कराता है। 'न्याय' प्रसिद्धतथ्य अथवा लोककथाश्रित होते हैं। शब्दों का साधुत्वासाधुत्व-विवेक शास्त्रों में अभिधान-अनभिधान, विवक्षा-अविवक्षानुरूप लोकप्रयोगानुरूप ही आश्रित है। वस्तुतः वाग्योगविद् महाभाष्यकार व्याकरणशास्त्र के समस्त सिद्धान्तों का प्रतिपादन लोकन्यायाश्रित तथ्यों द्वारा सिद्ध करते हैं। शास्त्रोक्त व्यवहार लौकिकविवक्षाधीन ही परिलक्षित होता है। तीर्थदशी महर्षि पतञ्जलिकृत 'महाभाष्य' सर्वविध लौकिकन्याय तथा परिभाषाओं के सङ्केतों (न्याय ़ बीज) का भी आकर-ग्रन्थ है।–

**कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना।**
**सर्वेषां न्याबीजानां महाभाष्ये निबन्धने।।**

महर्षि पतञ्जलि शास्त्रापेक्षया व्यवहार को अधिक महत्त्व देते हैं, लोकव्यवहृत शब्दप्रयोग जो शास्त्रीयप्रक्रिया (सूत्रवार्तिकादि) द्वारा सिद्ध नहीं हो सकते, उनकी स्वीकृति इष्टि कहलाती है। अतः 'महाभाष्य' का अपर नाम इष्टि भी है।

महाभाष्योक्त कतिपय व्यावहारिक नीतियों का विवेचन निम्नानुसार है -

**अनग्निशुष्कैध-न्याय (आग के बिना सूखे ईधन का न्याय) -**

यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।

यह न्याय व्याकरणशास्त्र के गौण-प्रयोजन के प्रसङ्ग में प्रयुक्त है। लोक में अतिशुष्क काष्ठ-तृणादि हैं। अग्निसम्पर्क विना जलकर पक्वादि कार्य हेतु ऊर्जा या ताप उत्पन्न नहीं कर सकते हैं, ईन्धन का शुस्क्यादि सार्थक्य अग्निसम्पर्क के बिना महत्त्वहीन है- यही 'अनग्निशुष्कैध-न्याय' है। अतः अर्थावबोध विना अध्येता केवल पाठमात्र के लिये अध्ययन करता है तो अधिक लाभप्रद नहीं है, अतः व्याकरणाध्ययन आवश्यक है।

**कूपखानक-न्याय - (कुआँ खोदने वाले का न्याय) -**

'शब्दज्ञान' में अपशब्द-ज्ञान के सहायक होने की चर्चा के प्रसङ्ग में महाभाष्यकार पतञ्जलि ने इस न्याय का प्रयोग किया है। लोक में देखा जाता है कि कुआँ खोदते समय यद्यपि कूपखानक (कुआँ खोदने वाले)का शरीर धूल, मिट्टी, कीचड़ आदि से लिप्त हो जाता है, धूल-धूसरित हो जाता है, गन्दगी से भर जाता

है। किन्तु जब कुआँ खोदने के बाद उस कुएँ से पानी निकल आता है, तब उसी कुएँ के पानी से कुआँ खोदने वाले के शरीर में लगी मिट्टी आदि सब धुल जाती है, सभी गन्दगी समाप्त हो जाती है, उसका शरीर स्वच्छ-पवित्र हो जाता है और वह आनन्द का अनुभव करने लगता है –*"कूपखानकः कूपं खनन् यद्यपि मृदा पांशुभिश्चावकीर्णो भवति सोऽप्सु सञ्जातासु तत एव तं गुणमासादयति, येन स च दोषो निर्हण्यते भूयसा चाभ्युदयेन योगो भवति।"*

महाभाष्यकार ने कहा है कि यद्यपि अपशब्द के ज्ञान में 'अधर्म' होता है, किन्तु अपशब्दज्ञान-पूर्वक शब्दज्ञान से जो 'धर्म' उत्पन्न होता है, उसी धर्म से अपशब्दज्ञानजन्य अधर्म-रूप दोष समाप्त हो जाता है और अभ्युदय की प्राप्ति होती है। इस प्रकार 'अपशब्दज्ञान' शब्दज्ञान में सहायक ही है, हानिकारक नहीं – 'एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मः, तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन स च दोषो निर्घाणिष्यते भूयसा चाभ्युदयेन योगो भविष्यति'।

इस न्याय का उपयोग अन्य ग्रन्थ में भी पाया जाता है। अपने दर्शन-ग्रन्थ में रघुनाथ ने लिखा है'– 'यथा कूपखानके पतितं पङ्कादि कूपात्रिःसृतेनाम्भसा प्रक्षाल्यते तथा तत्तद्विग्रहावच्छिन्नेशभेदबुद्धिजो दोषस्तदुपासनाजन्यसुकृत- महिम्नोत्पन्नेनाद्वैतबोधेन समूलं निवर्त्यत इति ज्ञेयम्'।

अन्यतरोपदेश-न्याय (विरोधी स्वभाव वाली दो वस्तुओं या धर्मों में से किसी एक के कथन से दूसरे के विषय में ज्ञान अथवा निर्धारण हो जाने का न्याय) –

'शब्द' और 'अपशब्द' के उपदेशविधि के प्रसङ्ग में इस न्याय का प्रयोग हुआ है। जब विरोधी स्वभाव वाली दो वस्तुओं अथवा धर्मों में से अन्यतर (किसी एक) के उपदेश अर्थात् कथन से दूसरे के विषय में स्वतः ज्ञान या निर्धारण हो जाता है, तो वह 'अन्यतरोपदेश-न्याय' कहलाता है। यथा – भक्ष्यनियम से अभक्ष्य-प्रतिषेध हो जाता है या अभक्ष्य-प्रतिषेध से भक्ष्य-नियम हो जाता है। जब कहा जाता है कि 'गाँव का मुर्गा खाने योग्य नहीं होता है' (अभक्ष्य-प्रतिषेध), तो निश्चय हो जाता है कि 'गाँव से इतरवनादि का मुर्गा खाने योग्य होता है' (भक्ष्य नियम)। अतः 'गौ' इस साधुशब्दोपदेश से अपशब्द गावी, गोणी, गोता अथवा इन अपशब्दोपदेश से साधुशब्द 'गौ ' का ज्ञान हो जाता है।

इस न्याय को भक्ष्याभक्ष्य-न्याय (भक्ष्य से अभक्ष्य का या अभक्ष्य से भक्ष्य का ज्ञान होने का न्याय) तथा गम्यागम्या-न्याय (गम्या स्त्री यानी पत्नी से अगम्या यानी वेश्या आदि स्त्री का या अगम्या से गम्या स्त्री का ज्ञान) भी कहा जाता है।

किं शब्दोपदेशः कर्तव्यः, आहोस्विदपशाब्दोपदेशः, आहोस्विदुभयोपदेश इति? अन्यतरोपदेशेन कृतं स्यात्। तद्यथा, भक्ष्यनियमेनाऽभक्ष्यप्रतिषेधो गम्यते। 'पञ्च पञ्चनखा

भक्ष्याः' इत्युक्ते गम्यत एतदतोऽन्येऽभक्ष्या इति "अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः। तद्यथा- 'अभक्ष्यो ग्राम्यकुक्कुटः, अभक्ष्योग्राम्यसूकरः' इत्युक्ते गम्यत एतदारण्यो भक्ष्य इति। एवमिहापि यदि तावच्छब्दोपदेशः क्रियते, गौरित्येतस्मिन्नुपदिष्टे गम्यत एतद् गाव्यादयोऽपशब्दा इति। अथाप्यपशब्दोपदेशः क्रियते, गाव्यादिषूपदिष्टेषु गम्यत एतद् गौरित्येष शब्द इति।

– सामान्यविशेष-न्याय (सामान्य और विशेष वस्तु अथवा कथन का न्याय) -

प्रस्तुत न्याय शब्दोपदेशलघूपाय के प्रसङ्ग में प्रयुक्त हुआ है। जब किसी विषय में व्यवस्था की जाती है तो उसके लिए कुछ सामान्य (उत्सर्ग) तथा कुछ विशेष (अपवाद) नियम या लक्षण बनाये जाते हैं जिसमें विशेष का अधिक महत्त्व होने से सामान्य (उत्सर्ग) का विशेष (अपवाद) के द्वारा बाध होता है। जो सर्वसाधारण, सार्वत्रिक हो वह 'सामान्यनियम' है और जो तद्भिन्न विशिष्ट हो, वह 'विशेष' है। इसे 'उत्सर्गापवाद-न्याय' (उत्सर्ग = सामान्य और अपवाद = विशेष कथन न्याय) तथा 'गौणमुख्य-न्याय' (गौण = अप्रधान और मुख्य = प्रधान कथन न्याय) भी कहा जाता है।

शब्दोपदेश में लघूपायविधि क्या हो? तब महाभाष्यकार के अनुसार शब्दोपदेश 'सामान्यविशेष-न्याय' (उत्सर्गापवाद-न्याय) से किया जाना चाहिए, सामान्यकार्य सामान्यसूत्रों (उत्सर्ग) से तथा विशेषकार्य हेतु अपवादसूत्र। यथा - सामान्यकार्यविधायकसूत्र (उत्सर्गसूत्र) 'कर्मण्यण्' से 'कुम्भकार' इत्यादि शब्दसिद्धि और इसके बाधक 'आतोऽनुपसर्गे कः' इस विशेषसूत्र (अपवादसूत्र) 'गोदः' इत्यादि। 'अपवाद' उत्सर्गनियम (सामान्य) का बाधक होता है - 'अपवादैरुत्सर्गा बाध्यन्ते'।

कथं तर्हीमे शब्दाः प्रतिपत्तव्याः? किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्? उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः। कथञ्जातीयकः पुनरुत्सर्गः कर्तव्यः, कथञ्जातीयकोऽपवादः? सामान्येनोत्सर्गः कर्तव्यः। तद्यथा - 'कर्मण्यण्'। तस्य विशेषणापवादः। तद्यथा - 'आतोऽनुपसर्गे कः'।

– फलव्यतिरेक-न्याय - फल के व्यतिरेक (व्यत्यय) होने का न्याय -यह न्याय शब्दज्ञान अथवा प्रयोग में 'धर्म' इस प्रसङ्ग में प्रयुक्त है। लोक में फल का व्यतिरेक भी प्राप्त होता है - अत्यधिक परिश्रम से भी फलप्राप्त्यभाव तथा अल्पकाल में सहज फलप्राप्ति, यही 'फलव्यतिरेक-न्याय' है।

ननु च ये कृतप्रयत्नास्ते साधीयः शब्दान्प्रयोक्ष्यन्ते, अत एव साधीयोऽभ्युदयेन योक्ष्यन्ते 'व्यतिरेकोऽपि वै लक्ष्यते। दृश्यते हि कृतप्रयत्नाश्चाऽप्रवीणाः, अकृतप्रयत्नाश्च

प्रवीणाः। तत्रा फलव्यतिरेकोऽपि स्यात्' शास्त्रपूर्वकं यः शब्दान्प्रयुङ्क्ते सोऽभ्युदयेन युज्यते।

शब्दज्ञान एवं प्रयोग में 'धर्म' होता है इस व्याख्यान से सभी प्रयुक्त शब्द 'धर्मयुक्त' (पुण्य) होने पर साधुशब्दज्ञान के लिए किया गया वैयाकरणों द्वारा प्रयत्न फलव्यतिरेकन्याय से निरर्थक होगा? अतः शास्त्रज्ञानपूर्वक (व्याकरणशास्त्र) शब्दप्रयोग से ही अभ्युदय प्राप्ति प्रथित है।

– व्यपदेशि-न्याय (एक में ही भेदव्यवहार होने का न्याय) -

'व्याकरण' शब्द का अर्थ 'सूत्र' बताने के क्रम में यह न्याय प्रयुक्त है। इस न्याय का अभिप्राय है कि जब एक ही वस्तु में भेदव्यवहार किया जाय, तो वह 'व्यपदेशि' कहलाता है। व्याकरण का शब्दार्थ 'सूत्र' हो तो 'व्याकरण का सूत्र' ऐसा षष्ठ्यर्थ प्रतिपाद्य नहीं हो सकता है। तदनन्तर पतञ्जलि ने व्याकरण का दूसरा अर्थ - 'लक्ष्यलक्षणे व्याकरणम्' अर्थात् शब्द-रूप लक्ष्य तथा सूत्ररूप लक्षण के समुच्चय रूप को 'व्याकरण' परिभाषित किया है। इस पर भी पूर्वपक्षी ने आपत्ति की तो महाभाष्यकार ने व्याकरण का अर्थ 'सूत्र' ही हो। पुनश्च पूर्वपक्षी ने 'सूत्र' अर्थ स्वीकार करने पर तो 'व्याकरण का सूत्र' ऐसा जो व्यवहार नहीं हो पाएगा। इसके समाधान में प्रकृत न्याय का प्रयोग करते हुए पतञ्जलि कहते हैं कि 'व्यपदेशि-न्याय' से 'व्याकरण का सूत्र' यह व्यवहार होगा -

लक्ष्यं च लक्षणं चैतत्समुदितं व्याकरणं भवति। अथ वा पुनरस्तु सूत्रम्। ननु चोक्तम्-'सूत्रे व्याकरणे षष्ठ्यथी नोपपन्नः' इति 'नैष दोषः। व्यपदेशिवद्भावेन भविष्यति'

इस न्याय का अभिप्राय यह है कि जब एक ही वस्तु में भेदव्यवहार किया जाय, तो वह 'व्यपदेशि' कहलाता है। जैसे - देवदत्त का एक ही पुत्र है - यज्ञदत्त। जब पूछा जाता है कि देवदत्त का ज्येष्ठ-पुत्र तथा कनिष्ठ-पुत्र कौन है? तो यज्ञदत्त ही ज्येष्ठ-पुत्र और कनिष्ठ-पुत्र भी है। यहाँ एक ही यज्ञदत्त में ज्येष्ठ-पुत्र का तथा कनिष्ठ-पुत्र का भी भेदव्यवहार हुआ है, यही 'व्यपदेशि-न्याय' है - 'भवति चैतदेकस्मिन्नपि - अयमेव मे ज्येष्ठः, अयमेव मे मध्यमः, अयमेव मे कनीयान् इति'।

इसे 'ज्येष्ठकनिष्ठपुत्र-न्याय' (एक पुत्र में बड़ा भी और छोटा भी होने का आरोप) तथा 'आद्यन्तवद्-न्याय' (आदि भी और अन्त भी एक ही वस्तु होना) भी कहा जाता है।

– 'गौणमुख्य-न्याय' - गौण-मुख्य में मुख्य को अधिक महत्त्व दिये जाने का न्याय -

'ओत्' सूत्रव्याख्या प्रसङ्ग में प्रस्तुत न्याय प्रयुक्त है। लोक में जब गौण (अप्रधान) तथा मुख्य (प्रधान) दोनों पदार्थ की सम्भावना होती है, तो वहाँ मुख्य पदार्थ (मुख्य-विषय) जन्यकार्य होता है, वही अधिक प्रधान होता है, क्योंकि वही अभिधेयार्थ होता है तथा मानवमस्तिष्क में प्रथमतः प्रस्फुटित होता है। अतः गौण-मुख्य में मुख्य अधिक महत्त्वशाली होने के कारण तदाश्रितकार्य किये जाते हैं, यथा - 'अग्निषोमदेवता के लिए 'गो' को यूप में बाँधा जाय', यहाँ 'गो' शब्दार्थ चतुष्पाद-गाय नामक पशु-रूप मुख्यार्थ ही लिया जाता है और तद्रूप उसे ही बाँधा भी जाता है॥ 'गो' का लाक्षणिक गौण अर्थ 'वाहीक' (मूर्ख मनुष्य) गृहीत नहीं होता है।

एवं तर्हि गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः इति, तद्यथा 'गौरनुबन्ध्योऽजोऽग्निषोमीयः' इति न वाहीकोऽनुबध्यते।

प्रकृत प्रसङ्ग में 'आहो', 'उताहो' इत्यादि ओकारान्त निपातों की प्रगृह्यसंज्ञा उक्त है। पूर्वपक्षानुसार ये शब्द समाहार-निपातजन्य ओकारान्त हैं - 'आह्उ=आहो' तथा 'उत्आह्उ=उताहो' निष्पन्न है। इस प्रश्न के समाधान भाष्य में पतञ्जलि द्वारा प्रकृतन्याय से जो इनका स्वरूप (अर्थ) व्याख्यान किया वह अभिधावृत्तिजन्यार्थ नहीं है, लक्षणावृत्ति से प्राप्त अर्थवान् गौण-रूप है, इनका अभिधावृतिप्राप्त्यर्थ (मुख्यार्थ) तो अक्षत-रूप निपात 'आहो', 'उताहो' ही है, 'आह उ' या 'उत आह उ' नहीं। अतः 'गौणमुख्य-न्याय' से निपातविषय में मुख्यार्थरूप 'आहो, उताहो' ग्राह्य होंगे, न कि लाक्षणिकार्थजन्य गौणरूपविषय में, यही 'गौणमुख्य-न्याय' है।

— **तक्रकौण्डिन्य-न्याय** - तक्र-विशिष्ट कौण्डिन्य ब्राह्मण न्याय -

प्रस्तुत न्याय 'मिदचोऽन्त्यात्परः' सूत्र के व्याख्यान के क्रम में प्रयुक्त हुआ है। लोक में देखा जाता है कि विशेष सम्भव होने पर प्रतिषेध होता है, जैसे कि कहा जाता है कि 'ब्राह्मणों को दधि दिया जाय और कौण्डिन्य को तक्र' तो यहाँ दधिदान में सभी ब्राह्मणों में 'कौण्डिन्य' भी अन्तर्भूत है, उसे प्राप्ति सम्भव है तथापि तक्रदान-रूप विशेष कथन से दधिदान-रूप सामान्य कथन का प्रतिषेध हो जाता है, जिससे 'कौण्डिन्य' को तक्र ही दिया जाता है, दधि नहीं। प्रकृत में 'पयांसि', 'यशांसि' आदि में 'नपुंसकस्य झलचः' से प्राप्त 'नुम्' (न्) आगम 'पयस्', 'यशस्' आदि के अन्तिम 'अच्' (स्वर-वर्ण) से परे भी (प्रकृत-सूत्र से) होना सम्भव है और 'अलोऽन्त्यस्य' से अन्त्याक्षर 'स्' के स्थान में भी सम्भव है। यहाँ दोनों ही स्थितियों में सम्भव होने पर भी प्रकृत न्यायानुसार विशेष कथनरूप 'मिदचोऽन्त्यात्परः' के द्वारा सामान्य कथनरूप 'अलोऽन्त्यस्य' का प्रतिषेध होकर अन्तिम 'अच्' से परे ही 'नुम्' (न्) - आगम होता है।

इदं त्वयुक्तम् – पयान्सि यशान्सीति, अस्ति हि संभवः – यदयमचोऽन्त्यात्परश्च स्यात्, स्थाने चेति। एतदपि युक्तम्। कथं? नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति – अपवादैरुत्सर्गा बाध्यन्तामिति। किं तर्हि? लौकिकोऽयं दृष्टान्तः – लोके हि सत्यपि सम्भवे बाधनं भवति। तद्यथा – 'दधि ब्राह्मणेभ्यो दीयताम्, तक्रं कौण्डिन्याय' इति, सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्तकं भवति। एवमिहापि सत्यपि सम्भवे अचामन्त्यात् परत्वं षष्ठीस्थाने योगत्वं बाधिष्यते।

– **नष्टाश्वदग्धरथ-न्याय** – मरे हुए घोड़े और जले हुए रथ वाले का न्याय – 'स्थानेऽन्तरतमः' सूत्रविवेचन क्रम में यह न्याय प्रयुक्त हुआ है। लोक में देखा जाता है कि जब एक व्यक्ति के पास 'रथ' होता है, किन्तु 'अश्व' मर गये होते हैं तथा दूसरे व्यक्ति के पास 'अश्व' होते हैं किन्तु 'रथ' नष्ट हो गया होता है, तो दोनों व्यक्ति कार्यसंपादन के लिये साहचर्यक्रिया द्वारा कार्य निष्पन्न कर लेते हैं, यही 'नष्टाश्वदग्धरथ-न्याय' है। प्रकृत में भी जब स्थानी 'ऋ' के आदेश 'अ' या 'आ' में आन्तरतम्य न होने के कारण कार्यव्यवधान होने पर पतञ्जलि ने इस न्याय के आधार पर स्थानी 'मूर्धास्थानीय' है, तो आदेश 'कण्ठस्थानीय' है, तथापि ये दोनों 'नष्टाश्वदग्धरथ-न्याय' से कार्य कर लेंगे।

अथवाऽनान्तर्यमेवैतयोरान्तर्यम्। एकस्यान्तरतमा प्रकृतिर्नास्ति, अपरस्यान्तरतम आदेशो नास्ति, एतदेवैतयोरान्तर्यम्। संप्रयोगो वा नष्टाश्वदग्धरथवत्। अथवा नष्टाश्वदग्धरथवत्सह संप्रयोगो भवति। तद्यथा – तवाश्वो नष्टो ममापि रथो दग्धः, उभौ सम्प्रयुज्यावहै इति। 'ऋ' इति तवाप्यन्तरतमा प्रकृतिर्नास्ति ममाप्यन्तरतम आदेशो नास्ति, अस्तु नौ सम्प्रयोगः इति।

– **एकदेशविकृत-न्याय** – एक भाग में विकृत होने पर भी स्वरूपज्ञान का न्याय – 'स्थानिवदादेशोऽनल्विधौ' सूत्रविवेचन क्रम में यह न्याय प्रयुक्त है। लोक में यदि किसी एक देश (भाग) में विकार उत्पन्न होने पर वह अन्यरूप होकर स्वरूप-परिवर्तन नहीं होता है, वह वही रहता है, यथा – श्वा के कान या पूँछ कटने के उपरान्त वह श्वत्वजातिविशिष्टस्वरूप से इतर अश्व या गर्दभ नहीं होता है, उसकी संज्ञा श्वा ही रहती है, यही 'एकदेशविकृत-न्याय' है।

प्रकृत में 'पचतु' (पच्+तिप्) में 'तिप्' (ति) के एकदेश – 'ति' के 'इ' के स्थान में 'एरुः' सूत्र से 'उ' – रूप विकार (तु) हो जाने से भी वह तिङ्-रूप 'तिप्' ही होता है, अन्य नहीं और तिङन्त होने से 'सुप्तिङन्तं पदम्' सूत्र से 'पदसंज्ञा' होकर 'पचतु' की 'पदसंज्ञा' होती है।

एकदेशविकृतस्योपसंख्यानं कर्तव्यम्। किं प्रयोजनम् ? पचतु, पचन्तु। तिङ्ग्रहणेन ग्रहणं यथा स्यात्। 'एकदेशविकृतमनन्यवद्भवति' इति तिङ्ग्रहणेन ग्रहणं भविष्यति। तद्यथा - श्वा कर्णे पुच्छे वा छिन्ने श्वैव भवति, नाश्वो न गर्दभ इति।

– **'प्रतिनिधि-न्याय'** अथवा 'उपाध्यायशिष्य-न्याय' - किसी के बदले में किसी के द्वारा कार्य सम्पन्न किये जाने का न्याय - प्रस्तुत न्याय 'स्थानिवदादेशोऽनल्विधौ' सूत्र के व्याख्या प्रसङ्ग में प्रयुक्त हुआ है। लोक में व्यक्ति, परिवार, समाज अथवा दल अपने विचार, सिद्धान्त अथवा प्रस्ताव के उपस्थापन के लिए अपनी ओर से किसी एक व्यक्ति या समुदाय (प्रतिनिधि) को नियुक्त करके कार्य सम्पन्न करता है, यथा - उपाध्याय के जाने पर उनके शिष्य कार्यों को निष्पादित करते हैं - 'उपाध्यायस्य स्थाने शिष्य:'। यही 'प्रतिनिधि-न्याय' अथवा 'उपाध्यायशिष्य-न्याय' है।

प्रकृत में 'स्थानी' तथा 'आदेश' विधान प्रसंग में आदेशविधान के समय 'स्थानी' का निवर्तन हो जाता है (नित्य होने के कारण नष्ट नहीं होता है) और उसके स्थान पर विहित 'आदेश' कार्य निष्पादित करता है, वह प्रतिनिधि-न्याय से उस स्थान पर प्रतिनिधिरूप कार्य करता है। शब्द-नित्यत्व होने के कारण 'स्थानी' केवल निवर्तित होता है, नष्ट नहीं। यही 'प्रतिनिधि-न्याय' अथवा 'उपाध्यायशिष्य-न्याय' ही तो है।

'प्रतिनिधि-न्याय' का उल्लेख अन्य ग्रन्थों में भी पाया जाता है। ब्रह्मसूत्रभाष्य में शङ्कराचार्य लिखते हैं - 'भोजनलोपेऽप्यद्भिर्वान्येन वा द्रव्येणाविरुद्धेन प्रतिनिधानन्यायेन प्राणाग्निहोत्रस्यानुष्ठानमिति'। जैमिनीयसूत्रम् में भी इस विषय में लिखा है- 'नित्यकर्मणोऽनित्यप्रारब्धकर्मणश्च प्रतिनिधिना समापनाधिकरणम्'।

– **आमिश्री-न्याय** - मिश्रित वस्तुओं का न्याय -

प्रस्तुत न्याय 'तस्यादित उदात्तमर्धह्रस्वम्' सूत्र - विवेचन में प्रयुक्त हुआ है। जब दो या दो से अधिक वस्तुओं का मिश्रण में पृथक् पृथक् रूप में मिश्रित वस्तुओं का ज्ञान न हो, यही 'आमिश्री-न्याय' है। यथा नीरदुग्धमिश्रण में दुग्ध तथा नीर का पृथक् अभिज्ञान तथा अनुपात का ज्ञान असाध्य होता है। इस न्याय के द्वारा जब 'उदात्त' और 'अनुदात्त' मिलकर 'स्वरित' स्वर बनता है, तब उस 'स्वरित' स्वर में 'उदात्त' और 'अनुदात्त' का मिश्रित हो जाने से 'आमिश्री-न्याय' के कारण उनका पृथक् पृथक् स्वरूप ज्ञान नहीं होता है,

किमर्थं पुनरिदमुच्यते? आमिश्रीभूतमिवेदं भवति। तद्यथा - क्षीरोदके सम्पूते आमिश्रीभूतत्वान्न ज्ञायते - 'कियत् क्षीरं' 'कियदुदकमिति' 'कस्मिन्नवकाशे क्षीरं' 'कस्मिन्नोदकमिति'। एवमिहाप्यामिश्रीभूतत्वान्न ज्ञायते - कियदुदात्तम्, कियदनुदात्तम्,

कस्मिन्ननुदात्तमिति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे – 'इयदुदात्तमियदनुदात्तमस्मिन्नवकाश उदात्तम्, अस्मिन्नवकाशेऽनुदात्तमिति'।

– **कृत्रिमाकृत्रिम-न्याय** – कृत्रिम तथा स्वाभाविक वस्तु का न्याय।

'बहुगणवतुडति संख्या' सूत्र के प्रसङ्ग में इस न्याय का प्रयोग हुआ है। लोक में देखा जाता है कि कृत्रिम और अकृत्रिम (प्राकृतिक) वस्तुओं में कृत्रिम का ही ग्रहण अथवा बोध होता है। यथा – 'गोपालक को लाओ' इस वचन के अनुसार जिसका नाम गोलापल है, उसे ही लाया जाता है, न कि 'गाय का पालन करने वाले' ग्वाले को लाया जाता है। यहाँ 'गोपालक' कृत्रिम नाम है, और 'गाय का पालन करने वाला' अकृत्रिम अर्थात् स्वभावसिद्ध (प्रकृति-प्रत्यय-निष्पन्नार्थ यौगिकरूप) है। यही 'कृत्रिमाकृत्रिमन्याय' है।

इस न्याय के द्वारा सूत्रकार ने 'बहु, गण, वतु तथा डति' की संख्यासंज्ञा की है, अतः ये 'कृत्रिम' हैं। तद्विपरीत 'एक, द्वि, त्रि' इत्यादि स्वभावसिद्ध अर्थात् अकृत्रिम संख्यावाची शब्द हैं। किन्तु प्रसङ्ग में यहाँ प्रकृत-न्याय के आधार पर कृत्रिम 'बहु, गण' आदि का ही ग्रहण होगा, न कि अकृत्रिम 'एक द्वि' आदि का।

'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययो भवति। यथा लोके तद्यथा –'गोपालकमानय' 'कटजकमानय' इति। यस्यैषा संज्ञा भवति स आनीयते, न यो गाः पालयति, यो वा कटे जातः। तथैव एकादिकायाः संख्यायाः संख्याप्रदेशेषु संख्येत्येष संप्रत्ययो यथा स्यात्।

– **सतुषपलालधान्य-न्याय** (धान्यपलाल-न्याय) – भूसी और पुआल सहित धान लाये जाने का न्याय – 'स्वरितात्संहितायामनुदात्तानाम्' सूत्रविवेचनप्रसङ्ग में यह न्याय प्रयुक्त है। लोक में कृषक क्षेत्र से धान्य पकने पर तुषपलालादि सहित काटकर लाते हैं, पुनः तुषपलालादि को हटाकर धान्य को परिष्कृत करते हैं, वस्तुतः क्षेत्र से तुषपलालादि लाना अभीष्ट नहीं है, फिर भी कृषक धान्य के साथ तुषपलालादि लाते ही हैं। यही 'धान्यपलाल-न्याय' या 'सतुषपलालधान्य-न्याय' है। इस प्रसङ्ग में इसी भाव का 'मत्स्यकण्टक-न्याय' (कोई उपाय न होने पर काँटों सहित ही मछली के लाने का न्याय) भी प्रयुक्त हुआ है।

'इमं मे गङ्गे यमुने सरस्वति' इस प्रयोग में 'इघ्मम्' प्रातिपदिकस्वर अन्तोदात्त होने के कारण 'में' (अनुदात्तं सर्वमपादादौ ) के स्वरित होने पर (उदात्तादनुदात्तस्य स्वरितः ) 'गङ्गे, यमुने' आदि सबकी एकश्रुति होती है (आमन्त्रितस्य च – अष्टाध्यायी, सूत्रसंख्या ८.१.१९) किन्तु एक अनुदात्त वाले 'पचति' में 'ति' की और दो अनुदात्त वाले 'आग्निवेश्यः' में 'वेश्यः' की एकश्रुति नहीं हो सकती है।

तदनन्तर प्रकृत न्याय के आधार पर महाभाष्यकार पतञ्जलि ने यह समाधान किया है कि यदि अनुदात्तानाम् यह बहुवचन निर्देश न करके 'एकवचन' करते, तो द्विवचन और बहुवचन के विषय में शङ्का होती, पुनश्च 'द्विवचन' का प्रयोग करने पर एकवचन, बहुवचन विषयक शङ्का होती – अतः आचार्य पाणिनि ने बहुवचन-निर्देश करके प्रकृत 'धान्यपलाल-न्याय' से एकवचन और द्विवचन के अनुदात्तविषयों का भी निर्देश कर दिया।

स्वरितात्संहितायामनुदात्तानामिति चेद् द्वेकयोरैकश्रुत्यं वक्तव्यम्। आग्निवेश्यः पचतीति। किं पुनः कारणं न सिध्यति? 'बहुवचननिर्देशात्'। बहुवचनेनायं निर्देशः क्रियते, तेन बहुनामेवैकश्रुत्यं स्याद् द्वेकयोर्न स्यात्। नैष दोषः। नात्र बहुवचनेन निर्देशस्तन्त्रम्। कथं पुनस्तेनैव च नामनिर्देशः क्रियते, तच्चातन्त्रं स्यात्? तत्कारी च भवांस्तद्द्वेषी च। नान्तरीयकत्वादत्र बहुवचनेन निर्देशः क्रियते – अवश्यं कयाचिद्विभक्त्या केनचिद्वचनेन निर्देशः कर्तव्यः इति। तद्यथा – कश्चिदन्नार्थी शालिकलापं सपलालं सतुषमाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय तुषपलालान्युत्सृजति। तथा कश्चिन्मत्स्यार्थी मत्स्यान् सकण्टकान् सशकलानाहरति नान्तरीयकत्वात्। स यावदादेयं तावदादाय शकलकण्टकान्युत्सृजति। एवमिहापि नान्तरीयकत्वाद् बहुवचनेन निर्देशः क्रियते, अविशेषेणैकश्रुत्यं भवति।

– **गोयूथ-न्याय** - गायों के झुण्ड का न्याय -

प्रस्तुत न्याय 'तदस्मिन्नस्तीति देशे तन्नाम्नि', 'तेन निर्वृत्तम्', 'तस्य निवासः' तथा 'अदूरभवश्च' सूत्रों के युगपत् विवेचन के क्रम में प्रयुक्त हुआ है। जब कोई कार्य समूह में विद्यमान सभी के लिए एक साथ उक्त हो तो 'गोयूथ-न्याय' कहलाता है। लोक में जब गोपालक सभी गायों को एक साथ ले जाने के लिए एक ही दण्ड से प्रेरित करता है पृथक्त्वेन नहीं, जिससे 'गोयूथ' एक साथ चलता है, इसे 'गोयूथ-न्याय' कहा जाता है। पूर्वपक्षी ने शङ्का की कि इन चारों सूत्रों का अधिकार एक साथ कैसे प्रवृत्त हो सकता है? तब प्रकृत न्याय के आधार पर महाभाष्यकार ने बताया है- यद्यपि ये चारों चातुरर्थिक सूत्र अलग-अलग हैं, फिर भी इन सूत्रों से विहित चारों अधिकार एक साथ ही उत्तरवती सूत्रों में अनुवृत्त हो जायेंगे।

ननु चोक्तम् – ओरञित्येवमाद्यनुक्रमणं यदेव सर्वान्त्यमर्थादेशनं तस्यैव विषये स्यादिति। नैष दोषः गोयूथवदधिकाराः। तद्यथा – गोयूथमेकदण्डप्रघट्टितं सर्वं समं घोषं गच्छति, तद्वदधिकाराः।

– **शालिकुल्या-न्याय** (कुल्याप्रणयन-न्याय) - शालि (धान) सींचने के लिए बनायी गयी नहर का न्याय -'मिनातिमिनोतिदीङां ल्यपि च' सूत्र के व्याख्यान-प्रसङ्ग में यह न्याय प्रयुक्त है। लोक में जब शालि सेचन के लिए

> नहरें बनायी जाती हैं तब उस नहर से अन्यान्य कृषिसेचन के साथ साथ पेयजल, स्नान-वस्त्रप्रक्षालनादि हेतु जलग्रहण किया जाता है। शालिनिमित्त निर्मित नहर अन्य कार्यों को भी सिद्ध करती है, यही 'शालिकुल्या-न्याय' अथवा 'कुल्याप्रणयन-न्याय' है। प्रकृत में इस न्याय के माध्यम से पतञ्जलि ने यह सिद्ध किया है 'उपदेश' शब्द भी 'विशेषण' के लिए होकर 'अनुवृत्ति' के भी कार्य को सिद्ध करता है।

यत्तवादुच्यते - न चान्यार्थं प्रकृतमन्यार्थं भवतीति। अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा- शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयते, उपस्पृश्यते च शालयश्च भाव्यन्ते। यदप्युच्यते - न खल्वप्यन्यत्प्रकृतमनुवर्तनादन्यद्भवति - न हि गोपा सर्पन्ती सर्पणादहिर्भवतीति।

इस न्याय को 'अन्यार्थं - प्रकृतमन्यार्थं भवति', 'आम्राश्च सिक्ताः पितरश्च प्रीणिताः' आदि लोकोक्ति भी कहा जाता है।

## उपसंहार -

यथा लोके तथा व्याकरणे, महर्षि पतञ्जलि शास्त्र की अपेक्षा व्यवहार को अधिक महत्त्व देने वाले महनीय वैयाकरण हैं। महाभाष्य यद्यपि व्याकरण-शास्त्र का आकर ग्रन्थ है, तथापि ग्रन्थप्रयुक्त इष्टियों, लौकिक-न्यायों और लोकोक्तियों का प्रयोग किया है, जिनके माध्यम से व्याकरणाध्येता सारल्येन गूढव्याकरण-सिद्धान्तों को हृदयङ्गम करने में समर्थ हो जाते हैं।

इन प्रयोगों से पतञ्जलि-कालीन सामाजिक धर्म, दर्शन, संस्कृति, सभ्यता, रीति-प्रथा, इतिहास, साहित्य, प्रकृति, ज्ञान-विज्ञानादि विषयों का विशद विश्लेषण प्राप्त होता है। जिससे तत्कालीन भारतीय सामाजिक, धार्मिक, सांस्कृतिक, दार्शनिक आदि परिदृश्य भी अङ्कित हो जाते हैं, जो उसी स्वरूप में आज भी उतने ही प्रासंगिक हैं। वस्तुतः इन न्यायों के प्रयोग से भाषा में सामासिकता, शब्दवैलक्षण्य, अभिव्यक्तिसामर्थ्य इत्यादि नैकभाषाशास्त्रीय तत्त्वों का विकास होता है तथा शास्त्रीय लौकिक विविधपक्षों का परिज्ञान भी होता है। परवर्ती आचार्यों ने भी अनेकशः स्वशास्त्रों में इन न्यायों का प्रयोग कर उपादेयता तथा व्यवहारसार्थक्य प्रतिपादित किया है।

## सन्दर्भ

१. वाक्यपदीयम् - ब्रह्मकाण्डम् - १.११
२. यदैकं प्रक्रियाभेदैर्बुधा प्रविभजन्ते, तद्व्याकरणमागम्य परं ब्रह्माधिगम्यते।।
३. काव्यादर्श - ४.४
४. प्रमाणैरर्थपरीक्षणं न्यायः - न्यायवार्तिकभाष्यम्

५. वाक्यपदीयम् - वाक्यकाण्डम् - २.४७७
६. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, यदधीतमितिव्याख्यानभाष्यम् १.१.१
७. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, ज्ञाने धर्मः इति समाधान्तरवार्तिकम् १.१.१
८. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, ज्ञाने धर्मः इति समाधान्तरवार्तिकम् १.१.१
९. लौकिकन्यायाञ्जलिः - Colonel G.A. Jacob, भाग - ३, पृष्ठ - ३७
१०. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, शब्दानुशासनप्रकारभाष्यम् १.१.१
११. अष्टाध्यायी, सूत्रसंख्या - ३.२.१
१२. अष्टाध्यायी, सूत्रसंख्या - ३.२.२
१३. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, शब्दोपदेशे प्रयोगपक्षाङ्गीकारभाष्यम् शास्त्रनिर्माणरीतिभाष्यम् १.१.१
१४. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, शब्दोपदेशे प्रयोगपक्षाङ्गीकारभाष्यम् १.१.१
१५. व्याकरणमहाभाष्यम्, प्रथमाह्निकम्, व्याकरणपदार्थनिरूपणमितिभाष्यम् १.१.०
१६. अष्टाध्यायी, सूत्रसंख्या - १.१.१५
१७. व्याकरणमहाभाष्यम्, पञ्चमाह्निकम्, च्व्यन्ते सूत्रप्रवृत्तिनिराकरणाधिकरणे समाधानभाष्यमिति भाष्यम् १.१.५.१५
१८. अष्टाध्यायी, सूत्रसंख्या - १.१.४६
१९. अष्टाध्यायी, सूत्रसंख्या - ७.१.७२
२०. अष्टाध्यायी, सूत्रसंख्या - १.१.५२
२१. व्याकरणमहाभाष्यम्, सप्तमाह्निकम्, सूत्रबाध्यनिर्णयाधिकरणमिति भाष्यम् १.१.४६
२२. अष्टाध्यायी, सूत्रसंख्या - १.१.५०
२३. व्याकरणमहाभाष्यम्, सप्तमाह्निकम्, ऋवर्णस्य गुणवृद्धिप्रसङ्गमिति भाष्यम् १.७.५०
२४. अष्टाध्यायी, सूत्रसंख्या - १.१.५६
२५. अष्टाध्यायी, सूत्रसंख्या - ३.४.८६
२६. अष्टाध्यायी, सूत्रसंख्या - १.४.१४
२७. व्याकरणमहाभाष्यम्,अष्टमाह्निकम्, एकदेशविकृतन्यायाधिकरणमिति भाष्यम् १.८.५६
२८. अष्टाध्यायी, सूत्रसंख्या - १.१.५६
२९. ब्रह्मसूत्र-शांकरभाष्यम् - ३.३.४०
३०. जैमिनीयसूत्रम् - ६.३.१३-१७
३१. अष्टाध्यायी, सूत्रसंख्या - १.२.३२
३२. अष्टाध्यायी, सूत्रसंख्या - १.१.२२
३३. व्याकरणमहाभाष्यम्, लोकप्रसिद्धसंख्यावाचिनां संख्यात्वसाधनाधिकरणमिति १.१.५.२२

३४. अष्टाध्यायी, सूत्रसंख्या - १.२.३९
३५. अष्टाध्यायी, सूत्रसंख्या - ८.१.१८
३६. अष्टाध्यायी, सूत्रसंख्या - ८.४.६६
३७. व्याकरणमहाभाष्यम्, स्वरितात्संहितायामनुदात्तानाम् सूत्रस्य भाष्यमिति - १.२.१.३९
३८. अष्टाध्यायी, सूत्रसंख्या - ४.२.६७-७०
३९. व्याकरणमहाभाष्यम्, भिन्नवाक्यतायां दोषाभावबोधकं भाष्यमिति ४.२.१.६७-७०
४०. अष्टाध्यायी, सूत्रसंख्या - ६.१.५०
४१. व्याकरणमहाभाष्यम्, उपदेशपदस्य यथेष्टमभिसम्बन्धबोधक-भाष्यमिति ६.१.३.५०

**सन्दर्भ - ग्रन्थसूची –**


१. व्याकरणशास्त्रीय लोकन्यायरत्नाकर - डॉ. भीमसिंह वेदालङ्कार, पेनमैन पब्लिशर्स, दिल्ली (२००१)

२. पाणिनिव्याकरणमहाभाष्यम् - आचार्य रघुनाथशास्त्री एवं आचार्य शिवदत्त शर्मा, सुधी प्रकाशन, वाराणसी (१९८७)

३. लौकिकन्यायाञ्जलिः - Colonel G.A.Jacob Nirajana Pub lishers & Booksellers Delhi (1983)

४. व्याकरणमहाभाष्यम् - श्री भार्गवशास्त्री जोशी, आचार्य रघुनाथशास्त्री एवं आचार्य शिवदत्त शर्मा - निर्णयसागर, संस्करण, चौखम्भा संस्कृत प्रतिष्ठान, दिल्ली

५. व्याकरणमहाभाष्य ऑफ पतञ्जलि - सम्पादक, एफ. कीलहॉर्न, भ.ओ.रि.इ. पुणे (१९६२-१९७२)

६. व्याकरणशास्त्रे लौकिकन्यायानामुपयोगः - आचार्य रामकिशोर शुक्लः, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी (१९९२)

७. पतञ्जलिकालीन भारत - डॉ. प्रभुदयाल अग्निहोत्री, बिहार राष्ट्रभाषा परिषद् पटना (१९६३)

८. न्यायोक्तिकोशः - डॉ. छविनाथ मिश्र, अजन्ता पब्लिकेशन (इण्डिया), दिल्ली (१९७८)

९. संस्कृत व्याकरणशास्त्र इतिहास - युधिष्ठिर मीमांसक, तृतीय संस्करण, बहालगढ़ (सोनीपत) (संवत् २०३०)

# पाणिनि-पतञ्जलिकालिकसमाजे वैदिकवर्णव्यवस्थाः प्रतिबिम्बनम्

**व्रजेन्द्रकुमारसिंहदेवः**
सहायकाचार्यः (साहित्ये)
श्रीभगवानदास-आदर्श-संस्कृत-महाविद्यालयः, हरिद्वारम्

प्रत्येकं व्यक्तिः प्रत्येकं कार्यं कर्तुं न शक्यते। समाजस्य राष्ट्रस्य च प्रमुखतां स्वीकृत्य व्यक्तेः समुदायस्य च क्षमतायाः सम्यगुपयोगमेवाभ्युत्थानस्य मूलं भवति। यथार्थोऽयं वैदिकर्षिणा समुचितरूपेण ज्ञातः। अस्या धारणायाः वर्ण-व्यवस्था समुद्धृता आसीत्। वैदिकयुगे मानवसमाजस्य आर्यानार्यक्रमे भागद्वयं व्यवस्थितम्। मानवोचित कर्माचरणकारी आर्यः, तस्माद् विपरीत कार्याचरणकारी च अनार्य इति निगद्यते। वर्ण-व्यवस्थाविभाजनम् आर्यसमाजस्यैव रूपमासीत्। वर्णशब्दस्य निष्पत्तिः वरणार्थकात् 'वृ' - धातोः निर्मिता। यस्यार्थोऽस्ति-वरणमिति। स्वकीयार्थं समुचितं कार्यं स्वीकरणमिति, तदेव वर्णविशेषं स्वकीयार्थं स्वीकरणम्। व्यक्तिः यद् वस्तु मुचितं मन्यते, तस्य कार्यस्य निर्वाहस्य विशेषयोग्यतां स्थापयति। इदं तु वर्णव्यवस्थायाः मूलस्तम्भमोस्ति। वैदिकवर्णव्यवस्थायाः स्वरूपमृग्वेदस्य पुरुषसूक्ते समुपलभ्यते। यथा हि-

**ब्राह्मणोऽस्य मुखमासीद् बाहुः राजन्यः कृतः।**
**उरु तदस्य यद् वैश्यपद्भ्यां शूद्रोऽजायत्।।**[1]

अतः पुरुषसूक्ते विराट्पुरुषमभिलक्ष्य वर्णचतुष्टयस्योत्पत्तिरलिपतासीत्। अस्य मन्त्रस्य भावोऽयं वर्तते यत् मानवसमाजरूपशरीरस्य ब्राह्मणवर्णो मुखमासीत्। यतो हि सम्पूर्णशरीरस्य मुख्याधारं मुखं भवति। मुखमेव शरीरस्य समस्तानि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च सञ्चालयति। मन्त्रेऽस्मिन् शरीरस्य बाहुद्वयं क्षत्रिय उच्यते। बाहुभ्यां येन प्रकारेण शरीरस्य रक्षा भवति, तथैव बलेन पराक्रमेण च क्षत्रियोऽपि समाजस्य राष्ट्रस्य च रक्षां करोति। अनेन क्षत्रियः समाजरूपशरीरस्य बाहुद्वयमस्ति। मानवस्योरुः समाजरूपशरीरस्य वैश्यः अनेन कारणेन भवति, यतो हि वैश्यः राष्ट्रस्य समाजस्य च कृषि-व्यवसाय-व्यापारमाध्यमेन च पोषणकरोति। शूद्रः चरणवद् भवति, यतो हि पद्भ्यां शरीरस्य कृते परिश्रमपूर्वकं सेवादिकार्यं सम्पाद्यते। तथैव समाजस्य ब्राह्मण-क्षत्रिययोः सेवाकार्यं शूद्रो यत्नेन करोति।

वर्णव्यवस्थाया: स्वरूप-विभाजनस्य सिद्धान्तविवेचनात् परमेतज् ज्ञातुं शक्यते यत् तस्मिन् युगे ऋषिणा गुण-कर्त्तव्य-अधिकारसम्बन्धेषु कानि तथ्यानि प्रतिपादितानि इति। वैदिकसमाजस्य परिप्रेक्ष्ये ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादीनाञ्च गुण-कर्त्तव्य-अधिकारविषये च कथनात् प्राक् पाणिनिपतञ्जलिकालिकसमाजे वर्णव्यवस्थानु-शीलनस्य।अवसरोऽयं प्राप्यते क्रमशो

पाणिनिपतञ्जलिकालिकसमाजस्य मूलभित्तिः वर्णव्यवस्थाऽऽसीत्। भगवता पाणिनिनाऽष्टाध्याय्यां तथा महर्षिणा पतञ्जलिना महाभाष्ये चतुर्वर्णानां (ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां) उल्लेखाः कृतः।

**वैदिककालिकसमाजे ब्राह्मण-वर्णः –** वैदिकसमाजे ब्राह्मणस्य स्थानं सर्वोच्चमासीत्। विराट्पुरुषस्य मुखाद् उत्पन्नत्वात् तस्य विशिष्टता स्वयंसिद्धाबभूव। समाजे तस्य मानसम्मानञ्च अकारणमेव नासीत्, अपितु समाजस्य कृते तेन प्रतिपादितं त्यागं कर्तव्यं चास्य महत्त्वपूर्णं कारणमभवत्।

एषः समाजस्य बौद्धिकसांस्कृतिकविकासे सदैव सचेष्टशीलो भवति। तेन स्व-सदाचरण-सच्चरित्रतामाध्यमेन नैतिकमूल्यानां स्थापना कृता। प्रधानतया तस्य ब्राह्मणवर्णस्य षट्कर्माणि आसन्। तानि यथाक्रमेण-

**स्वधर्मो ब्राह्मणस्याध्ययनमध्यापनं यजनं दानं प्रतिग्रहश्चेति।**[२]

ब्राह्मणः समाजे बौद्धिकाध्यात्मिकज्ञानयोः नेता बभूव। स बौद्धिकज्ञाने सर्वश्रेष्ठ आसीत्। यो वेदानां ज्ञाता आर्षेयश्चाभवत्, स एव ब्राह्मणऋषिरासीत्।[३]

अध्यापनकार्ये ब्राह्मणानामधिकार आसीत्। समस्तद्विजवर्गान् स्वशिक्षया विद्यया च स पारङ्गतमकरोत्। अनेन श्रोत्रियस्थानस्याधिकारी स एवासीत्। स्वाध्यायाध्यापनञ्च ब्राह्मणस्य सर्वश्रेष्ठं तपः कथ्यते।४

**पाणिनिपतञ्जलिकालिकसमाजे ब्राह्मणवर्णः**

चतुवर्णानां कर्म हि चातुर्वर्ण्यमुच्यते। यदुक्तं कात्यायनाचार्येण-

**गुणवचनब्राह्मणादिभ्यः कर्मणि च।**[५]

आनुपूर्वीक्रमेण चतुर्वर्णस्य कृते 'ब्राह्मणक्षत्रियविट् शूद्राः' समस्तपदं प्रयुक्तमासीत्। यथा- वर्णानामानुपूर्वेण पूर्वनिपातः। (२.२.३४ वा.) भगवान् पाणिनिः 'ब्रह्मन्' तथा 'ब्राह्मण' इत्यस्मिन् मध्ये समानपर्यायं स्वीकृतवान्। ब्रह्मणः कृते हितकरोऽस्मिन् अर्थे ब्रह्मण्यपदं भवति। यथा-ब्रह्मणे हितम्।[६]

पतञ्जलिना अस्यार्थः 'ब्राह्मणेभ्यो हितम्' कृतः। तस्यापि कथनमासीत् यद् समानार्थावेतौ ब्रह्मन् शब्दो ब्राह्मणशब्दश्च। परन्तु यत्-प्रत्ययः ब्रह्मन् शब्दाद् भवति नतु ब्राह्मणशब्दात्। स्वं ज्ञायते यत् पाणिनिकालिकसमाजे ब्रह्मन्-शब्दः ब्रह्मणोचिताध्यात्मिक-

गुणसम्पत्तये प्रयुक्तो जातः। ब्राह्मणस्य भावार्थं (आदर्शाय) तथा कर्मणे (आचारार्थम्) ब्राह्मण्यपदं सिद्धं भवति। यथा हि- गुणवचनब्राह्मणादिभ्यः कर्मणि च।[7]

नाममात्रस्याचारहीनस्य ब्राह्मणं 'ब्रह्मबन्धुः' कथ्यते। एतस्य शब्दस्य वर्णनं ब्राह्मणग्रन्थे, छान्दोग्योपनिषदि, श्रौतसूत्रे, गृहसूत्रेषु च प्राप्यते। काशिकायामपि 'ब्रह्मबन्धुतर' इत्यस्य तथा 'ब्रह्मबन्धुतम' इत्यस्य प्रयोगो निर्देशति यद् 'ब्रह्मबन्धु'पदेन सह कुत्सापरकव्यङ्ग्यो वर्तते। पाणिनिकालिकसमाजे केवलं जातौ अभिमानकारिणः कर्मविहीनाः ब्राह्मणाः ब्रह्मबन्धुपदवाच्याः आसन्। यथा हि- जात्यन्ताच्छ बन्धुनि।[8]

बन्धुशब्दस्य कृते कथनमस्ति- ''येन ब्रह्मणत्वादिजातिर्व्यज्यते तद् बन्धुर्द्रव्यम्''। नाममात्रेण ब्राह्मन-क्षेत्रिय-वैश्यानां कृते ब्राह्मणजातीयः क्षेत्रियजातीयः वैश्यजातीयश्च पदव्यवहारेषु आयान्ति। अस्मिन् विषये वासुदेवशरण-अग्रवालमहोदयाः हिन्दीभाषायां कथयन्ति यत्-

''कुमहद्यामन्यतरस्याम् (५.४.१०५) सूत्र के अनुसार स्वधर्म में प्रतीत ब्राह्मण महायज्ञ या महाब्रह्मा और आचार हीन ब्राह्मण कुब्रह्म कहलाता था। महाब्रह्मा समाज में अत्यन्त प्रतिष्ठा-सूचक पद माना जाता था। मातंग जातक (४.३७७) में महाब्रह्मा के सम्मानित पद का उल्लेख आया है। कुंडककुच्छिजातक में बोधिसत्त्व के लिए महाब्रह्मा संशोधन है (३.२५४)। महानारद कस्सप जातक (६.२४२) में कहा गया है कि बोधिसत्त्व नारद अपने समय के महाब्रह्मा माने जाते थे। तात्पर्य यह है कि धर्म और शील परायण ब्राह्मण समाज का सर्वोच्च पद महाब्रह्मा था जिसके लिये व्यक्ति विशेष योग्यपात्र समझे जाते थे। सम्भवतः महाब्रह्मा का पर्याय देवब्रह्मा भी था। नारद को जातक में महाब्रह्मा और काशिका में देवब्रह्मा कहा गया है।[९]'' जनपदानुसारं ब्राह्मणानां नाम बभूव। यथा हि- ब्रह्मणो जानपदाख्यायाम्।[१०]

अस्य सूत्रस्याध्ययनेन प्रतीयते यद् भिन्न-भिन्न-देशेषु आवासत्वाद् ब्राह्मणानां बहुविधानि नामानि प्रचलितानि आसन्। कम्बोज-जनपदादारभ्य कलिङ्ग-अश्मक-कच्छ-सौवीरजनपदं यावत् प्रसृतेषु विस्तृतेषु देशेषु ब्राह्मणा आसन्। स्वभावतः पृथक्-पृथक्-भूखण्डानामनुसारं तेषां भिन्नानि नामानि आसन्। काशिकायां सुराष्ट्रो ब्रह्म (सुराष्ट्रेषु ब्रह्मा), अवन्ति ब्रह्मा (अवन्तिषु ब्रह्मा) इत्युदाहरणद्वयमस्ति। अवन्तिब्रह्म मालवब्राह्मणानां पूर्ववर्ती आसीत्, यतो हि उज्जयिन्या सह मालवशब्दस्य सम्बन्धः गुप्तकाले आरभ्यते। जनपदानुसारं ब्राह्मणानां नामकरणत्वाद् ब्राह्मणानां पञ्चगौड-पञ्चद्राविडादयः प्रमुखा आसन्।

**वैदिककालिकसमाजे क्षत्रियवर्णः** – वैदिकसमाजे क्षत्रियाणां स्थितिः ब्राह्मणेभ्यः पश्चात् आसीत्। परन्तु तेषां मानमहत्त्वञ्च ब्राह्मणेभ्यो न्यूनं नासीत्। देशसमाजयोः रक्षा-व्यवस्थायाः भारं क्षत्रियाणामुपरि एव अभवत्। स्व-युद्धकौशलेन, प्रशासनेन च ते

क्षत्रिया: समाजस्य रक्षणं पोषणञ्चाकुर्वन्। ऋग्वेदे तं 'क्षत्र' इति निगद्यते। यस्यार्थो वर्तते शौर्य: पराक्रमश्च।[११] तस्य कार्यं प्राय: युद्धपराक्रमशौर्यप्रदर्शितमासीत्। अनेन कारणेन एवम्भूतं वीरपराक्रमवर्गं च 'क्षत्रिय' इति कथ्यते।[१२]

मनुनाऽपि क्षत्रियस्य कृते मनुस्मृतौ उच्यते यत्-

**प्रजानां रक्षणं दानमिज्याऽध्ययनमेव च।**
**विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः।।**[१३]

क्षत्रियवर्णाय युद्धम् अनिवार्यं बभूव। युद्धस्यानिवार्यताया: कारणाद् नियमितरूपेण क्षत्रियस्य कृते आयुध-शिक्षा-प्रचलिता इति। समाजे शासनस्य सम्पूर्णशक्ते: केन्द्रं क्षत्रियो एव अभूत्। अत: समाजे अस्य महत्वपूर्णं स्थानमासीत्। यदुक्तं ऐतरेयब्राह्मणे-क्षत्रियोऽजनि विश्वस्य भूतस्याधिपतिरजनि विशामत्ताजनि ब्राह्मणस्य गोप्ताऽजनि धर्मस्य गोप्ताऽजनि।।१४

**पाणिनिपतञ्जलिकालिकसमाजे क्षत्रियः** -जनपदशब्दात् क्षत्रियादञ्।[१५]

क्षत्रियवर्गाणां उपवेशनत्वाद् बहुजनपदानां नाम तदेवासीत्। पञ्चालक्षत्रियाणाम् उपवेशनत्वाद् आदौ जनपदस्यापि नाम पञ्चाल इत्यासीत्। पश्चात् जनपदनाम्न: प्रधानता अभवत् तथा जनपदानां नाम्माध्यमेन तत्रास्थ प्रशासक: क्षत्रियाणां नाम अष्टाध्याय्यां जनपदिन् कथ्यते। राजन्यशब्दस्यार्थद्वयं पाणिनेरष्टाध्याय्यां प्राप्यते। प्रथम: - क्षेत्रियवाची प्राचीनोऽर्थ:।[१६] द्वितीय: -

अभिषिक्तवंश: क्षत्रियाणां कृते। केवलं तदेव क्षत्रियकुलं राजन्य: कथ्यते। यस्य संघरूपेण शासने भागग्रहणे अधिकार: आसीत्।[१७]

वैदिककालिकसमाजे वैश्य-शूद्रश्च -अयं हि वर्णो वैश्य: क्रम-दृष्ट्या तृतीया गणना भजते। वेदविदितानुसारेण वैश्यस्य समाजे तत् स्थानं वर्तते यथा शरीरे उरो: वा मध्यभागस्य अर्थाद् वक्षादध: पादयोरूपरि भागस्य भवति। अन्नस्य पाचनं तथा रसो रक्तरूपे परिणतो भूत्वा समस्तशरीरे प्राप्तस्यकार्यमुदरस्यैव भवति। एवमेव समस्त-राष्ट्रस्य पदार्थानाम् शोधनादि-कार्यं विधाय तान् राष्ट्रस्य उपयोगरूपे निर्माय यथावश्यकता आराष्ट्रे अधिप्राप्तिर्विदधाति प्रेषयति वा एतत्कार्यं वैश्यवर्णस्य इत्यधिगम्यते। मनुना कथ्यते यत् -

**पशूनां रक्षणं दानमिज्याधययनमेव च।**
**वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च ।।**[१८]

शूद्राणां कर्त्तव्यविषये चर्चां कुर्वन् मनुना कथ्यते-

**एकमेव तु शूद्रस्य प्रभुः कर्म समादिशत्।**
**एतेषामेव वर्णानां शूश्रूषामनसूयया।।**[१९]

शूद्रं प्रति समस्तेभ्यो वर्णेभ्यः न्यूनमहत्त्वप्रदानं वेदविरुद्धं वर्तते। वेदस्तु समस्तवर्णानां कृते समानदृष्टिं स्थापयति। यदुक्तं यजुर्वेदे-

**यथेमां वाचं कल्याणीमावदानि जनेभ्यः।**
**ब्रह्मराजन्याभ्यां ᳪ शूद्राय चार्याय च स्वाय चारणाय च।।**[२०]

अनेन स्पष्टरूपेण प्रतीतिर्भवति यद् वेदः शूद्रस्य कृते कदापि पक्षपातं न करोति। सूत्रकालेऽपि शूद्रः पूर्णतः संस्कारहीनं धर्महीनञ्च नासीत्। मनुना अभिधीयते यत्- श्रद्धधानः शुभां विद्यामाददीतावरादपि।[२१]

अनेन प्रकारेण वैदिकवर्ण-व्यवस्थायां मानवस्य समानतायाः एकतायाश्च तदेवोदात्तस्थानस्यादर्शस्य वा उपस्थितिर्भवति, यस्योपमा अन्यत्र दुर्लभा दृश्यते।

**पाणिनिपतञ्जलिकालिकसमाजे वैश्य-शूद्रश्च**

भगवता पाणिनिना वैश्यस्य कृते 'अर्य'पदस्योल्लेखः कृतः। यथा हि-

**अर्यः स्वामिवैश्ययोः।**[२२]

**गृहस्थानां कृते गृहपतिः शब्दो वर्तते।**

**भगवान् पाणिनिः शूद्रस्य भेदं द्विविधं स्वीकृतवान्। यथा हि-**

**शूद्राणामनिरवसितानाम्।**[२३]

सूत्रेऽस्मिन् महर्षेः पतञ्जलेः विशदं भाष्यं वर्तते। अत्र शूद्राणां शुङ्गकालीनस्य स्थितेः परिचायकोऽस्ति। अनिरवसितशूद्राः ते सन्ति ये आर्यावतस्य भौगोलिकसीमामध्ये तिष्ठन्ति। पतञ्जलेर्मतानुसारं मृतप-चाण्डालादयः शूद्राः प्रायः ग्राम-घोष-नगरप्रभृतिषु स्थानेषु अवसन्। ते यज्ञकार्येषु सम्मिलिता आसन्, परन्तु भोजनानन्तरं तेषां भोजनपात्राणि अस्पर्शमानान्यासन्।

'आर्यो ब्राह्मणकुमारयोः'[२४] इत्यस्मिन् सूत्रे आर्य-ब्राह्मण-आर्यकुमारयोः शब्दो दृश्यते। आर्यब्राह्मणपदं मन्त्रिपरिषदः प्रधानमन्त्रिणः कृतेऽभवत् तथा आर्यकुमारपदं युवराजस्य कृते प्रयुक्तमभवत्।

**पाणिनिपतञ्जलिकालिकसमाजे मिश्रवर्णः** - पाणिनियुगेऽनुलोम-प्रतिलोमशब्दयोः प्रचलनं जातम्। मिश्रवर्णे अम्बष्ठस्य नाम आयाति।[२५] स्मृतीनां मतानुसारेण ब्राह्मणपितुः वैश्यमातुः सन्ततिः हि अम्बष्ठ उच्यते। अम्बष्ठो वाहीके एको गणः आसीत्।

कात्यायनेन महाशूद्रस्य नामोल्लेखः कृतः।[२६] काशिकामतानुसारेण अयम् आभीरजात्याः संज्ञाऽऽसीत्। आभीरं प्रति महाशूद्रं कथं निगद्यते? अस्य ऐतिहासिकपृष्ठभूमिः प्रतीयते। महर्षिणा पतञ्जलिना शूद्रपदेन सामान्यशूद्रस्य तथा आभीरपदेन विशेषशूद्रस्यार्थः निर्देशितः।

यथा – त्यदादीनि सर्वैर्नित्यम्।[२७] त्तरसिंधस्य पूर्वभागे शूद्राणां तथा तस्य समीपे हि आभीराणां विशालं राज्यमासीदिति। अनेन प्रकारेण पाणिनिपतञ्जलिकालिकसमाजे वर्णव्यवस्थायाः विवेचनं मयाऽत् प्रस्तुतम्।

**सन्दर्भाः**


१. ऋग्वेदे, १०.९०.१२

२. (क) मनुस्मृतौ १.८८ (ख) याज्ञवल्क्यस्मृतौ ५.१८८

३. एष वै ब्राह्मण ऋषिरार्षेयो यः शुश्रुवन्। तै०सं० ६.६.१.५

४. बृहद्०उर्प ४.३.३५–३९

५. ५.१.१२४ वार्तिककारेण

६. महाभाष्ये, ५.१.७

७. तत्रौव, ५.१.१२४

८. अष्टाध्याय्याम्, ५.४.९

९. पाणिनिकालीन भारतवर्ष, पृ.९१

१०. अष्टाध्याय्याम्, ५.४.१०४

११. ऋग्वेद, ८.३५.१६–१८, १.१५७.२

१२. तत्रौव, ७.४६.२, ८.६७.१, ४.४२.१

१३. मनुस्मृतौ, १.८९

१४. ऐत.ब्रा. ३९.३

१५. अष्टाध्याय्याम्, ४.१.१६८

१६. तत्रौव, ५.३.११४

१७. तत्रौव, ६.२.३४

१८. मनु. १–९०

१९. तत्रौव, १.९१

२०. यजुर्वेदे, २६.२

२१. मनुस्मृतौ, २.२३८

२२. अष्टाध्याय्याम्, ३.१.१०३

२३. तत्रौव, २.४.१०

२४. तत्रौव, ६.२.५८

२५. तत्रौव, ८.३.९७

२६. कात्यायनेन, ४.१.४ (वा.)

२७. महाभाष्ये, १.२.७३ वा. ६

# महाभाष्यसम्मतं भाषातत्त्वम्

**श्रेयांशद्विवेदी**
उपाध्यक्षः
हरियाणा संस्कृत अकादमी, पंचकूला

मानवजीवने भाषायाः महत्त्वपूर्णं स्थानं विद्यते। भाषा मानवानां श्रेष्ठा ज्योतिः। उक्तमपि-

**वाग्रूपता चेन्निष्क्रामेदवबोधस्य शाश्वती।**
**न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्षिणी।।**

अस्यायं भावः-यथा प्रकाशकत्वमग्नेः स्वरूपं यथा वा चैतन्यम् अन्तर्यामिणः परमेश्वरस्य स्वरूपम्, तथा सकलमपि ज्ञानं सूक्ष्मतया वाग्रूपतया स्थूलशब्दस्योपादानभूतया स्वरूपभूतयानुगतम्। यापि च सुषुप्तिरूपाऽसञ्चेतितावस्था तस्यामपि च सुखविषयके मोहविषयके चाविद्यावृत्तिरूपे ज्ञाने सूक्ष्मो वाग्धर्मानुगमोऽभ्यावर्तते। अन्यथा सौषुप्तज्ञाने शब्दानुवेधाभावे तत्समानविषये तज्जन्यसंस्कारे तज्जन्ये स्मरणे च तत्समानविषये शब्दानुवेधाभावे 'सुखमहमस्वाप्सं न किञ्चिदवेदिषम्' इति स्मरणस्याभिलापो नोपपद्येत। अतस्तत्राापि सूक्ष्मालब्धवृत्तिः शब्दभावनाज्ञानेऽनुवर्तत एवेति मन्तव्यम्। अत एव वेदे निगदितं यत् 'अक्षरेण प्रतिमिम एताम्' अहम्=परमात्मा अक्षरेभ्यः भाषायाः निर्माणं करोमि। वयमपि सर्वे प्रतिदिनं भाषायाः प्रयोगं कुर्मः। भाषा अस्माकं जीवनस्य अविभाज्यम् अङ्गं वर्त्तते। उक्तमपि 'तां द्योतमानां स्वर्यं मनीषाम्' भाषा तेजोमयी सुखदात्री च अस्ति। अस्माकं जीवनस्य भाषां विना कीदृक् स्वरूपं भविष्यति इति वयं कल्पनामपि कर्तुं न शक्नुमः। मानवानां कृते भाषा परमात्मनः प्रदत्तं वरम् अस्ति। उक्तमपि 'ततान श्रवो देवेष्वमृतमजुर्यम्' भाषा देवेभ्यो मानवेभ्यश्च यशोऽमरत्वं च यच्छति। 'तस्याः समुद्रा अधिविक्षरन्ति' वाक्तत्त्वस्य सागरः परितो व्याप्तोऽस्ति। मानवैः सहस्राधिकवर्षेभ्यः कृतायाः साधनायाः फलतः ज्ञान-विज्ञान-क्षेत्रे सफलता समधिगता। उक्तमपि 'येना नः पूर्वे पितरः पदज्ञाः' अस्माकं पूर्वजाः भाषातत्त्वस्य पदतत्त्वस्य ज्ञातार आसन्। अनवरतं सूचना प्रौद्योगिकी युगे कियन्त्यः विद्याः विकसन्ति च। न्यायमीमांसा-प्रभृतयः प्राचीनतमाः ग्रन्थाः सन्ति। साम्प्रतं विभिन्नानां नवीनशास्त्राणां विकासः अनुदिनं जायमानम् अस्ति। एतत् सर्वं विकासः भाषाविकासः। उक्तमपि-

**अहमेव वात इव प्र वामि, आरभमाणा भुवनानि विश्वा।**
**परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव।।**

अखिलब्रह्माण्डे भाषा सर्वशक्तिसम्पन्ना वायोरिव सर्वत्रगतिमती लोकनिर्मात्री नूतनसृष्टिनिर्मात्री च चेतनाविरहिते मानवे समाजे च चेतनां प्रकटयन् आह्लादं जनयति।

**वागेव विश्वा भुवनानि जज्ञे-वाच इत् सर्वममृतं यच्च मर्त्यम्।**
**अथेद् वाग् बुभुजे वागुवाच पुरुत्रा वाचो न पदं यच्च नाह।।**

वागेव बुद्ध्यात्मना स्थितं सूक्ष्मं वाक्तत्त्वमेव विश्वा भुवनानि सर्वाणि भुवनानि वाच्यवाचकोभयात्मकानि जज्ञे जाता इन्द्रियाणि प्राणं च द्वारीकृत्य-वाच इत् वाच एव इदिति अवधारणेऽव्ययम्। यदमृतमाकल्पान्तं स्थायि वियदादिकं यच्च मर्त्यं मध्ये एव विनाशि कार्यजातम् तज्जज्ञे। न केवलं वाग् मर्त्यामर्त्योभयरूपभोग्यात्मनैव जाता इत्याह-अथेद् वाग् बुभुजे। अथ वाग् इद् वागेव, बुभुजे आन्तरज्ञातृरूपेणावस्थिता बुभुजे भोक्त्री, वागेव पुरुत्रा बहुभिः प्रकारैः, पुरुशब्दाद् बह्वर्थात् त्रा प्रत्ययः प्रकारे। उवाच वक्त्री प्राणं द्वारीकृत्य शब्दानां बहुधा प्रयोक्त्री। यच्चन चनेत्यप्यर्थे निपातः। यत् किंञ्चिदपि आह वक्ति जनः, तत्सर्वं शब्दाभिधेयमर्थजातं वाचो न परं न भिन्नम्,परं वागात्मकमेव, वागुपादानकत्वादिति।

भाषा स्वयमेव सत्तां दधाति। उक्तमपि-तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्। भाषाणामनेकरूपता पृथक्-पृथक् संराजते। भाषा सामान्यजनजीवनेषु प्रविश्य जीवति। भाषैव एतादृक् शक्तिमती या हि सम्पूर्णं संसारम् एकसूत्रे समायोजयितुं समर्था। स्वभाषा भाषाविद् जनान् एकसूत्रे बध्नाति। तस्माद् भिन्नाः सन्तोऽपि जनाः एकतामनुभवन्ति। विश्व-भाषा विश्व-मानवान् एकस्मिन् सूत्रे संयोज्य विश्वबन्धुत्वभावनां प्रति नयति। उक्तमपि-अहं राष्ट्री संगमनी वसूनाम्।

**शब्देष्वेवाश्रिता शक्तिर्विश्वस्यास्य निबन्धनी।**
**यन्नेत्रः प्रतिभात्मायं भेदरूपः प्रतीयते।।**

वस्तुतः सभ्यतायाः संस्कृतेश्च आधारः भाषा एव अस्ति। वस्तुतः भाषामाश्रित्य एव मानवाः पशुतामपहाय मानवतायाः सोपाने आरूढाः अभवन्। मानवस्य सर्वविध प्रगतेराधारः भाषा एव अस्ति। भाषायां कर्तृत्वं धर्तृत्वं हर्तृत्वं च विद्यते। रचनात्मकं कार्यं विभिन्नाश्च योजनाः निर्वाचनादिकं शिक्षणं रक्षणं वैज्ञानिकं यात्रा व्यापारः चिकित्सादिकं प्रौद्योगिकं यत्किमपि कार्यं तत्सर्वं भाषया एव सम्पद्यते। भाषा एव समाजं दधाति यदि भाषा न अभविष्यत् तर्हि मानवसमाजस्य उन्नतिः न अभविष्यत्। उक्तमपि 'तेन जीवन्ति प्रदिशश्चतस्रः' भाषायाः प्रभावात् चतस्रः दिशाः व्यवस्थिताः सन्ति।

भाषायाः प्रभावेणैव मानवाः ज्ञानविज्ञानवार्तानां संकलनं संरक्षणं च अकुर्वन्। पूर्वसञ्चितज्ञानम् अपि ग्रन्थरूपेण संरक्षितवन्तः। इदमेव न इण्टरनेट-माध्यमेन सर्वं

सुलभं वर्त्तते। साम्प्रतं विश्वस्य विविधासु भाषासु कियन्तः ग्रन्थाः समुपलभ्यन्ते ? यदि इमे ग्रन्थाः अधुना विद्यार्थिनां कृते सुलभाः न अभविष्यन् तर्हि विभिन्नेषु क्षेत्रेषु कथम् उन्नति पथे आरूढाः अभविष्याम। अनेकेषां ग्रन्थानां साहित्यम् अमूल्यं महत्त्वपूर्णं च अस्ति। एषा ग्रन्थराशिः भाषायाः लिखितं सार्थकं स्थिररूपं च अस्ति। भाषायाः माध्यमेनैव अस्माकं पूर्वजाः विचारविमर्शं कृतवन्तः। उक्तमपि 'ऋतस्य धीतिं ब्रह्मणो मनीषाम्' वाक्तत्त्वंऋतंधारयति ब्रह्मविच्चास्ति। खण्डन-मण्डनपरम्परामनुसृत्य कस्यापि विषयस्य पूर्णं चिन्तनं कृतवन्तः। भाषां विना चिन्तनस्य प्रक्रिया अवरुद्धा भवति। अतः एतत् कथनं पूर्णतया सत्यमस्ति यत् सर्वाणि शास्त्राणि सम्पूर्णं साहित्यं च भाषया एव विकसितम्। इत्येव न 'जनं बिभ्रती बहुधा विवाचसम्' इयं पृथिवी भाषाविद् जनान् अङ्के स्थापयति। मानव जीवने भाषायाः अद्वितीयं महत्त्वं वेदज्ञैः सम्यगनुभूय स्वीकृतम् यत् 'सहस्राक्षरा भुवनस्य पंक्तिः' इयं सृष्टिपरम्परा वाक्तत्त्वस्यैव सहस्राक्षराणि सन्ति।

ऋग्वेदस्य एकस्मिन् मन्त्रे भाषायाः विषदता सम्यक् प्रतिपादिता। इममेव मन्त्रम् आदाय भाषाविषये व्याकरणमहाभाष्यभूमिकायां व्याख्या विहिता।

**चत्वारि शृंगा त्रयो अस्य पादाः द्वे शीर्षे सप्त हस्तासो अस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश।।**

अस्यायम् अभिप्रायो यत् एकः वृषभः उच्चैः स्वरेण किमपि भाषमाणः विलक्षण-स्वरूपवान् अस्ति। अस्य वृषभस्य चत्वारि शृंगा त्रयो पादाः द्वे मस्तके सप्त हस्ताः च सन्ति। अयं त्रिधा त्रिषु स्थानेषु बद्धः अयं भाषते यत् महादेवः मङ्घान् आविर्भूतः। अनेन ज्ञायते श्लोकोऽयं एका प्रहेलिका अस्ति।

निरुक्तकारो यास्कः अस्य मन्त्रस्य याज्ञिक-परम्परानुसारं व्याख्यां कृतवान्। भाष्यकारः पतञ्जलिः व्याकरण-परम्परानुसारं व्याख्यां कृतवान्। उभावपि आदर्शभूतौ। यद्यपि पतञ्जलेः व्याख्या भाषायाः महत्त्वं प्रतिपादयति सर्वमान्या च अस्ति।

अत्र भाषा एव वृषभः इति रूपेण कथिता। उपमेय-रूपेण भाषा उपमान-रूपेण च वृषभः वर्णितः। आलङ्कारिकाणां कथनमस्ति यत् उपमानोपमेययोः यत्र पृथगुल्लेखः क्रियते तथा च भेदगभील्लेखविधानं क्रियते तत्रा उपमालङ्कारो भवति।

भाषा वृषभ इव अस्ति। अस्मिन् वाक्ये उपमायाः प्रयोगः अभवत्। परं यत्र उपमाने उपमेये च अभेदस्य आरोपो भवति तत्रा रूपकालङ्कारो भवति। यथा- तद्रूपकम् अभेदो य उपमानोपमेययोः। अनेन लक्षणेन सिद्ध्यति यत् रूपकालङ्कारेऽपि उपमानोपमेययोः पार्थक्येन निर्देशोऽपेक्षते। यद्यपि क्वचिद् उपमेयस्य निर्देशो न विधीयते। केवलम् उपमानस्य एव निर्देशो विधीयते। तत्रा धर्मम् आदाय उपमानेन उपमेयस्य ज्ञानं क्रियते। उपमेयस्य तिरोधानम् एव निगरणम् इति कथ्यते। अस्योदाहरणमस्ति - वापी क्वापि

स्फुरति गगने। अत्र गगनं नायिकाया: कृशमध्यभागस्य उपमानं वापी च नाभिभागस्य उपमानम् अस्ति। आलङ्कारिका: इत्थं जायमानम् आदेशमेव अध्यवसानम् इति नाम्ना व्यवहरन्ति। इत्थम् उक्तौ रूपकातिशयोक्ति अलंकार: भवति। लिखितम् अपि कुवलयानन्दे यत्- 'रूपकातिशयोक्ति:स्यात् निगीर्याध्यवसानत: " उपर्युक्त-मन्त्रे उपमेयरूपाया: भाषाया: निर्देशनं विधाय उपमानरूप-वृषभस्य ग्रहणवशात् अत्र रूपकातिशयोक्ते: उदाहरणं स्वीकर्तुं शक्यते।वृषभश्च भाषाया: प्रतीकरूपेण स्वीकर्त्तव्यम्।

भाषावृषभयोस्तुलनायां हेतु: -भाषाशब्द: स्त्रीलिङ्गे वृषभ शब्दश्च पुंल्लिङ्गे उभयो: समानधर्मता नास्ति तर्हि उपमाया: निष्पत्ति: कथम्? इति प्रश्ने समुदिते भाष्यकारेण वृषभशब्दस्य व्युत्पत्ति: एवं प्रदर्शिता-वृष्-धातो: वृषभ-शब्दस्य निष्पत्तिर्जायते। वर्षणात् वृषभ: अस्यायम् अभिप्रायो यद् वृषभ: यत्र तिष्ठति तत्रौव वर्षति। लघुशङ्कां करोति। अत: तस्य वृषभ: इति संज्ञा। अयं शब्दो योगरूढ:। अत: वृषभ: अस्मिन्नेवार्थे प्रयुज्यते। भाषाया: सन्दर्भे वृषभ शब्दस्य यौगिकार्थ: स्वीकर्त्तव्य:। भाषा अपि वर्षति। साम्प्रतं वर्षाया: अर्थे लक्षणानुसारं व्यापकताया: दिग्दर्शनं भवति। अस्मिन्नर्थे वर्षाया: अर्थो भवति मानवानाम् इच्छापूर्ति:। वक्ता स्वीयाम् इच्छां भाषाया: माध्यमेन यदा प्रकटयति तदा तस्य पूर्त्ति: भवति। अभिव्यक्तय: हस्तसञ्चालनादि सङ्केतेन भवन्ति। यद्यपि सङ्केता: न्यूना: सन्ति। केवलं सङ्केतै: सम्पूर्णा: इच्छा: दु:साध्या। बहूनां सूक्ष्मतम विचाराणां भावानां च भाषां विना अन्येन केनापि साधनेन उपस्थापनं असम्भवम्। भाषा तु अस्माकं सर्वेषां सर्वान् विचारान् भावान् च प्रकटयति। इत्थं साधनं जगतीतले अन्यत् किमपि नास्ति। अत एव सकलान् कामान् अभिवर्षतीति वृषभ: इति व्युत्पत्तिम् अनुसृत्य भाषां वृषभ इति उच्यते। अथ च लौकिक-वृषभेण उक्षेण वा तुलना विधीयते। अनेन प्रकारेण भाषावृषभयो: लिंगभेद: रूपकातिशयोक्ति अलंकारस्य निष्पत्तौ नास्ति काचन बाधा। चत्वारि शृंगा इत्यस्य तात्पर्यमस्ति यत् शब्दस्य चत्वारो भेदा: भवन्ति। ते च भाषारूपी वृषभस्य चत्वार: शृंगा: स्वीक्रियन्ते इमे शब्दभेदा: सन्ति। नाम-आख्यात-उपसर्ग-निपातभूताश्च। नामान्तर्गता: संज्ञा सर्वनाम-विशेषणाश्च सुबन्तम्, आख्यात एव क्रिया सा च तिङन्तं भवति। अव्यया: एव निपाता: भवन्ति। उपसर्गा: लघुवर्गरूपेण प्रसिद्धिं गता: तेषां भेदा: परिगणिता: सन्ति। एतेषां पृथग्रूपेण परिगणनं महत्त्वं विदधाति यतोहि इमे निश्चितार्थस्य वाचका: एकाकिन: न भवन्ति परं यया क्रियया सह प्रयुज्यन्ते तस्या: क्रियाया: अर्थे परिवर्तनं परिवर्द्धनं च कुर्वन्ति। अस्यायं भावो यत् पाश्चात्य-परम्परायां शब्दभेदा: अष्टौ भवन्ति।

तेषाम् उपर्युक्तेषु चतुर्षु अन्तर्भावो जायते। वस्तुत: आंग्लभाषायां व्याकरणस्य noun , pronoun , adjective एते सर्वे नाम-वर्गस्य अन्तर्गते आयान्ति। अमतइ इति तु आख्यात पर्याय। चतमचवेपजपवद इत्यस्य कार्यं विभक्ति प्रत्ययेन विधीयते। अधिप्रभृति-उपसर्ग-निपाताश्चापि विभक्त्यर्थस्य प्रत्यायनं कुर्वन्ति। अत: संस्कृत भाषायां

स्वतन्त्ररूपेण preposition इत्येतदर्थं पृथकम् वर्गस्य कल्पनं न अपेक्षते। adverb , conjection , interjection इति निपातानाम् एव अवान्तरभेदाः सन्ति। आंग्लभाषायाम् उपसर्ग-सदृशः कश्चन अन्यः वर्गः न कल्पितः। क्रियायाः विशेषार्थ-द्योतकोपसर्गार्थम् आंग्लभाषायां चतमअमतइ इति भेदः कल्पितः।

अनेन प्रकारेण पाश्चात्य परम्परायाः अष्टौ शब्दभेदाः वैदिक-परम्परायाः चतुर्षु भेदेषु अन्तर्भूताः सन्ति। शब्दभेदानां अन्यामपि व्याख्यां पश्यन्तु। चत्वारि वाक्परिमितापदानि अस्य मन्त्रस्य व्याख्यायां पतञ्जलिना उक्तं यत् चत्वारि शङ्गाणि-चत्वारि पद-जातानि नामाख्यातोपसर्गनिपाताश्च' अत्र चकारपदस्य किं तात्पर्यमस्ति ? चकारस्तु समुच्चयार्थकरूपे प्रसिद्धः'समुच्चयार्थकश्चकारः अन्यथा तत्रा चकारोपादानं व्यर्थमेव स्यात्'। अस्मिन् वाक्ये कस्य केन सह समुच्चयं प्रदर्शयति? नामाख्यातोपसर्ग-निपाताः इति पदं चतुष्पद द्वन्द्वोऽस्ति अत्र द्वन्द्वाभिहित-चतुर्विधानां पदानाम् अन्येन सह समुच्चयः चकारात् प्रतीयते। अन्यथा अयं चकारः प्रकृत-सन्दर्भे निरर्थकः स्यात्। अत्र नागेशभट्टेन अस्य वाक्यस्य व्याख्यानावसरे परा-पश्यन्ती-मध्यमा-वैखरीति वाचः चत्वारो भेदाः प्रदर्शिताः। हरिणाऽप्युक्तम्-

**वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।**
**अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्।।**

तत्रा श्रोत्रविषया वैखरी। मध्यमा हृदयदेशस्था पदप्रत्यक्षानुपपत्या व्यवहारकारणम्। पश्यन्ती तु लोकव्यवहारातीता। योगिनां तु तत्राापि प्रकृति-प्रत्ययविभागावगतिरस्ति। परायां तु नेति 'त्रय्या' इत्युक्तम्।

**स्वरूपज्योतिरेवान्तः परा वागनपायिनी।**

तस्यां दृष्टस्वरूपायामधिकारो निवर्त्तते।। इत्युक्तेः। अनेकतीर्थभेदायाः नामाख्यातादिवीणावेणुमृदङ्गशब्दादिरूपानेकभेदायाः आह-खल्वपिचत्वारि वाक्परिमिता पदानि इति। एतेषामेव समुच्चय प्रदर्शनार्थं भाष्यकारेण पतञ्जलि ना चकारः प्रयुक्तः। त्रयो अस्य इत्यत्र 'प्रकृत्यान्तःपादमव्यपरे' इति सूत्रेण प्रकृतिभावात् 'एङः पदान्तादति' इति सूत्रेण पूर्वरूपसन्धिर्न। त्रयो अस्य त्रयो पादाः इदमपि एकम् उदाहरणम्। भूतभविष्यद्वर्त्तमानकालाः एव वृषभस्य त्रयोपादाः सन्ति। द्वे शीर्षे। 'उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्' इति कोशादकारान्तःशीर्ष शब्दः क्लीबेऽस्ति तस्येदं रूपम्। द्वे शीर्षे-द्वौ शब्दात्मानौ नित्यः कार्यश्च।

वृषभस्य द्वे शीर्षे स्तः। शीर्षः=प्रधानः इति भाष्यकारेण प्रतिपादितम्। वस्तुतः भाषायाः प्रधानस्वरूपे द्वे स्तः। एको नित्यस्वरूपः अपरश्च अनित्यस्वरूपः 'व्यङ्ग्यव्यजकभेदेन'। यो हि नित्यस्वरूपः सः उत्पत्ति-विनाश-रहितः स एव शब्दब्रह्म-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**

ब्रह्मणो हि दशाद्वयी शास्त्रे प्रसिद्धा। एका विद्ययाऽप्रविभागदशाऽपरा चाविद्यया प्रविभागदशा। तत्रा यद्यपि प्रविभाग-दशायां ब्रह्म विविधविकल्पगोचरम्, तथाहि तस्यां दशायामेकस्यैव ब्रह्मणो धर्मधर्म्यादिरूपेण विकल्पः। जगद्रूपेण विवर्तावस्थायामपि

**ब्रह्म अनादिनिधनमेव। तच्च ब्रह्म शब्दतत्त्वं।**

तदेव वैयाकरणानां स्फोटः इति। स्फोटादेव अर्थज्ञानं भवति। स्फुटति प्रकाशते अर्थः अस्मात् इति स्फोटः। स्फोटो नित्योऽनित्यस्वरूपश्च।–

**स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः।**
**ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते।।**

इह नित्यत्वादात्मतत्त्वस्य स्फोटानां स्थितौ नास्ति कालपरिमाणवृत्तेः स्वल्पोऽपि व्यापारः। ध्वनिना तु संसृष्टं स्फोटस्य स्वरूपमुपलभ्यते यस्मात् तस्माद् ध्वनेः स्थितिकालः स्फोटोपलब्धिरूपः परिवर्तते। तेन च स्फोटविषयेण ग्रहणेनोपाधिनाभिन्नकालेन प्रकल्पितभेदाः स्फोटस्य द्रुतविलम्बिता वृत्तयस्त्रिभागोत्कर्षेण युक्ताः समाख्यायन्ते। अयं ध्वन्यात्मको रूपः। ध्वनयः उत्पद्यन्ते यद् ध्वनेः उच्चारणं तदेव ध्वनेः उत्पत्तिः अनन्तरं च ध्वनेः विनाशः भवति–

**शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः।**
**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते।।**

तद्यथा प्रकाशोजन्मान्तरमेव घटादीनां ग्रहणे हेतुः, अवतिष्ठमानस्तु ग्रहणप्रबन्धहेतुर्भवति, एवमभिवयक्ते शब्दे ध्वनिरुत्तरकालमनुवर्तमानो बुद्ध्यनुवृत्तिं शब्दविषयां विषय(नाभि) व्यक्तिबलाधानादुपसंहरति। तस्मादुपलक्षितव्यतिरेकेण वैकृतेन ध्वनिना संसृज्यमानोऽपि स्फोटात्मा ताद्रूप्यस्यानध्यारोपात् शास्त्रे ह्रस्वादिवत् कालभेदव्यवहारं नावतरति। उत्पत्ति-विनाशान्तराले ध्वनीनां क्षणिकसत्ता-प्रत्यक्षं दृश्यते। अतः भाषायाः इदं ध्वन्यात्मकं स्वरूपम् अनित्यम् इति प्रामाणिकं तथ्यम्–

**अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।**
**प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते।।**

इह द्वौ शब्दात्मानौ-नित्यः कार्यश्च। तत्रा कार्यो व्यावहारिकः पुरुषस्य वागात्मनः प्रतिबिम्बोपग्राही। नित्यस्तु सर्वव्यवहारयोनिः संहृतक्रमः सर्वेषामन्तः संन्निवेशी प्रभवो विकाराणामाश्रयः कर्मणामधिष्ठानं सुखदुःखयोः, सर्वत्राप्रतिहतकार्यशक्तिर्घटादिर्निरुद्ध इव प्रकाशः परिगृहीतभोगक्षेत्रावधिः, सर्वमूतीनामपरिणामा प्रकृतिः, सर्वप्रबाधरूपतया सर्वप्रभेदरूपतया च नित्यप्रवृत्तप्रत्यवभासस्वप्नप्रबोधानुकारी प्रवृत्तिनिवृत्तिपदाभ्यां पर्जन्यवद्

दवाग्निवच्च प्रसवोच्छेदशक्तियुक्तः सर्वेश्वरः सर्वशक्तिर्महान् शब्दवृषभः, तस्मिन् खलु वाग्योगविदोविच्छिद्याहङ्कारग्रन्थीनत्यन्तविनिर्भागेण संसृज्यन्ते। अनेन ज्ञायते यत् स्फोटो ध्वनिश्च भाषारूपवृषभस्य द्वे शीर्षे भवत इति तात्पर्यम्।

सप्त हस्तासो अस्य। हस्तास इति देवास इतिवत् छान्दसं रूपम्। अयं हस्त शब्दस्य प्रथमा बहुवचनान्तरूपम्। अस्य वृषभस्य भुजा सप्त। हस्तरूपेण सप्त विभक्तीनामेव परिगणनं विहितम्। यतोहि संस्कृत-भाषायाम् प्रथमातः सप्तमी-पर्यन्तं सप्त विभक्तयः सन्ति। प्रति विभक्ति त्रीणिविचनानि सन्ति। एवं पदानां संख्या एकविंशतिः भवति। इत्थं विभक्तयः सप्त, कारकाणि च षड् इति सर्वैरेव स्वीक्रियते। विभक्तिकारकयोः मध्ये मौलिको भेदः अस्ति। अत्र तु विभक्तीनामेव यतोहि सप्त हस्तासो अस्य इति कथितम्। त्रिधा बद्धः -त्रिषु स्थाने बद्ध उरसि कण्ठे शिरसीति। कण्ठ इत्यनेन मुखान्तर्गतकण्ठादिस्थानमुपलक्ष्यते। यद् भाषारूपी वृषभः त्रिषु स्थलेषु निबद्धः अनेन ध्वनीनाम् उच्चारण-प्रक्रिया वर्ण्यते। यदा वयं विचाराभिव्यक्तये वाक्यप्रयोगं कुर्मः तदा मनसि विचारव्यक्तये इच्छा जागर्ति। इयं प्रक्रिया पाणिनिना इत्थं प्रदर्शिता-

**आत्मा बुद्ध्या समेत्यर्थान्मनो युङ्क्ते विवक्षया।**
**मनः कायाग्निमाहन्ति सः प्रेरयति मारुतम्।।**

अस्यायम् अभिप्रायो यद् आत्मा स्वबुद्धिं प्रयोज्य विवक्षितार्थानां संकलनं करोति। ततः परं वयं विचारं कुर्मः यत् किं कथनीयम्। अस्माकं कथनीयं विषयः अर्थः वा भवति। तदा आत्मा मनः प्रबोधयति यद् अस्य अर्थस्य विषयस्य वा वाक्यानां माध्यमेन उपस्थापनं कुरु। आत्मनः प्रेरितों मनः क्रियावान् भूत्वा शरीरस्थं तेजम्श्शक्तिम् प्रेरयति। अग्निना प्रेरितो शरीरस्थो वायुः क्रियावान् भवति। अनेनैव वायुना उच्चारणे क्रियासम्पन्ना भवति। वायोः प्रथमः उद्गमस्थलम् उर, तत्पश्चाद् वायुः कण्ठदेशम् आगच्छति। अतः कण्ठं द्वितीयस्थानम् अस्ति। कण्ठतः उपरितने भागे ताल्वादयः विभिन्नानि उच्चारण-स्थानानि सन्ति। तानि वयं 'शिरस् इति कथयामः। इमामेव मूर्धा इति नाम्ना जानीमः। इदं तृतीयं स्थानम् अस्ति। एतेषु त्रिषु स्थलेषु वायोः गतिना ध्वनीनाम् उच्चारणं भवति। उक्तमपि -''त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसि।'' अनेन प्रकारेण भाष्यकारेण प्रतिपादितम्। अयं वृषभः उच्चस्वरेण घोषणां करोति(रोरवीति) यन्महादेवो मर्त्येषु अवतारं गृहीतवान्। मह्यते पूज्यते इति महः। कर्मणि घञर्थे कविधानमिति कः। महच्छब्द पर्यायोऽयं महशब्दोऽस्मादेव प्रामण्यादित्यवधेयम्। महान् परब्रह्मस्वरूपः देवोऽन्तर्यामिरूपः परमात्मा। वैयाकरणानां दृष्ट्या शब्दब्रह्म एव परमतत्त्वम्। वयं तु मरणधर्माः साधारणमानवाः स्म। जातस्य हि ध्रुवो मृत्युः। इदं भस्मान्तं शरीरं। इत्थं मर्त्येषु परमात्मावतारः प्रवेशो वा कथम् ? पतञ्जलिना उक्तम् यत्- महान् देवः शब्दः। मर्त्यां-मरणधर्माणो मनुष्यास्तानाविवेश।

''महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्''। तेषां मतम् अस्ति यद् व्याकरणाध्ययनं विधाय शब्दानां सुष्ठु प्रयोगेन परमात्मनः सामीप्यं प्राप्तुं योग्याः भवामः। किमिदं परमात्मनः साम्यम्? मानवेषु भाषा माध्यमेन दैवीशक्तेः विकासो जायते।

मानवजीवनं अल्पकालिकं विद्यते। तस्य शक्तयः निर्धारिताः सन्ति। तथापि भाषायाःमाध्यमेन मानवस्य कियान् विकासः संञ्जातः। साम्प्रतं विश्वस्मिन् अनेकाः सामान्याः प्रायोगिकाः वा विद्याः विकासं गताः। मानवेन अप्रत्याशितं ज्ञानं विज्ञानं च वृद्धिं प्रति नीयते। विद्वांसः निरन्तरं ज्ञानसाधनायां रताः। अनेन प्रकारेण मानवसंस्कृतेः भव्यनिर्माणं जायते। एतदेव दैवीशक्तेः विकासः अनुप्रवेशो वा। जन्मतः मानवः पशुरेव भवति। आहार-निद्रा-भय-मैथुनप्रभृतिगुणेषु मानवे पशौ च अभेदः।

उक्तमपि- आहारनिद्राभयमैथुनं च, सामान्यमेतत् पशुभिर्नराणाम्। तथापि मानव सविधेः अमूल्या निधिरस्ति भाषा। मानवः प्रयत्नेन भाषाम् अर्जयति। अनया भाषया-मानवः ज्ञानसागरम् अधिगच्छति। सः सभ्यो संस्कृतो भूत्वा जीवनम् आनन्दप्रदं प्रकल्प्य पशुत्वं च परित्यज्य देवत्वमार्गम् अधिगन्तुं समर्थो भवति। उक्तमपि पतञ्जलिना- एकः शब्दः सुज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवती'ति। भाषा एव पशुत्वम् अपनेतुं देवत्वं च प्रदातुं समर्थास्ति। अस्मिन् प्रसङ्गेः आचार्य दण्डी स्वीये काव्यादर्शे उक्तवान् यत् -

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारान् न दीप्यते।।**

दण्डिना अत्रोक्तं यत् शब्दो (भाषा) ज्योतिः अखिलब्रह्माण्डे प्रकाशं वितरति। प्रकाशः=असदिग्धज्ञानम्। प्रकाशाभावे पदार्थाः दृष्टिपथं न आयान्ति। अल्पप्रकाशे च पदार्थाः अस्पष्टाः संदिग्धा वा भवन्ति। वस्तुतः सूर्यस्य रश्मयः वाह्य-तमसा अपाकरणम् कुर्वन्ति परम् आन्तरिक-अज्ञानरूप-तमसः अपाकरणं तु भाषा एव करिष्यति नान्यः। उक्तमपि महाकविदण्डिना- इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।। शिष्टानुशिष्टानाम् इत्यस्यायमभिप्रायो यत् पाणिनिप्रभृतिभिः शास्त्रकारैरन्वाख्यातानामित्यर्थः। भाषायाः विद्वत्सम्मतं शास्त्रसम्मतं मानकस्वरूपं च। शिष्टानाम् अर्थात् भाषायाः मानकेतर स्वरूपम्। लोके मानकेतर स्वरूपस्य प्रयोगः प्रचुरं भवति। अस्मिन्नेव स्वरूपे क्षेत्रीयाः भाषा वाचश्च विद्यन्ते। अनेनैव भाषायाः स्वरूपेण प्रायो लोकव्यवहाराः सम्पाद्यन्ते। अनेन ज्ञायते यद् भाषया अस्माकं जीवनस्य सर्वे लोकव्यवहाराः सम्पूर्णतां यान्ति। अशिक्षिताः जना अपि भाषया एव लोककार्याणि सम्पादयितुं समर्थाः, नान्यथा। यद्यपि तेषां भाषा व्याकरणानुसारं न भवति। अनेनैव कारणेन भारतीयैः मनीषिभिः वाचः सरस्वती देवी अस्ति इति स्वीकृत्य तस्याः

उपासनायाः विधानं विहितम् वाचमुपासस्व भाषायाः देवी वस्तुतः सर्वासां विद्यानां देवी अस्ति। अतः दण्डिना काव्यादर्शे मङ्गलाचरणे विद्यादेव्याः स्तुतिः कृता –

**चतुर्मुख-मुखाम्बोज वनहंसवधूर्मम।**
**मानसे रमतां नित्यं सर्वशुक्ला सरस्वती।।**

'गीर्वाग् वाणी सरस्वती' इमानि वाङ्नामानि वैज्ञानिक-दृष्ट्या भाषाया महत्त्वं विज्ञाय एव तां देवीं मत्वा सर्वैरेव उपासना विहिता न तु अन्धविश्वासेन अथवा परम्परया।

**सन्दर्भाः**

१. वाक्यपदीयम् ब्रह्मकाण्ड:१२४
२. वाक्यपदीयं ब्रह्मकाण्ड:१२४
३. ऋग्वेद १०.१३.३
४. ऋग्वेद १०.१७७.२
५. ऋग्वेद ३.५३.१५
६. ऋग्वेद १.१६४.४५
७. यजुर्वेद ३४.१७
८. ऋग्वेद १०.१२५.८
९. हरिवृषभटीका,वाक्यपदीयंब्रह्मकाण्डम्१२०
१०. अम्बाकर्त्रीटीका,वाक्यपदीयं ब्रह्मकाण्डम् १२०
११. ऋग्वेद१०.१२५.३
१२. ऋग्वेद१०.१२५.३
१३. वाक्यपदीयं ब्रह्मकाण्ड११८
१४. ऋग्वेद१.१६४.४२
१५. सामवेदः ५२५,८५९
१६. अथर्ववेद:१२.१.४५
१७. अथर्ववेदः २१.१०.२१
१८. ऋग्वेद ४.५८.३
१९. महाभाष्यम् पस्पशण्पृ० ३०
२०. साधर्म्यमुपमा भेदे काव्यप्रकाश दशमोल्लास
२२. काव्यप्रकाश दशमोल्लास
२३. कुवलयानन्द

२४. महाभाष्यम् पस्पशाह्निक पृ. ३०
२५. महाभाष्यम् पस्पशाह्निक पृ. ३०
२६. महाभाष्यम् पस्पशाह्निक पृ. ३०
२७. महाभाष्यम् पस्पशाह्निक उद्योत पृ.३१
२८. महाभाष्यम् पस्पशाह्निकम् पृ. ३०
२९. वाक्यपदीयं ब्रह्मकाण्डम् १४२
३०. महाभाष्यम् पस्पशाह्निकम् उद्योत पृ. ३३
३१. वाक्यपदीयं ब्रह्मकाण्ड १४२
३२. महाभाष्यम् पस्पशाह्निकम् उद्योतः पृ. ३३
३३. पा.अ. ६.१.११३
३४. पा.अ. ६.१.१०७
३५. अमरकोश मनुष्यवर्गः श्लोकसं० ९५
३६. महाभाष्यम् पस्पशाह्निकम् पृ. ३०
३७. महाभाष्यम् पस्पशाह्निकम् प्रदीपः पृ. ३१
३८. वाक्यपदीयं, ब्रह्मकाण्डः
३९. वाक्यपदीयं, ब्रह्मकाण्डः १
४०. वैयाकरणभूषणसारः स्फोटनिर्णय
४१. वाक्यपदीयम् ब्रह्मकाण्डः ७६
४२. वाक्यपदीयम् ब्रह्मकाण्डः ७६
४३. वाक्यपदीयम् ब्रह्मकाण्डः ७७
४४. वाक्यपदीयम् ब्रह्मकाण्डः ७७
४५. वाक्यपदीयम् ब्रह्मकाण्डः १३०
४६. वाक्यपदीयम् ब्रह्मकाण्डः १३०
४६. महाभाष्यम् पस्पशाह्निकम् पृ. ३०
४७. महाभाष्यम् पस्पशाह्निकम् पृ. ३०
४८. महाभाष्यम् पस्पशाह्निकम् उद्योत पृ.३१
४९. पाणिनीयशिक्षा ६
५०. महाभाष्यम् पस्पशाह्निकम् पृ. ३०
५१. महाभाष्यम् पस्पशाह्निकम् पृ. ३०
५२. महाभाष्यपस्पशाह्निकउद्योतः पृ.३१
५३. महाभाष्यपस्पशाह्निक उद्योत पृ.३०-३१

५४. पंञ्चतन्त्रम्
५५. महाभाष्यम् पस्पशाह्निकम् पृ.२८
५६. काव्यादर्शः १.४
५६. काव्यादर्शः
५७. काव्यादर्शः

# अष्टध्याय्यां महाभाष्य के प्रथम आह्निक में "शब्द"-स्वरूप-विवेचन

**विनोद कुमार दीक्षित**

विभागाध्यक्ष,

संस्कृत एवं प्राकृत भाषा विभाग (स्नातकोत्तर एवं शोध)

बाबा राघव दास भगवान दास पी.जी. कालेज, बरहज, देवरिया, उ.प्र.

पाणिनीय व्याकरण की परम्परा में मुनित्रय में से एक महर्षि पतञ्जलि का महाभाष्य व्याकरण-प्रक्रिया एवं व्याकरण-दर्शन के बीच एक सेतु के रूप में माना जा सकता है। पतञ्जलि ने सूत्रों और वार्तिकों के अध्ययन एवं विवेचन को एक सरस एवं सरल संवाद-शैली के माध्यम से गंभीर दार्शनिक तथ्यों की ओर मोड़ने का जो कार्य किया, वह अप्रतिम है। इसी लिए 'पतञ्जलि' की गणना भारत के अग्रगण्य विद्वानों में की जाती है।

पतञ्जलि का जन्मस्थान या निवास स्थान 'गोनर्द' (कश्मीर) अथवा 'गोंडा' (उत्तरप्रदेश) माना जाता है। कतिपय पंडितों का मानना है कि गोनर्द अवधप्रदेश का गोण्डा भी हो सकता है। वेबर इसे मगध के पूर्व में अवस्थित मानते हैं। कनिंघम का कहना है कि, गोनर्द गौड है। वस्तुतः पतञ्जलि आर्यावर्त का अभिमान रखने वाले प्रतीत होते हैं। अतः उनका जन्म आर्यावर्त ही में कहीं न कहीं होना चाहिए। उस दृष्टि से गोनर्द का विदिशा और उज्जैन के बीच किसी स्थान पर होना उचित प्रतीत होता है। प्रोफ़ेसर सिल्व्हां लेव्ही भी लग-भग इसी मत का पोषक हैं। पर उन्होंने यह भी बताया है कि विदिशा के समीपस्थ सांची के बौद्ध-स्तूप को, आसपास के प्रायः सभी गांवों के द्वारा कुछ न कुछ दान दिए जाने का उल्लेख मिलता है, किन्तु वहाँ गोनर्द का उल्लेख नहीं मिलता।

पतञ्जलि के अनेक अन्य नाम प्रसिद्ध हैं - यथा, गोनर्दीय, गोणिकापुत्र, नागनाथ, अहिपति, चूर्णिकार, फणिभृत्, शेषाहि, शेषराज और पदकार। रामचन्द्र दीक्षित द्वारा प्रणीत ' पतञ्जलि-चरितम्' में पतञ्जलि को शेष का अवतार माना गया है। उपर्युक्त में से गोणिकापुत्र नाम से सिद्ध होता है कि इनकी माता का नाम 'गोणिका' था। पर इनके पिता का नाम ज्ञात नहीं है।

भारतीय व पाश्चात्य विद्वानों के मतानुसार पतञ्जलि का समय १५० ई. पू. माना जाता है। पर युधिष्ठिर मीमांसक ने ज़ोर देकर बताया है कि पतञ्जलि विक्रम संवत् से दो हज़ार वर्ष पूर्व हुए थे। यद्‌यपि इस सम्बन्ध में अभी तक कोई निश्चित प्रमाण प्राप्त नहीं हो सका है, पर अन्त:साक्ष्य के आधार पर इनका समय-निरूपण कोई कठिन कार्य नहीं है। महाभाष्य में ही वर्णन मिलता है कि पुष्यमित्र ने एक विशाल यज्ञ का आयोजन किया था, जिसमें अनेक पुरोहित थे और जिनमें पतञ्जलि भी शामिल थे। वे स्वयं ब्राह्मण याजक थे और इसी कारण से उन्होंने क्षत्रिय याजक पर कटाक्ष किया है- यदि भवद्विध: क्षत्रियं याजयेत्। पुष्यमित्रो यजते, याजका: याजयति। तत्रा भवितव्यम् पुष्यमित्रो याजयते, याजका: याजयन्तीति यज्वादिषु चाविपर्यासो वक्तव्य:। इससे पता चलता है कि पतञ्जलि का आविर्भाव कालिदास के पूर्व व पुष्यमित्र के राज्यकाल में हुआ था।

'मत्स्यपुराण' के अनुसार पुष्यमित्र ने ३६ वर्षों तक राज्य किया था। पुष्यमित्र के सिंहासन पर बैठने का समय १८५ ई. पू. है और ३६ वर्ष कम कर देने पर उसके शासन की सीमा १४९ ई. पू. निश्चित होती है। गोल्डस्टुकर ने महाभाष्य का काल १४० से १२० ई. पू. माना है। डॉ. भांडारकर के अनुसार पतञ्जलि का समय १५८ ई. पू. के लगभग है, पर प्रो. वेबर के अनुसार इनका समय कनिष्क के बाद, अर्थात् ई. पू. २५ वर्ष होना चाहिए। डॉ. भांडारकर ने प्रो. वेबर के इस कथन का खण्डन कर दिया है। बोथलिंक के मतानुसार पतञ्जलि का समय २००० ई. पू. है। इस मत का समर्थन मेक्समूलर ने भी किया है। कीथ के अनुसार पतञ्जलि का समय १४०-१५० ई. पू. है।

'महाभाष्य' ८४ अध्यायों (आह्निकों) में विभक्त है। इन आह्निकों में पतञ्जलि ने पाणिनि के 'अष्टाध्यायी' के कुछ चुने हुए सूत्रों पर भाष्य लिखा है, जिसे 'व्याकरण महाभाष्य' का नाम दिया गया। कात्यायन ने लगभग बारह सौ सूत्रों पर वार्तिक लिखे जो पाणिनि - सूत्र पर सबसे पुरानी टीका मानी जाती है। तत्पश्चात् पतञ्जलि ने पाणिनि के सूत्रों का विवेचन करने वाली एक विस्तृत टीका लिखी। यही टीका 'व्याकरण महाभाष्य' के नाम से प्रसिद्ध है। जिन बारह सौ सूत्रों पर कात्यायन के वार्तिक हैं, उन सबका और जिन पर वार्तिक नहीं हैं, ऐसे लगभग ४०० सूत्रों का अर्थात् कुल १६०० सूत्रों का इसमें विवेचन है। पतञ्जलि ने अवशिष्ट २४०० सूत्रों का विवेचन करने की आवश्यकता नहीं समझी। 'महाभाष्य' वैसे तो व्याकरण का ग्रन्थ माना जाता है, किन्तु इसमें कहीं-कहीं राजाओं-महाराजाओं एवं जनतन्त्रों के घटनाचक्र का विवरण भी मिलते हैं। पर हम यहाँ महाभाष्य के प्रथम आह्निक में प्रतिपादित "शब्द"-स्वरूप पर ही संक्षेप में कुछ बात रखना चाहेंगे -

सागरोपम इस महनीय कृति के आरंभिक क्रम में अर्थात् अपने विश्रुत आकर ग्रन्थ महाभाष्य के प्रथम आह्निक (जो "पस्पशा" के नाम से जाना जाता है) में 'पतञ्जलि' ने "शब्द" के स्वरूप का बड़ा ही सरल और मनोरम ढंग से विवेचन किया है। इस विवेचन से यह भी स्पष्ट हो जाता है कि अपने काल तक विकसित प्राच्य-विद्याओं से वे पूरी तरह अवगत हो चुके थे।

महाभाष्य का आरम्भ "अथ शब्दानुशासनम्" से होता है जिसको लेकर यह मतभेद है कि यह पाणिनि का है न कि पतञ्जलि का। अनेक साक्ष्य इस बिन्दु पर यह संकेत करते हैं कि यह वाक्य पतञ्जलि का ही है। पतञ्जलि ने स्वयं यह स्पष्ट किया है कि यहाँ लौकिक और वैदिक दोनों प्रकार के शब्दों का अनुशासन किया जाना है। लौकिक शब्दों में गौ, अश्व, पुरुष, शकुनि अर्थात् पशु, पक्षी एवं मनुष्य आदि को लिया गया है। और वैदिक शब्दों में 'अग्निमीले पुरोहितम्' आदि वैदिक मन्त्रों को लिया गया है। पतञ्जलि की भाषा में - "लौकिकास्तावत् - गौरश्वः, पुरुषो, हस्ती, शकुनिर्मृगो, ब्राह्मण इति। वैदिकाः खल्वपि - शन्नो देवीरभीष्टये, इषे त्वोर्ज्जे त्वा, अग्निमीडे पुरोहितम्, अग्न आ याहि वीतय इति।

इसके पश्चात् पतञ्जलि ने अपनी सरस संभाषण शैली में प्रश्न उपस्थित किया है - अथ गौरित्यत्र कः शब्दः ? इस प्रश्न अथवा शंका के मूल में वस्तुतः यह तथ्य प्रतीत होता है कि लोक में शब्द और अर्थ का अभेद से व्यवहार होता है। गौ नामक पदार्थ के उपस्थित होने पर जब यह जिज्ञासा होती है कि यह क्या है, तब यह प्रत्युत्तर होता है कि यह 'गौ' है। यह पदार्थ का संकेत उद्देश्य है और गौ विधेय है। दोनों का सम्बन्ध समानाधिकरण से है। इस स्तर पर पतञ्जलि ने इस रूप में विकल्पों को प्रस्तुत किया है - १. "किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपम् स शब्दः" (अर्थात् क्या जो गलकम्बल, पूंछ, कुहान, खुर, सींग वाला पदार्थ है, वह शब्द है?)। प्रत्युत्तर में स्वयं पतञ्जलि ने कहा है - द्रव्यं नाम तत् (वह तो द्रव्य है)। २. यत्तर्हि तदिङ्गितं, चेष्टितं, निमिषितमिति स शब्दः। तो फिर क्या जो संकेत करना (चक्षु आदि से हृदय के भाव का प्रकाशन), चेष्टा (शरीर का हलचल) एवं आंख का झपकना है, वह शब्द है? प्रत्युत्तर में उनका कहना है - क्रिया नाम सा (वह तो क्रिया है)। यत्तर्हि तच्छुक्लो, नीलः, कपिलः, कपोत इति स शब्दः। (क्या जो शुक्ल, नील, कपिल, कपोत है, वह शब्द है। (नेत्याह। गुणो नाम सः।) नहीं, वह तो गुण है।) फिर कहते हैं - यत्तर्हि तद्भिन्नेष्वभिन्नं, छिन्नेष्वच्छिन्नं, सामान्यभूतं स शब्दः (क्या जो भिन्न-भिन्न पदार्थों में एकरूप है और जो उनके नष्ट होने पर भी नष्ट नहीं होता, सब में साधारण, अनुगत है, वह शब्द है।) पतञ्जलि का प्रत्युत्तर है - नेत्याह। आकृतिर्नाम सा (नहीं वह तो आकृति है।) अन्त में उन्होंने शास्त्र और लोक दोनों को महत्त्व देते हुए कहा है-येनोच्चारितेन

सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः (जो उच्चारित ध्वनियों से अभिव्यक्त हो कर गल कम्बल, पूंछ, कुहान, खुर, सींग वाले गो-व्यक्तियों का बोध कराता है, वह शब्द है)। अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते। तद्यथा - शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्ययं माणवक इति ध्वनिं कुर्वन्नेवमुच्यते। तस्माद् ध्वनिः शब्दः। अर्थात् लोक व्यवहार में जिस ध्वनि से अर्थ का बोध होता है, वह शब्द है। जैसा कि ध्वनि करते हुए एक बालक को उद्देश्य कर कहा जाता है - शब्द करो, शब्द मत करो, यह बालक शब्दकारी है। अतः ध्वनि शब्द है)।

संक्षेप में स्पष्ट करते हुए कहा जा सकता है कि - 'गौ' शब्द का वर्णन करते हुए भाष्यकार कहते हैं कि जब 'गौ' शब्द का उच्चारण किया जाता है तब शङ्का होती है कि वास्तव में उसमें शब्द क्या होता है? स्पष्टीकरण में पतञ्जलि कहते हैं कि 'गौ' के शारीरिक अवयव खुर, सींग को शब्द नहीं कहा जाता, क्योंकि इसे द्रव्य कहते हैं। इसकी शारिरिक क्रियाओं को भी शब्द नहीं कहते, क्योंकि इसे क्रिया कहते हैं। इसके रंग (शुक्ल, नील) को शब्द नहीं कहते, क्योंकि यह तो गुण है। यदि दार्शनिक दृष्टिकोण से यह कहा जाय कि जो भिन्न-भिन्न पदार्थों में एकरूप है और जो उसके नष्ट होने पर भी नष्ट नहीं होता, सब में साधारण और अनुगत है, वह शब्द है तो ऐसा नहीं है, क्योंकि इसे जाति कहते हैं।

वास्तविक रूप में जो उच्चरित ध्वनियों से अभिव्यक्त होकर खुर, सींग वाले गौ का बोध करता है, वह शब्द है। अर्थात् लोक-व्यवहार में जिस ध्वनि से अर्थ का बोध होता है, वह 'शब्द' कहलाता है। सार्थक ध्वनि शब्द है। इसी शब्दार्थ-बोधन को भर्तृहरि ने 'स्फोट' कहा है। शब्द वह है, जो उच्चरित ध्वनियों से अभिव्यक्त होता है और अभिव्यक्त होने पर उस अर्थ का बोध कराता है।

वस्तुतः पतञ्जलि का "शब्द"-स्वरूप विवेचन अनेक दृष्टिकोणों से महत्त्वपूर्ण है। भाषा सम्पूर्ण जगत् के व्यवहार, क्रियाकलाप, एवं समस्त विद्याओं के विकास का मूल आधार है जिसे पतञ्जलि के परवर्ती आचार्य भर्तृहरि ने वाक्यपदीय की प्रथम कारिका में ही कहा है -

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**

यह विवेचन सम्पूर्ण विश्व की भाषाओं के सन्दर्भ में प्रासंगिक और उपयोगी है। भाषा-विज्ञान एक महत्त्वपूर्ण अन्तर्राष्ट्रीय विषय के रूप में विकसित और प्रतिष्ठित हुआ है जिसके प्रतिपाद्य बिन्दुओं में से "शब्द-अर्थ स्वरूप" एवं "शब्द-अर्थ सम्बन्ध" एक महत्त्वपूर्ण बिन्दु के रूप में है। भाषाविज्ञान की नींव में संस्कृत (वैदिक एवं लौकिक) की भूमिका विशेष रूप से प्रभावशाली मानी गयी है और

पतञ्जलि जैसे आचार्य का योगदान उस में भी विशिष्ट है।

पतञ्जलि के इस 'शब्द-स्वरूप "विवेचन का प्रभाव आगे चलकर साहित्य-शास्त्र के आचार्यों के ऊपर भी स्पष्ट दिखाई पड़ता है। उदाहरण के लिए वक्रोक्तिजीवितम् के रचनाकार आचार्य कुन्तक ने कहा है - शब्दार्थयोरेकयोगक्षेमत्वादैक्येन व्यवहार:, यथा गौरिति शब्द:, गौरित्यर्थ इति।

एक विचारणीय बिन्दु यह भी है कि पतञ्जलि ने "शब्द-स्वरूप " विवेचन के प्रसंग में लोक-व्यवहार एवं लोक-भाषा को पर्याप्त महत्त्व दिया है। उदाहरण के लिए उनकी संवाद-शैली में पाणिनि- सूत्र २.४.५६ पर महाभाष्य में प्रस्तुत यह रोचक प्रकरण -

**वैयाकरण** - इस रथ का "प्रवेता" कौन है ?

**सूत**- आयुष्मान्, मैं इस रथ का "प्राजिता" हूँ (हांकने वाला हूँ )। वैयाकरण - "प्राजिता" तो अपशब्द है।

**सूत** - देवानाम् प्रिय आप "प्राप्तिज्ञ" हैं, "इष्टिज्ञ" नहीं। यह प्रयोग इष्ट है। यही रूप अभिलषित है।

**वैयाकरण** - अहो, यह दुष्ट सूत (दुरुत) हमें बाधा पहुंचा रहा है।

**सूत** - आपका "दुरुत" प्रयोग ठीक नहीं है। "सूत" शब्द "सू" धातु (प्रसव, उत्पन्न करना से निष्पन्न हुआ है, वे (बिनना) धातु से नहीं। यदि आप को निन्दा अभीष्ट हो तो "दु:सूत'' शब्द का प्रयोग करें। आचार्य बलदेव उपाध्याय ने उपर्युक्त स्थल पर स्पष्ट किया है कि जो नियम सूत्रों में दिए गए हैं उनके अपवाद या उनसे अधिक नियम "इष्टि" कहे जाते हैं। इष्टि का अर्थ है - मंजूरी, स्वीकृति, मानना। इन्हें जानने वाला इष्टिज्ञ होता है।

इस सन्दर्भ में पतञ्जलि का मन्तव्य व्याकरण-जगत् में सर्वमान्य सा हो गया। अनेक काव्यशास्त्रकारों एवं काव्यकारों ने भी तदनुसार अपना सिद्धान्त और व्यवहार प्रस्तुत किया। महर्षि पतञ्जलि ने शास्त्र और लोक में एक सामञ्जस्य स्थापित करने का स्तुत्य प्रयास किया। यह भी उल्लेखनीय है कि उन्होंने "शब्द'' -स्वरूप विवेचन में जो तथ्य प्रस्तुत किया है उनसे स्पष्ट है कि अपने काल तक उदित और विकसित दार्शनिक विचारों से वे भली भाँति अवगत थे। आगे चलकर आचार्य भर्तृहरि और अन्य वैयाकरण-दार्शनिकों को शब्द-स्वरूप, शब्द-अर्थ-सम्बन्ध तथा अन्य गूढ़ बिन्दुओं पर विवेचन करने के लिए एक उचित एवं महत्त्वपूर्ण आधारशिला महर्षि पतञ्जलि ने प्रस्तुत किया। उनका योगदान संस्कृत व्याकरण-शास्त्र के इतिहास में अविस्मरणीय है।

## सन्दर्भ

१. महाभाष्य ३.३.१४७
२. महाभाष्य ३.१.२६
३. पाणिनीज् ग्रामेटिक, बोथलिंक
४. सं.वाण्कोश (द्वितीय खण्ड), कीथ, पृष्ठ ३६०-३६३
५. महाभाष्य - प्रथम आह्निक (पतञ्जलि )
६. वाक्यपदीय -प्रथम काण्ड (भर्तृहरि )
७. वक्रोक्तिजीवित (कुन्तक )
८. आचार्य बलदेव उपाध्याय - संस्कृत शास्त्रों का इतिहास - पृष्ठ ४५९-६०

# परिभाषेन्दुशेखरस्य बाधबीजप्रकरणे भाष्यानुचिन्तनस्य समीक्षात्मकमध्ययनम्

–गिरिधारी पण्डा

परिभाषाजगति नागेशभट्‌ट: परिभाषेन्दुशेखरं विनिर्माय शब्दशास्त्राब्धौ स्वकीयमनन्यं वैशिष्ट्यं प्रतिपादयति। तद्विरचित: एष: ग्रन्थ: शब्दशास्त्रजगति अनन्य: अनुपमश्च। व्याडित आरभ्य 'शेषाद्रिशुद्धि' इति यावत् ये खलु परिभाषाकर्त्तार: सन्ति, तेषां परिभाषावचनानि पुरस्कृत्य नागेशभट्टेन केवलं तदीयं व्याख्यानं साधितं परिभाषेन्दुशेखरे। परिभाषेन्दुशेखरे व्याख्यातानि परिभाषावचनानि नागेशेन न विरचितानि, नापि तेन समुल्लिखितानि, केवलं पूर्वसूरिणां परिभाषाकर्तृणां वचनान्यवलम्ब्य व्याख्यानानि साधितानीत्याशय:। यदुक्तम्-प्राचीनवैयाकरणतन्त्रे वाचनिकानि पाणिनीयतन्त्रे ज्ञापकन्याय-सिद्धानि परिभाषावचनानि तानि ग्रन्थोक्तदिशा व्याख्यातानि वर्त्तन्ते' (परिभाषेन्दुशेखर: पृ-२, वि.मि.)। प्रक्रियात्मकक्रियाया: उपगमनाय सूत्रोपगतवचनानां तात्पर्यसाधनाय च नागेशभट्ट: परिभाषेन्दुशेखरे तस्य व्याख्यानं शास्त्रसम्पादक-प्रकरणम्, बाधबीज-प्रकरणम्, शेषार्थकथन-प्रकरणञ्चेति त्रिभि: प्रकरणै: संशाधितम्। प्रथमप्रकरणे शास्त्रस्य रक्षा, द्वितीयप्रकरणे लक्ष्यस्य शास्त्रस्य च प्रवृत्तिसिद्धि:, तृतीयप्रकरणे प्रयोगविज्ञानञ्च अवशिष्टम् इति भावेन प्रतिपादनं विहितं विद्यते। तत्रा सर्वत्र भाष्योक्तमार्गमाश्रित्य नागेशेन व्याख्यानं विहितम्। परिभाषाणां स्वरूपचिन्तने, प्रत्याख्याने, तात्पर्यविचारे, प्रवृत्त्यप्रवृत्तिस्थलविशेषनिरूपणे सिद्धान्तसाधने च भाष्योक्ति: प्रमाणत्वेन अङ्गीक्रीयते। परिभाषाणां तात्पर्यसाधने वहुषु स्थलेषु भाष्योद्धराणानि स्वीकृतानि नागेशेन। त्रिषु प्रकरणेषु केवलं बाधबीजप्रकरणम् अवलम्ब्य अत्र प्रतिपादनं गृहीतं जायते। प्रकरणेऽस्मिन् चतुस्त्रिंशत् (३४) परिभाषा: व्याख्याता: सन्ति। परिभाषाणामासां व्याख्यानावसरे त्रयोदशपरिभाषासु अष्टाविंशतिस्थलानि निरूपितानि विद्‌यन्ते, यत्र भाष्योक्तवचनमाश्रित्य विचार उपपादित:, भाष्योक्तरहस्यमुररीकृत्य तात्पर्यसाधनं विहितम्, भाष्यसिद्धान्तमादाय स्वसिद्धान्त: समुपस्थापित:, भाष्योक्तमार्गेण च समाधानं विहितं महामतिना नागेशेन। प्रसङ्गस्यास्य विचारावसरे नागेशेन भाष्ये स्पष्टम्, भाष्ये दर्शनात्, भाष्यसम्मतमार्ग एव युक्त, भाष्यकैयटयो: स्पष्टम्, भाष्ये ध्वनितम्, ध्वनितं चेदं भाष्ये, भाष्ये तिरस्कृतम्, भाष्योक्ता भज्येत, भाष्ये उक्तम्, स्पष्टं चेदं भाष्ये, भाष्ये स्पष्टैषा इत्यादिभिरुक्तिभि: भाष्यचिन्तनं विधाय भाष्याश्रयणं विहितम्।

तासां त्रयोदशपरिभाषाणामुल्लेखपुरस्सरं तेष्वष्टाविंशतिस्थलेषु नागेशस्य भाष्यचिन्तनं पुरस्कृत्य यदाश्रयणं विहितं नागेशेन, यः विचारश्चोपपादितः, तेषां समेषामत्र समीक्षात्मकपद्धत्या यथामति प्रतिपाद्यते। परिभाषानुसारं भाष्यानुचिन्तनानि यथाक्रमम्-

**१. परिभाषा - सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव।। पृ. ४० -**

भाष्यचिन्तनम्- तत्रा कृते यदि पूर्वप्राप्तिरस्ति, तर्हि तदपि भवत्येवेति पुनः प्रसङ्गविज्ञानसिद्धिरिति विप्रतिषेधसूत्रे भाष्ये स्पष्टम्। 'न ब्राह्मणं हन्यादि' त्यादौ जात्याश्रयसफलव्यक्तिविषयत्वार्थमेव जातिपक्षाश्रयणस्य भाष्ये दर्शनात्।

अत एव 'सरूप' सूत्रे भाष्ये जातौ पदार्थेनावयवेन साफल्येन विधिप्रवृत्तेः गौरनुबन्ध्य इत्यादौ सकलगवानुबन्धनासम्भवात्कर्मणो वैगुण्यमुक्तम्। किञ्च न हि भाष्योक्ततृजादिदृष्टान्तस्य व्यक्तिपक्ष एव सर्वविषयत्वं न जातिपक्ष इत्यत्र मानमस्ति।

'तत्रा लक्ष्यानुसारात् क्वचिच्छास्त्रीयदृष्टान्ताश्रयणं क्वचिल्लौकिकदृष्टान्ताश्रयणमिति भाष्यसम्मतमार्ग एव युक्त इति बोध्यम्'।

'क्वचिदिष्टानुरोधेन पूर्वशास्त्रे स्वरितत्वप्रतिज्ञाबलात् स्वरितेनाधिकं कार्यमित्यर्थात्पूर्वमेव भवति। तेन 'सर्वे पूर्वविप्रतिषेधाः संगृहीता' इति 'स्वरितेन' (१-३-११) इति सूत्रे भाष्ये। विप्रतिषेधसूत्रस्थपरशव्दस्येष्टवाचित्वात् तत्संग्रह इति विप्रतिषेधसूत्रे भाष्ये'॥

**२. परिभाषा - विकरणेभ्यो नियमो बलीयान्।। पृ. ४१ -**

भाष्यचिन्तनम्- 'अत्र 'वृद्भ्यः स्यसनोः'(१-३-९२) इति सूत्रेण स्ये विभाषोतङ्विधानं ज्ञापकम्। स्यव्यवधाने नियमाप्रवृत्तौ सामान्यशास्त्रेणोभयसिद्धौ विकल्पविधानं व्यर्थं स्यात्। अत्रार्थे ज्ञापिते तु 'स्य' इति विषयसप्तमी बोध्येति 'अनुदात्तङितः'(१-३-१२) इत्यत्र भाष्यकैयटयोः स्पष्टम्'।

'विकरणव्यवधानेऽपि नियमप्रवृत्तेरिदं ज्ञापकमिति 'शदेः शितः'(१-३-६०) इत्यत्र भाष्ये ध्वनितम्'।

'ध्वनितं चेदं 'स्थानेऽन्तरतमः'(१-१-५०) इति सूत्रे भाष्ये। शास्त्रानर्थक्यं तु वृद्धिसंज्ञासूत्रे भाष्ये तिरसिकृतम्। सामान्यशास्त्रेणोत्पत्तिस्तु सरूपसूत्रस्थकैयटरीत्या प्रधानानुरोधेन गुणभेदकल्पना तावत् प्रकृतिकल्पनया कार्या'।

**३. परिभाषा - शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति।। पृ.४३ -**

भाष्यचिन्तनम्- 'इदं 'शदेः शितः'(१-३-६०) इति सूत्रे भाष्ये स्पष्टम्। तत्रा हि 'न्यविशते'त्यत्र विकरणे कृते तदन्तस्याट् अकृते धातुमात्रस्येत्यडनित्य इत्युक्तम्'।

**४. परिभाषा - असिद्धं बहिरङ्गमन्तरङ्गे।। पृ.५० -**

भाष्यचिन्तनम्- 'अन्तर्मध्ये बहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये, अन्तर्भूतान्यङ्गानि निमितानि यस्य तदन्तरङ्गम्। एतच्च 'खरावसानयो:' (८-३-१५) इति सूत्रे 'असिद्धवत्'(६-४-२२) सूत्रे च भाष्यकैयटयो: स्पष्टम्'।

'ननु 'येन विधिस्तदन्तस्य'(१-१-७२) इति सूत्रे भाष्ये 'इको यणचि'(६-१-७७) इत्यादावापि तदन्तविधौ 'स्योन' इत्यत्रान्तरङ्गत्वाद्यणो गुणबाधकत्वमिष्यते तन्न सिद्धयेत् , ऊनशव्दमाश्रित्य गुण इत्यमन्तरङ्गत्वाद् गुण एव स्याद्युक्तम्'।

'किञ्च सिद्धान्ते नित्यत्वाद् गुणात्पूर्वमूठ् , गुणस्तु ऊठि यणावाधितत्वादनित्य:। ऊनशव्दमाश्रित्येत्यादिभाष्येण च परिभाषायामङ्गशब्देन सप्तम्याद्यन्ततयोपात्तं शब्दरूपं निमित्तमेव गृह्यत इति स्पष्टमेवोक्तम्'।

'परम्परया निमित्तत्वमादाय बहिरङ्गत्वाश्रयणे तु न मानम्। ध्वनितं चेदं 'नलोप: सुप्'(८-२-२) इति सूत्रे भाष्य इति तत्रौव भाष्यप्रदीपोद्योते निरूपितम्'।

'एतेनान्तरङ्गं बहिरङ्गाद् बलीय इति परिभाषान्तरमित्यपास्तम्। एनामाश्रित्य विप्रतिषेधसूत्रे भाष्ये तस्या: प्रत्याख्यानाच्च'।

'पुगन्तेत्यादौ कर्मधारयाश्रयणेन प्रत्ययपराङ्गावयवलघूपधारूपेको गुण इति 'इको गुणवृद्धी'(१-१-३) इति सूत्रभाष्यसम्मतेऽर्थे भिनत्तीत्यादावदोषाच्च'।

'अत एव 'ओमाङोश्च'(६-१-९५) इत्याङ्ग्रहणं चरितार्थम्। तद्धि 'खट्वा आ ऊढे' त्यत्र परमपि सवर्णदीर्घं बाधित्वा अन्तरङ्गत्वाद् गुणे कृते वृद्धिप्राप्तौ पररूपार्थम्। साधनबोधकप्रत्ययोत्पत्त्यनन्तरं पूर्वं धातोरुपसर्गयोगे पश्चात् खट्वाशब्दस्य समुदायेन योगाद् गुमस्यान्तरङ्गत्वमिति 'सम्प्रसारणाच्च'(६-१-१०८) इति भाष्ये स्पष्टम्'।

'अत एव 'प्रणिदापयती' त्यादौ णत्वं 'यदागमा:'(प.-११) इति न्यायेन समाहितं भाष्ये '। 'अत एव 'न धातु'(१-१-४) इति सूत्रे 'प्रद्धे' इत्यत्र गुणो बहिरङ्ग इति भाष्य उक्तम्'। 'किञ्च पूर्वमुपसर्गयोगे धातूपसर्गयो: समास 'ऐकस्वर्याद्यापत्तिरि'ति 'उपपदमतिङ्' ( २-२-१९) इति सूत्रे भाष्ये स्पष्टम्'।

'अर्थानामपि जातिव्यक्तिलिङ्गसंख्याकारकाणां बोधक्रतम: शास्त्रकृत्कल्पि-तस्तत्क्रमेणैव च तद्बोधकशब्दप्रादुर्भाव: कल्पित इति तत्क्रमेणैव तत्कार्याणीति 'पट्व्ये'त्यादावन्तरङ्गत्वात् पूर्वं पूर्वयणादेश: परयणादेशस्य बहिरङ्गतया असिद्धत्वादित्यनेन 'अच: परस्मिन्'(१-१-५७) इति सूत्रे भाष्ये स्पष्टम्'।

'नव्यमतेऽपि यथोद्देशपक्षाश्रयणेनान्यथासिद्धोदाहरणदानेन तस्य तदुक्तित्वमावश्य-कमित्याहु:। आभीयेऽन्तरङ्गे आभीयस्य बहिरङ्गस्य समान्याश्रयणस्य नानेनासिद्धत्व-मसिद्धत्वादित्यसिद्धवत्सूत्रे भाष्ये स्पष्टम्। एवं सिचिवृद्धेर्येन नाप्राप्तिन्यायेनान्तरङ्ग-

बाधकत्वमूलकं सिच्यन्तरङ्गमस्तीति 'इको गुण '(१-१-३) इति सूत्रे भाष्ये स्पष्टम्'।

**५. परिभाषा - नाजानन्तार्ये बहिष्ट्वप्रक्लृप्तिः।। (५१) -**

भाष्यचिन्तनम्- 'पदद्वयसम्बन्धिवर्णद्वयापेक्षं बहिरङ्गमिति 'प्रेद्ध' इत्यादौ गुणौ बहिरङ्ग इति ग्रन्थेन 'न धातुलोपः'(१-१-४) इति सूत्रे 'संयोगान्तस्य लोपः'(८-२-२३) इति सूत्रे च भाष्ये स्पष्टम्'।

'अत एवान्तरङ्गपरिभाषामुपक्रम्य विप्रतिषेधसूत्रेऽस्या बहूनि प्रयोजनानि सन्ति तदर्थमेषा परिभाषा कर्त्तव्या प्रतिविधेयं च दोषेष्वित्युक्तं 'सम्प्रसारणाच्च'(६-१-१०८) इति सुत्रे भाष्ये। प्रतिविधानञ्च परिभाषाविषयेनित्यत्वाश्रयणमेवेति ध्वनितमित्यलम्'।

**६. परिभाषा - अन्तरङ्गानपि विधिन् बहिरङ्गो लुग् बाधते - (पृ.५२)**

भाष्यचिन्तनम्-'खट्वाभिरि'त्यादावपि पूर्वान्तवत्त्वेनादन्तत्वे भिस ऐसापत्तिरिति भाष्ये स्पष्टम्'।

**७. पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोप्येकादेशो न।। (५३)**

'अत्र च 'नेन्द्रस्य '(७-३-२२) इति निषेध इव ज्ञापक इति 'अन्तादिवच्च'(६-१-८५), 'विप्रतिषेधे परम्' (१-४-२) इति सूत्रयोर्भाष्ये स्पष्टम् ।

**८. परिभाषा - अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते।। (५४)**

भाष्यचिन्तनम्- ''अदो जग्धिः' (२-४-३६) इति सूत्रे कितीत्येव सिद्धे ल्यब्ग्रहणमस्या ज्ञापकमिति 'अदो जग्धिः' इत्यत्र भाष्ये स्पष्टम्''।

**९. परिभाषा - 'अकृतव्यूहाः पाणिनीयाः '।। (५६)**

भाष्यचिन्तनम्- 'अत एव' चौ प्रत्यङ्गस्य प्रतिषेधे ' इति वचनं वार्त्तिककृतारब्धं भाष्यकृता च न प्रत्याख्यातम्। प्रत्यङ्गमन्तरङ्गम्। अस्यां परिभाषायां सत्यां तु तद्वैयर्थ्यं स्पष्टमेव'।

'किञ्चानयैव 'प्रत्ययोत्तरपदयोश्च' 'अदो जग्धिर्ल्यब्तिकिती'त्यनयोश्चारितार्थ्यन तज्ज्ञापकवशाल्लुक्ल्यपोरन्तरङ्गबाधकता भाष्योक्ता भज्येत'।

**१०. परिभाषा - 'तेन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति'।। ५८**

भाष्यचिन्तनम्- 'गोपायती' त्यादावपि शप्स्यादिः प्राप्नोति। न च सति शप्यसति वा न विशेषः, अन्तदिदानीमिदमुच्यते नास्ति विशेष इति। यदुक्तमायादीनां

स्यादिभिरव्याप्तोऽवकाश इति स नास्त्यवकाश'' इति भाष्ये उक्तम्''।

'यथा वा आदेरपि प्रवृत्त्या चरितार्थेन 'आदेः परस्य' (१-१-४७) इत्यनेन 'अलोऽन्तस्य' (१-१-५२) इत्यस्य बाधः। तदुक्तं 'मिदचोऽन्तात्' (१-१-४७) इति सूत्रे भाष्ये 'सत्यपि सम्भवे बाधनं भवती'ति'।

'तक्रकौण्डिन्यायोऽपि तत्प्राप्तियोग्येचरितार्थविषयो विधेयविषयो एव चेति 'तत्तद्धितेष्वचमादेः'(७-२-११७), 'धातोरेकाचः' (३-१-२२) इत्यादि - सूत्रेषु भाष्ये स्पष्टम्'।

**११. परिभाषा-उपसञ्जमानिमित्तेप्यवाद उपसञ्जातनिमित्तमप्युसर्गं बाधत इति॥ (६५)**

भाष्यचिन्तनम्- तिपदोक्तत्वमपि निरवकाशत्वे सत्येव बाधप्रयोजकम्। स्पष्टं चेदं 'शेषाद्धिभाषा'(५-४-१४४) इति भाष्ये। तत्रा हि शेषग्रहणमनर्थकं ये प्रतिपदं विधियन्ते ते बाधका भविष्यन्तीत्याशङ्क्य, 'अनवकाशा हि विधयो बाधका भवन्ति, समासान्ताश्च कबभावे सावकाशा' इत्युक्तम्'।

**१२. परिभाषा - क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति।। (६९)**

**भाष्यचिन्तनम्**- 'इदं च वोसरूपविधेरनित्यत्वात् सिद्धम्। तदनित्यत्वे ज्ञापकं च 'अर्हे कृत्यतृचश्च'(३-३-१६९) इति। तत्रा हि चकारसमुच्चितलिङा कृत्यतृचे बाधो मा भूदिति कृत्यतृज्ग्रहणं क्रियत इत्यन्तत्रा विस्तरः। वोसरूपसूत्रे भाष्ये स्पष्टैषा'।

**१३. परिभाषा - उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्।। (७१)**

**भाष्यचिन्तनम्**- 'तत्राामोति सप्तमी 'त्रेस्त्रयः' (७-१-५३) इत्यत्र चरितार्था। आदिति पञ्चमी 'आज्जसेरसुक्'(७-१-५०) इत्यत्र चरितार्थेति स्पष्टं 'तस्मिन्' इति सूत्रे भाष्ये कैयटे च'।

समीक्षणम् - सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव।।(४०) इति परिभाषायाः व्याख्यानावसरे नागेशेन पञ्च स्थलानि प्रतिपादितानि, यत्र सर्वत्र समुपस्थापनं भाष्याश्रयणं विद्यते। भाष्ये स्पष्टम्, भाष्ये दर्शनात्, भाष्यसम्मतमार्ग एव युक्त इति बोध्यम्, तत्संग्रह इति विप्रतिषेधसूत्रे भाष्ये इत्यादिभिरुक्तिभिः सिद्धान्तः समुपपादितः।

द्वयोः कार्यस्यापि पक्षे सिद्धतया सिद्धौ सत्यामारब्धमाणो विधिर्नियमाय कल्पते। तदा फलति 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति। यदा लोके कश्चन द्वयोरेको भृत्यो भवति तयोः पर्यायेण कार्यं करोति। यदि द्वयोः स्वामिनोः एकदैव एकस्य पूर्वदिशि प्रेषणमपरस्य पश्चिमदिशि प्रेषणं तदा पक्षपातशून्यो भृत्यः उभयोः

कार्यं न करोति। किन्तु यदा राजाज्ञा पित्राद्याज्ञा वा यत्कार्यकारणाय प्रेरिका भवति तत्कार्यं करोति। तथैव लक्ष्यार्थमेव शास्त्रमिति लक्ष्यं प्रेष्यम् एकञ्च। तल्लक्षणं केनापि न सम्बध्नाति इति द्वयोः शास्त्रयोः प्रवृत्त्यभावे प्राप्ते विप्रतिषेधे इति सूत्रं परं विधत्ते न पूर्वं निषेधयति। परस्मिन्कृते यदि पूर्वस्य प्राप्तिः सम्भवेत्तदा तदपि स्यात्। इत्येव 'पुनः प्रसङ्गविज्ञानात् सिद्धम् ' इति न्यायः सिद्ध्यति। अनयोर्न्याययोः शिष्टप्रयोगानुसारेणानुसरणम्। द्वयोः सूत्रयोः क्वचिल्लब्धाकाशयोरेकत्र लक्ष्ये उभयोर्युगपत्प्राप्तिस्तुल्यबलविरोधः। कार्य्ये परत्वञ्च परशास्त्रविहित्वम्। प्रकृते 'हशि च' इत्यस्यावकाशः - शिवो वन्द्यः इति। 'रोरि' इत्यस्यावकाशः- 'पुनारमते' इति। 'मनर् रथः' इत्यत्र उभयोर्युगपत्प्राप्ति-स्तुल्यबलविरोधसत्वादुत्वं बाधित्वा परत्वात् लोपः प्राप्नोति।

प्रसङ्गेऽस्मिन् नागेशः भाष्यवचनमाधारीकृत्य समाधानं विहितम्। यदुक्तं तेन -

अपि च क्वचिदिष्टानुरोधेन पुर्वशास्त्रे स्वरितत्वप्रतिज्ञाबलात् स्वरितेनाधिकं कार्यमित्यर्थात्पूर्वमेव भवति तेन सर्वे पूर्वविप्रतिषेधाः संगृहीता इति ''स्वरितेन'' सूत्रे भाष्ये। विप्रतिषेध सूत्रस्थपर-शब्दस्येष्टवाचित्वात् तत्संग्रह इति 'विप्रतिषेधसूत्रे' भाष्ये।

महाभाष्यकारः इष्टानुरोधात् यदि पूर्वप्राप्तिस्तदपि भवत्येव पुनः प्रसङ्गविज्ञानात् सिद्धिरिति विप्रतिषेधसूत्रे भाष्ये स्पष्टम्। अत एव स्वरितानाधिकार इति सूत्रे भाष्ये सर्वे पूर्वविप्रतिषेधसंगृहीता इत्यर्थक-परशब्दस्य इष्टवाचित्वमङ्गीकरणीयं वर्त्तते।

विकरणेभ्यो नियमो बलीयान्।।(४१) इति परिभाषायाः प्रयोजनं भाष्यवचनमाधारीकृत्य साधितम्। परिभाषायारस्याः स्वीकरणेन फलं तु एधते इति प्रयोगसिद्धिः। तात्पर्यं तु एध् ल इत्यवस्थायां तिप् तस् झि श्चाइत्यनेन तिबादिषु 'अनुदात्तङितः' इति नियमसूत्रं, कर्त्तरि शप् - शप् विकिरणञ्चेति युगपत् कार्यद्वयप्राप्त्यवस्थायां परत्वात् विकरणकार्यं प्राप्नोति। येन 'अनुदात्तङितः ' इति नियमसूत्रस्य प्रवृत्तिर्न जायते। तत्रा परिभाषया अनया प्रथमं नियमसूत्रेण आत्मनेपदविधानादनन्तरं शप् विकरणे एधते इति पदं सिद्ध्यति। 'विकरणेभ्यो नियमो बलीयान्' इति परिभाषायामपि 'अनुदात्तङितः' इति सूत्रस्थ भाष्यवचनमादाय भाष्यसिद्धान्तम् आदाय 'स्य ' इत्यस्य विषयसप्तमी स्वीकृता विद्यते। अत्र 'वृद्भ्यः स्यसनोः'(१-३-९२) इति सूत्रेण स्ये विभाषोतङ्विधानं ज्ञापकम्। पुनः अस्याः परिभाषायाः ज्ञापकत्वे स्वदेहे शितः इत्यत्र भाष्ये ध्वनितं मार्गमाश्रित्य समाधानं विहितम्। अत्र यदुक्तं तत्रः वस्तुतः - अस्माज्ज्ञापकात् 'अनुदात्तङितः '(१-३-१२) इत्यादि प्रकरणं तिबादिविध्येकवाक्यतया विधायकम्। इति।

'असिद्धं बहिरङ्गमन्तरङ्गे' (प. ५०) इति परिभाषायाः विचारावसरे नागेशेन द्वादशस्थलेषु भाष्यसिद्धान्तमाधारीकृत्य समुपस्थापनं विहितम्। ज्ञापकसिद्धतया अस्याः परिभाषान्तरापेक्षया प्रामाणिकत्वं शास्त्रसिद्धत्वं वा वर्त्तते इत्यसंशयम् असिद्धं बहिरङ्गमन्तरङ्गे।

अन्तरङ्गे कार्य्ये कर्त्तव्ये बहिरङ्गमसिद्धं भवतीति तात्पर्ये अन्तरङ्गवहिरङ्गशब्द-योस्तात्पर्यमवगत्य तस्याः सञ्चरणविधिः जायते। तौ द्वौ शब्दौ प्रतिद्विन्दभाविनाविति भाष्यादिषु व्युत्पादितमिति भावः।

'अन्तरङ्गानपि विधिन् बहिरङ्गो लुग् बाधते' (प. ५२) इति परिभाषायां खट्वाभिरि'त्यत्र पूर्वान्तवत्त्वमाश्रित्य अदन्तत्वे 'अतो भिस् ऐस्' इति सूत्रवहितस्य ऐसापत्तिरिति भाष्योक्तिमुररीकृत्य स्वसिद्धान्त समुपस्थापितः नागेशेन। तस्य विचारानुसारेण-

'असिद्ध बहिरङ्गमन्तरङ्गे' इति परिभाषायाः बाधिकेयं परिभाषा। अन्तरङ्गपरिभाषा स्वीकारे गोमान् प्रियो यस्येति विग्रहे गोमत् प्रिय इत्यादौ गोमत्-सु प्रिय-सु इत्यावस्थायां गोमत् इत्यत्र ''सुपोधातुप्रातिपदिकयोः'' इति सूत्रेण सुलुक् प्राप्नोति। 'हलङ्याभ्योदीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रेण सु-लोपो प्राप्नोति। तत्रा पदद्वयानिमित्तकसमासाश्रितत्वेन बहिरङ्गलुकं बाधित्वा अन्तरङ्ग ''हलङ्याभ्योदीर्घात्'' इत्यनेन क्रियते। ततश्च न लुमताङ्गस्य इति सूत्रस्य प्रवृत्या 'प्रत्ययोत्तरपदयोश्च' (७.२.२९) सूत्रबलेन 'उगिदचां सर्वनामस्थानेधातोः' (७.१.९०) इति सूत्रेण नुमागमे 'अत्वसन्तस्य चाधातोः' (६.४.१४) इत्युपधादीर्घे 'संयोगान्तस्य लोपः' इति तलोपे गोमान् प्रियः इत्यनिष्टं रूपं प्रसज्येत।तन्निवारणाय परिभाषा उच्यते - 'अन्तरङ्गानपि विधिन् बहिरङ्गो लुग् बाधते' इत्यस्यां परिभाषायां स्वीकृतायां बहिरङ्गे लुक् अन्तरङ्गमपि सुलोपं बाधित्वा प्रबर्त्तते। तेन 'प्रत्ययलोपे प्रत्ययलक्षण' मिति सूत्रं न प्रबर्त्तते। 'न लुमताङ्गस्य' (१.१.६३) इति निषेधात्। तेन नुमादयो न भवन्ति गोमत् प्रिय इति पदं सिद्ध्यति।

ज्ञाप्यज्ञापकयोरभेदसम्बन्धस्य परिकल्पनमादाय इयं परिभाषा लुग्विषया इति केषाञ्चिदाशयः। परन्तु नागेशस्य मतानुसारेण सर्वलुग् विषया इत्युदाहरणमुखेन प्रतिपादितम्। तदर्थं हे त्रपुः, सनीस्रंस, पञ्चखट्व, अत्यङ्ग इति चत्वारि उदाहरणानि प्रस्तुतानि।यत्र क्रमेण सम्बुधिलोपः न लोपः, टापः लुक् तद् यस्य लुक् भवितुमर्हति। आकर-महा भाष्यप्राण्येन वा एतत्सर्व सिद्धान्तितं जायत इति नागेशाशयः।

### अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते।। (प.५४)

अन्तरङ्ग परिभाषावाधकपरिभाषायाः स्वीकारेऽपि प्रधाय प्रस्थायेत्यादौ अन्तरङ्गत्वात् हित्वादिषु कृतेषु ल्यप् स्यादित्याशङ्कायामुच्यते - ''अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते'' इति।

ज्ञापकसिद्धेयं परिभाषा। 'अदो जग्धिः' इति सूत्रस्थभाष्यसिद्धान्तमादाय परिभाषायाश्चास्याः ज्ञापकत्वं निरूपितम्। 'अदो जग्धिः' (पा.सू.२-४-३६) इति सूत्रे कितीत्येव सिद्धे ल्यब्ग्रहणमस्याः ज्ञापकमिति। ल्यप् पदद्वयसापेक्ष-समासमपेक्षत इति स बहिरङ्गसमासेनञ् पूर्वोक्त्व ल्यप् इत्युक्तेः। ''दधातेर्हिः '' इति विहितो हिस्तु

एकपदापेक्षः तादौ किति "दधातेर्हिः" स्यादित्यर्थादन्तरङ्गम्। इति।

शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति।। (प. ४३) - यद्व्यक्तिसम्बन्धितया पूर्वं प्रवृत्तिः, तद्व्यक्तिसम्बन्धितयैव पुनः प्रवृत्तौ कृताकृतप्रसङ्गत्वमित्याशयेन शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति इति परिभाषा प्रतिपादिता। न्यविशते'त्यत्र विकरणे कृते तदन्तस्याट् अकृते धातुमात्रस्येत्यडनित्येति 'शदेः शितः' (१-३-६०) इति सूत्रस्थभाष्यवचनमाधारीकृत्य परिभाषायाश्चारस्याः तात्पर्यं स्पष्टीकृतम्।

नाजानन्तार्ये बहिष्ट्वप्रक्लृप्तिः।।(प. ५१)- इत्यत्र 'न धातुलोपः'(१-१-४) इति सूत्रे 'संयोगान्तस्य लोपः'(८-२-२३) इति सूत्रस्थभाष्यवचनं प्रमाणत्वेन समुपस्थाप्य परिभाषैषा अनित्येत्युपपादिता।

पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोऽप्येकादेशो न।।(प. ५३) इत्यत्र 'अन्तादिवच्च' (६-१-८५), 'विप्रतिषेधे परम् '(१-४-२) इति सूत्रयोर्भाष्योक्तिं समुपस्थाप्य 'नेन्द्रस्य '(७-३-२२) इति निषेध इव ज्ञापक इति समाधानं विहितम्।

अकृतव्यूहाः पाणिनीयाः।।(प. ५६) - 'असिद्धं बहिरङ्गमन्तरङ्ग' 'वार्णादङ्गं बलीयः' इति परिभाषावचनद्वयस्यापवादत्वेन 'अकृतव्यूहाः पाणिनीयाः' इति परिभाषा प्रारब्धा। नागेशः परिभाषामिमां नैव स्वीकरोति। परिभाषाया अस्याः प्रत्याख्यानोपाये पञ्च कारणानि विचारितानि, तद्यथा -

i) इदं वचनं नास्ति।

ii) पदावधिकान्वाख्यानस्वीकारात्।

iii) समर्थसूत्रे समर्थग्रहणं तु कृतसन्देहे प्रत्ययोत्पत्तिर्यथा स्यात्।

iv) प्रति च इत्यत्र च्वौ प्रसङ्गस्य प्रतिषेधो वक्तव्य इति विचारात्।

v) पदसंस्कारपक्षे इयं स्वीकरणीया। वाक्यसंस्कारपक्षे नेयं स्वीकरणीया।

एवं भावेन 'अकृतव्यूहाः पाणिनीयाः ' इति परिभाषा नागेशदिशा प्रत्याख्याता।पुनश्च महाभाष्यतात्पर्यात् अकृतव्यूहाः पाणिनीयाः इति परिभाषा स्वरूपतया तात्पर्यतया च कुत्रचित् स्थले नोपलब्धव्यो विद्यते। अतः एषा परिभाषा नास्तीति नागेशस्याशयः।

'उपसञ्जमानिमित्तेप्यवाद उपसञ्जातनिमित्तमप्युसर्गं बाधत' इति।।(प. ६५)- इति परिभाषायाम् 'अनवकाशा हि विधयो बाधका भवन्ति, समासान्ताश्च कबभावे सावकाशा' इति 'शेषाद्विभाषा' (५-४-१४४) सूत्रस्थभाष्यवचनमुपपाद्य प्रतिपदोक्तत्वमपि निरवकाशत्वे सत्येव बाधप्रयोजकमिति तात्पर्यं साधितम्।

'उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्' (७१)-न्यायसिद्धेयं परिभाषा। पञ्चमीविभक्तिं सप्तमीविभक्तिञ्चेत्युभयनिर्देशे यत्र कार्यं प्रवर्त्तते,तत्रा कुत्र एव कार्यं विधीयेत,किञ्च

तद्रहस्यमिति प्रतिपादनोद्देश्येन ''उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्'' इति परिभाषा प्रारभ्यते।तात्पर्य तु एकस्मिन् सूत्रे उभयथा निर्देशे कां विभक्तिमादाय कार्यसाधनमिति विचारे पञ्चमीनिर्देशस्य बलीयस्त्वं विचार्यते। तच्च तथ्यं पुरस्कर्त्तुम् ''उभयनिर्देशे पञ्चमीनिर्देशो बलीयान् '' इति परिभाषा समुपस्थापिता। अत्र अवतरणं तु – '' ननु ''ङमो ह्रस्वाद्'' (८.३.३२) इत्यादौ ङमः परस्याचः अचि परतः ङमः इति वेति सन्देहः स्यादत आह – 'उभयनिर्देशे' इयं परिभाषेति। पञ्चमीनिर्देशे सप्तमीनिर्देशे च सति पञ्चमीनिर्देशः प्रबलतरः भवति।अचीति सप्तमीनिर्देशस्य ''मय उञ'' इत्यत्तरत्र चारितार्थ्यात् पञ्चमीनिर्देशोऽनवकाश इति ''तस्मादित्युत्तरस्ये'' त्यस्यैव प्रबृत्तिः। यत्र च ''डः सि धुट्'' इत्यादौ उभयोरप्यचरितार्थ्यम्,तत्रा ''तस्मिन्निति निर्दिष्टे पूर्वस्य'' सूत्रापेक्षया ''तस्मादित्युत्तरस्ये''त्यस्य परत्वात् पञ्चमीनिर्देशस्य वलीयस् त्वात् तेनैव व्यवस्था इति।

एवं भावेन बाधबीज-प्रकरणे त्रयोदशपरिभाषाणाम् अष्टाविंशतिस्थलेषु महाभाष्यस्याभिचिन्तनं विधाय नागेशः स्वव्याख्यानं साधितम्। बिषयबाहुल्यादत्र समीक्षात्मकविचार अतीवसंक्षेपेन उपपादितः। परिभाषेन्दुशेखरे परिभाषाणां स्वरूपचिन्तने, प्रत्याख्याने, तात्पर्यविचारे, प्रवृत्त्यप्रवृत्तिस्थलविशेषनिरूपणे सिद्धान्तसाधने च महाभाष्यस्याभिचिन्तनं विधाय भाष्यप्रदर्शितमार्गमाश्रित्य च व्याख्यानं साधितम्, येन 'सर्वेषां न्यायवीजानां महाभाष्यनिबन्धने' इत्युक्तेः सार्थक्यमुपजायते।

**सन्दर्भाः**


१. परिभाषेन्दुशेखरः पृ–२, मिश्रविश्वनाथः

२. प. सं. ४०

३. तत्रौव,प.शे. वि.मि. पृ–१५६

४. तत्रौव– पृ.१५८

५. तत्रौव–पृ.१५९

६. तत्रौव

७. तत्रौव–पृ.१६५

८. पा.सू. १.३–११

९. प.सं. ४१

१०. तत्रौव, प.शे. वि.मि., पृ–१६६

११. तत्रौव

१२. तत्रौव पृ.१७०

१३. प.सं. ४३

१४. तत्रौव,प.शे. वि.मि., पृ-१७२
१५. प.सं. ५०
१६. तत्रौव, प.शे. मिश्रविश्वनाथ:, पृ-१८०
१७. तत्रौव-पृ.१८२
१८. तत्रौव-पृ.१८५
१९. तत्रौव-पृ.१८७
२०. तत्रौव-पृ.१८९
२१. तत्रौव-पृ.१९०
२२. तत्रौव-पृ.१९६
२३. तत्रौव-पृ.२००
२४. तत्रौव
२५. तत्रौव
२६. तत्रौव-पृ.२१०
२७. तत्रौव-पृ.२१२
२८. प.सं. ५१
२९. तत्रौव, प.शे. वि.मि. पृ.२१५
३०. तत्रौव-पृ-२२३
३१. प.सं. ५२
३२. तत्रौव,प.शे. पृ.२३६
३३. प.सं. ५३
३४. तत्रौव,प.शे. पृ.२४०
३५. प.सं. ५४
३६. तत्रौव,प.शे. पृ.२४१
३६. प.सं. ५६
३७. तत्रौव, प.शे. पृ.२६५
३८. तत्रौव
३९. प.सं. ५८
४०. तत्रौव, प.शे. पृ.२७४
४१. तत्रौव-पृ-२७५
४२. पा.सू. १-१-४७
४३. तत्रौव, प.शे. पृ.२७७

४४. प.सं. ६५
४५. तत्रौव,प.शे. पृ.२९९
४६. प.सं. ६९
४७. तत्रौव,प.शे. पृ.३१०
४८. प.सं. ७१
४९. तत्रौव,प.शे. पृ.३१४
५०. पा.सू. १.३.९२
५१. पा.सू. १.३.१२
५२. पा.सू. २.४.७१
५३. पा.सू. ६.१.६८
५४. तत्रौव
५५. पा.सू.७.२.२९
५६. पा.सू. ७.१.९०
५७. पा.सू. ६.४.१४
५८. पा.सू. १.१.६३
५९. पा.सू.२.४.३६
६०. तत्रौव
६१. पा.सू. १.३.६०
६५. पा.सू. १.१.४
६३. पा.सू. ८.२.२३
६४. पा.सू. ६.१.८५
६५. पा.सू. १.४.२
६६. पा.सू. ७.३.२२
६७. पा.सू. ५.४.१४४
६८. प. सं. ७१, मिश्र वि प.शे. पृ.३१४
६९. पा.सू. ८.३.३२
७०. पा.सू. ८.३.३३
७१. पा.सू. १.१.६७
७५. पा.सू. ८.३.२९
७३. पा.सू. १.१.६६
७४. पा.सू. १.१.६७

**सन्दर्भा ग्रन्थाः**

१. संस्कृतसाहित्येतिहासः, सम्पादकः–कपिलदेवद्विवेदी,रामनारायणलालविजयकुमार, २ कटरारोड, इलाहावाद, १९८९

२. व्याकरणशास्त्रेतिहासः, सम्पादकः– लोकमणिदहालः, भारतीयविद्याप्रकाशन, जवाहरनगर, दिल्ली–२००७

# एको गोत्रे' इति सूत्रस्थमहाभाष्यस्य प्राच्यनव्यरीत्या समीक्षा

**ब्रजभूषण ओझा**
सहायकाचार्यः (व्याकरणविभागः)
राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः,
गरली, हिमाचलप्रदेशः

नियमसूत्रमिदं महाभाष्ये विस्तृतं व्याख्यातम्। शब्दकौस्तुभे च सूत्रस्थाः मुख्यसिद्धान्ताः व्याख्यायिताः। कैयटेनापि प्रमुखस्थलेषु भाष्यहृदयमुद्घाटितम्। अत्र सूत्रस्य व्याख्या यथाक्रमं क्रियते।

भाष्यकारः आदौ प्रश्नं करोति - किमर्थमिदमुच्यते ? अस्य प्रश्नस्य तात्पर्यमित्थं वर्णयति कैयटः - क्रियमाणेऽपि सूत्रद्वये सर्वमिष्टं न सिद्ध्यतीति प्रश्नः। दीक्षितस्तु शब्दकौस्तुभे सूत्रार्थमादौ लिखति गोत्रापत्ये प्रथम एव शब्दः प्रत्ययं लभते। सूत्रस्थः एकशब्दस्यार्थः-प्रथमः इति दीक्षितेन कृतः। कैयटेन तु - एकशब्दोऽयमन्यप्रधाना-सहायसङ्ख्याप्रथमसमानवाची, इह तु संख्यावाची प्रथमवाची वा गृह्यते इति उक्तम्। अत्र सूत्रभाष्यान्ते भाष्यकारेणापि कण्ठरवेणोक्तं यत्- लोके हि सङ्ख्यां प्रवर्त्तमानामुपाचरन्ति एक इति वा प्रथम इति वा, यावद् ब्रूयात् प्रथमो गोत्रे प्रत्ययमुत्पादयति। इति भाष्ये उक्तम्।

प्रदीपे तथा च पदमञ्जर्याम् एकशब्दस्यार्थविषयिणी बह्वी मीमांसा विहिता। तद्यथा एकशब्दः अनेकेष्वर्थेषु विद्यते इति विषये प्राह हरदत्तः- एकशब्दोऽयम-प्रधानासहाय- सङ्ख्याप्रथमसमानसाधारणवाची वर्त्तते। अन्यार्थे तावत्-'एकान्याभ्यां समर्थाभ्याम्', 'प्रजामेका रक्षत्यूर्जमेका' 'एकान् बन्धुरपरान्निरासुः' इत्येके आचार्याः मन्यन्ते। 'यजुष्येकेषाम्' इत्यादि-प्रयोगान् दृष्ट्वा केचिच्छब्दपर्यायः एक शब्दः इति वदन्ति केचिदाचार्याः। 'एकः पार्थो धनुष्मताम्' इत्यादिप्रयोगेषु तु एकशब्दः प्रधानार्थेऽस्ति। 'आद्यन्तवदेकस्मिन्' ,'एकहलादौ','एकहल्मध्ये' इत्यादिप्रयोगेषु एकशब्दोऽसहायार्थेऽस्ति। 'एकः द्वौ बहवः' इत्यत्र इति सङ्ख्यार्थे। 'एकेऽल्पप्राणाः' इत्यत्र प्रथमार्थे। 'तेनैकदिक्' इत्यत्र समानार्थे। देवदत्तयज्ञदत्तावेकधनौ इत्यत्र साधारणार्थे। अत एव उक्तम्-

**एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा।**
**साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते॥**

एतेष्वर्थेषु एकशब्दोऽत्र सङ्ख्यावचनः साधारणवचनः प्रथमवचनो वा गृह्यते। यतोहि अर्थान्तराणामसंभवात्। सूत्रस्थे एकशब्दविषये उक्त्वा इदानीं गोत्रशब्दविषये किञ्चिदुच्यते-अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात् लोके तु गोत्रशब्दात् पुत्रस्यापि ग्रहणं भवति। कोषप्रामाण्यं यथा- 'सन्ततिगोत्रजननकुलान्यभिजनान्वयौ' इति। किन्तुपाणिनिशास्त्रे पुत्रस्य न गोत्रत्वम्। तदर्थमेव अस्य सूत्रस्यारम्भः। तद्वदेव हि अपत्यशब्दो नात्मजपर्यायः अपितु 'न पतन्ति पितरो येनेति' यौगिकव्युत्पत्या पुत्रपौत्रादिसन्ततिपर्यायः। अत्र सूत्रे भाष्यकारेण तु "पौत्रप्रभृतेगीत्रसंज्ञायां यस्यापत्यं तस्य पौत्रप्रभृतिसंज्ञाकरणम्" इति वार्तिकं व्याख्यायताम्। कैयटमते तु प्रकृतसूत्रं न संज्ञासूत्रमपितु-अपत्यमात्रस्य लोके गोत्रत्वादपत्यविशेषे गोत्रशब्दस्य नियमात् परिभाषेयम्। परिभाषा-सिद्ध्यर्थं कैयटेन "व्यवहाराय नियमः संज्ञानां:" इति भर्तृहरेः श्लोकद्वयमुदाहृतम्।

गोत्रः, पुं, (गां पृथिवीं त्रायते रक्षतीति। गो . त्रै . "आतोऽनुपसर्गे कः।" इति गोत्रशब्दस्य प्रकृतिप्रत्ययविवेकः। वैयाकरणानां मते गोत्रशब्दः द्विप्रकारको वर्त्तते। १-पारिभाषिकं गोत्रम् २- व्युत्पन्नगोत्रञ्च। पारिभाषिकं यथा - अपत्यं पौत्रप्रभृति गोत्रम्, अस्ति च लौकिकोपत्यमात्रवचनः दीक्षितमते तु- प्रवराध्याये यमधिकृत्य प्रवरा आम्नातास्तद्गोत्रम्। प्रवरान् व्याख्यास्यामस्तैर्गोत्राणीति सत्याषाढसूत्रादिति अस्ति। तस्मादवयवयुतं पृथग्भूतं पर्युदासात्कुलप्रतिष्ठाकरं गोत्रं भवति।

व्युत्पन्नगोत्रस्तु - गूयन्ते शब्द्यन्तेनेनैव स्वसन्तानप्रभवा इति प्रधानभूतः आदिपुरुषः स्वप्रभवस्यापत्यं = सन्तानस्य संज्ञाकारीगोत्रमित्युच्यते यथा भरतः, रघुः, यदुरिति शब्दकौस्तुभे।

उपगोर्गोत्रापत्यमौपगवः इत्युक्त्वाभट्टोजिदीक्षितेनात्र पक्षद्वयमुक्तम्। तत्रा अपत्यशब्दो हि पुत्र एव रूढ इत्येकः पक्षः। पुत्रादिसामान्यः इत्यपरः पक्षः भाष्यादावपि स्वीकृतः। उक्तञ्च भाष्ये - कथं पुनर्ज्ञायते -उत्पादयितोत्पादयिताऽपत्येन युज्यत इति, एवं हि दृश्यते लोके - पितामहस्योत्सङ्गे दारकमासीनं कश्चित् पृच्छति कस्यायं दारक इति। स आह - देवदत्तस्य यज्ञदत्तस्य वेति। उत्पादयितारं व्यपदिशति नात्मानम्। इत्येव दृष्टान्तः दीक्षितेनापि स्वरूपभेदेन प्रादर्शि। अमुं पक्षमेव द्रढयन् दीक्षितः कोशकारमपि प्रमाणयति-

**आत्मजस्तनयः सुनुः सुतः पुत्रः स्त्रियां त्वमि।**
**आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे॥**

इति प्रथम पक्षः। अपत्यविषये द्वितीयपक्षं मुख्यमतत्वेनोदाहरति दीक्षितः अपत्यशब्दः क्रियानिमित्तो (प्रयोज्यपरो) न तु आत्मजपर्यायः। कथं ज्ञायते - न पतन्त्यनेनेति अपत्यः इति व्युत्पत्तेः इति पङ्क्तिविंशतिङ्कः इति सूत्रभाष्ये प्रदर्शिता। यन्निमित्तं यस्यापतनमिति तस्य फलितोऽर्थः। पौत्रादिरपि पितामहादीनामपतनहेतुः अतः

तेषामपत्यं भवति। लोकेऽपि प्रसिद्धं वर्तते यत् व्यवहितोऽपि पितामहादीनां समुद्धर्तेति प्रसिद्धमितिहासेषु (स्मृत्यादिषु)। तद्यथा-

**पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते।**
**अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम्।।**

अस्मिन् सन्दर्भे महाभारतस्य आदिपर्वणि ४६ तः ४८ अध्यायपर्यन्तं जरत्कारोरुपाख्यानं द्रष्टव्यमिति दीक्षिताशयः। सूत्रकारोऽपि इदमेव पक्षं स्वीकरोति। प्रमाणं यथा -"अपत्यं पौत्रप्रभृति गोत्रम्" इति।

भाष्ये कैयटे चाप्युक्तम् - गोत्रादिति नियमात् सन्तु सर्वेऽपत्ययुक्ता इति। कथं पुनर्ज्ञायते सर्वेऽपत्ययुक्ता इति ? तदा, सिद्धान्तरूपेण कथयति भाष्यकारः - एवं हि याज्ञिकाः पठन्ति - दशपुरुषानूकं यस्य गृहे शूद्रा न विद्येरन् स सोमं पिबेदिति। यदि च सर्वेऽपत्ययुक्ताः भवन्ति तदा एतद् (वाक्यं) उपपन्नं भवति इत्युदाहरणं शब्दकौस्तुभे नास्ति। इत्युभौ पक्षौ निरूप्य दीक्षितः आद्यपक्षविषये वदति - तत्राद्ये पक्षे अपत्यमिवापत्यमिति गौणी वृत्तिराश्रयणीया स्यात्। यद्याद्यपक्षे प्रकृतसूत्रं नारम्भ्येत् तदा तत्रा-तत्रापत्ये तत्तत्पितृवाचकात् प्रत्ययः स्यात्। तथा च उपगुपुत्रे वाच्ये "तस्यापत्यम्" इति सूत्रेण अणा औपगवः औपगवशब्दे व्युत्पादिते सति , औपगवस्यापत्ये (उपगोस्तृतीये गोत्रे विवक्षिते) औपगवशब्दात् "अत इञ्" इति सूत्रेण इञि औपगवी। पुनश्च औपगवेरपत्यं (चतुर्थे विवक्षिते) "यञिञोश्च" इति सूत्रेण फकि औपगवायनायनः। पञ्चमे- औपगवायनिः। षष्ठे- औपगवायनायनः। सप्तमे- औपगवायनायनिः। एवं फगिञोः परम्परायां मूलप्रकृतेरुपगोः शततमे गोत्रे विवक्षिते एकोनशतात् प्रकृतिभ्यः एकोनशतमनिष्टप्रत्ययाः स्युः। अत्र तृतीयप्रभृति कस्मिंश्चिद् गोत्रे विवक्षिते उपगुं प्रति - अनपत्येऽपि तस्मिन् "एको गोत्रे" इति सूत्रेण - अणेव भवति न तु इञादिः।

द्वितीय-पक्षे तु उपगोः पञ्चमः पूर्वेषां चतुर्णामपत्यं तत्रा यदौपगवोः प्रत्ययस्तदौपगव इतीष्टं यद्यपि सिद्ध्यति तथाप्यनिष्टमपि प्राप्नोति। औपगवादौपगविः ततः औपगवायनः। ततः औपगवायनिरिति पञ्चमे त्रीण्यनिष्टानि षष्ठे चत्वारि। तथा चास्मिन् पक्षेऽपि दीक्षितेन अष्टनवतिरनिष्टप्रत्ययाः स्युरित्यापादितम्।

भाष्ये प्रदीपे च यथा दीक्षितेन व्याख्यातः तथा व्याख्या न कृता तत्रा तु - अपत्यान्तरादपत्यान्तरं शब्दान्तराच्छब्दान्तरात्प्रत्ययान्तरं प्राप्नोति। फगन्तादिञ् इञन्तात्फगिति फगिञोर्दाशतयी प्रत्ययमाला प्राप्नोति। इति सङ्क्षेपेण प्रत्ययमाला दोष एव उक्तः। अत एव दीक्षितेनापि सिद्धान्तकौमुद्यामुक्तम्-

**"गोत्रे स्वैकोनसंख्यानां प्रत्ययानाम्परम्परा।**
**यद्वा स्वद्यूनसंख्येभ्योऽनिष्टोत्पत्तिः प्रसज्यते।**

**अपत्यम्पितुरेव स्यात्ततःप्राचामपीति च।**
**मतभेदेन तद्धान्यै सूत्रमेतत्तथोत्तमम्।।"**

अयमर्थः- स्वं = गोत्रं, तत् मूलपुरुषोऽपेक्षया यत्सङ्ख्याकं तदपेक्षया द्व्यूनसङ्ख्याकप्रकृतिभ्यस्तावतां प्रत्ययानामनिष्टानामुत्पत्तिरुक्तरीत्या प्रसज्यत इत्यर्थः। ननु कथमिदं पक्षद्वयमित्यत आह-अपत्यमित्यादि-मतभेदेनेत्यन्तम्। "पुत्र एवापत्यमि"ति पक्षे प्रथमः पक्ष उन्मिषतीति, "पुत्रपौत्रादि-साधारणोऽपत्यशब्द" इति पक्षे तु द्वितीयः पक्ष उन्मिषतीति भावः। तस्य=उक्तप्रकाराभ्यामनिष्टोत्पादनस्य हानिः=निवृत्तिः, तदर्थमिदमित्यर्थः। "गोत्राद्यून्यस्त्रिया"मित्युत्तरसूत्रमपि तथा योज्यमित्यर्थः। तत्राापत्यशब्दः पुत्र एव रूढ इति पक्षे अनिष्टं प्रपञ्चयति--पितुरेवेत्यादिना। "अत इञ् इत्यनेने"ति शेषः। औपगवादेव इञ् स्यन्नतूपगोरणित्यर्थः, तृतीयस्य उपगुं प्रत्यपत्यत्वाऽभावादिति भावः। चतुर्थे त्वित्यतः पूर्वम् "उपगो"रिति शेषः। अजीवज्ज्येष्ठे इति। जीवन् ज्येष्ठो यस्येति विग्रहः। जीवति तु ज्येष्ठे चतुर्थस्य "भ्रातरि च ज्यायसी"ति युवसंज्ञया गोत्रत्वं बाध्येतेति भावः। एकोनशतात्प्रकृतिभ्यः एकोनशतं प्रत्यया अनिष्टाः स्युरित्यर्थः। अथापत्यशब्दः पुत्रपौत्रादिसाधारण इति पक्षे अनिष्टं प्रपञ्चयति--पितामहादीनामपीति। मुख्यपक्षत्वं त्वस्य भाष्ये पूर्वपक्षस्य निराकरणात् "अपत्यं पौत्रप्रभृति" इति सूत्रस्वरसाच्च बोध्यम्। तृतीयादीनामप्यपत्यत्वेन तत्रा "तस्यापत्यमि"त्यणो निर्बाधत्वादिति भावः। अनिष्टप्रत्ययाः स्युरिति श्लोके तु "अष्टनवति"रिति शेषः। यद्यप्युपगोस्तृतीयादिषु अपत्यप्रत्ययविध्यर्थत्वमेव प्रथमपक्षे, तथापि गर्गात्तृतीयादिषु विवक्षितेषु गोत्रविहितगर्गादियञा गार्ग्यशब्दस्येष्टस्य सिद्धावपि गर्गादिञि ततः फिञित्येवं प्रत्ययपरम्पराप्तनिष्टा प्राप्नोतीति नियमार्थत्वमपि प्रथमपक्षेऽप्यस्य सूत्रस्येति भावः।

तथान्ते दीक्षितः श्लोकत्रयेण उपसंहरति- आद्यपक्षे निवृत्तये अन्त्यपक्षे स्वद्व्यूनसंख्येभ्योऽनिष्टोत्पत्ति-निवृत्तये अस्य सूत्रस्यारम्भः। अत एव प्रदीपे कैयटः एकगोत्रे इति सूत्रस्य निष्कृष्टमर्थं लिखति - पौत्रप्रभृत्यपत्यपरम्परा विवक्षायां प्रत्ययमालाप्रसङ्गे एक एव कर्त्तव्यो नानेक इति। तेन परमप्रकृतेरेव सम्बन्धिसम्बन्धाश्रयेणा-पत्यापत्यवत्सम्बन्धविवक्षायां प्रत्ययः कर्त्तव्य इत्युक्तं भवति।

"कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः" इति परिभाषया परिभाषिकस्यैव गोत्रस्य ग्रहणम्। अपत्याधिकारे गोत्रग्रहणाच्च। अपत्यमात्रं हि लौकिकं गोत्रम्, तस्य यदीह ग्रहणमभिमतं स्यादेक इत्येवं ब्रूयात्, लौकिकस्य गोत्रापत्याधिकारादेव लब्धत्वात्। तस्माद्गोत्रग्रहणाच्च पारिभाषिकस्य ग्रहणमित्याह--"अपत्यं पौत्रप्रभृति गोत्रम्" इति। भेदेन = विभागेन, अपत्यमपत्यं प्रति = प्रत्ययत्यम्। यावन्त्यपत्यानि सम्भवन्ति तेभ्योऽपि सर्वेभ्यः प्रत्ययानामुत्पत्तेः प्रसङ्गे प्राप्तौ सत्यामित्यर्थः। सर्वेषामपत्येन योगेन गर्गगार्गिगार्ग्यगार्ग्यायणानामन्यतमस्य यदपत्यं तत्सर्वेषामपत्यं भवतीति परमप्रकृतेरनन्तरगोत्र-

मुवलक्षणाः प्रत्ययाः प्राप्नुवन्ति। गर्गस्य यदपत्यं तत्सर्वेषां गार्गिगार्ग्यगार्ग्यायणानामपि सम्बन्धि भवति। तथा ह्यत्र यद्यपि गर्गस्यापत्यमिति गर्गशब्देन विग्रहः क्रियते, तथापि नायं नियमो लभ्यते–गर्गशब्दादेवोत्पत्तिरिति, अपि तु कामचारः। ततश्च यदा गर्गशब्दादुत्पत्तिर्भवति तदा 'गर्गादित्वाद्यञ्'यदा गार्गिशब्दात् तदा "यञिञोश्च" 4.1. 101 इति फक्, यदापि गार्ग्यशब्दात् तदापि स एव फक्, यदा गार्ग्यायणशब्दात् तदा "अत इञ्" 4.1.95. एवं प्रत्यपत्यं विभागेन प्रत्ययानामुत्पत्तौ प्रसक्तायामनेन नियमः क्रियते- "एक एव प्रत्ययो भवति" इति। एतेन प्रत्ययनियम इति दर्शयति। प्रत्ययनियमस्त्वेकस्त्वेकशब्दस्य प्रत्ययशब्दसामानाधिकरण्याल्लभ्यते। एकशब्दश्चास्मिन्नियमे संख्यावचनो वेदितव्यः यथा–एकः, द्वौ, बहव इति। एवकारेण द्वयादिव्यवच्छेदः क्रियते-- एक एव प्रत्ययो भवति, न द्वौ, नापि बहव इति। स चैकः प्रत्ययो भवन्नेकग्रहणात् परमप्रकृतेरेव भवतीति सामर्थ्यादुक्तं भवतीति। यदि हि गार्गिशब्दादुत्पद्येत्, द्वौ स्याताम्- इञ्फकौ, नैकः? अथ गार्ग्यशब्दादेवमपि द्वावेव- यञ्फकौ? अथ गार्ग्यायणशब्दात्, त्रयः स्युः- यञ्फगिञः। तस्मान्मूलप्रकृतेरेवोत्पत्तावेकः प्रत्ययः सिध्यतीत्येकग्रहणं कुर्वता सामर्थ्यान्मूलप्रकृतेरेव गोत्रप्रत्ययस्योत्पत्तिरुक्ता भवति। ननु चोत्पादयितैवापत्येन सम्बध्यते, एवं हि लोके दृश्यते–पितामहस्योत्सङ्गे दारकमासीनं दृष्ट्वा कश्चित् पृच्छति- कस्यायमिति? स आह- देवदत्तस्येति, तेनोत्पादयितारं व्यपदिशति, नात्मानम्? ततः सर्वेषामपत्येन योगाभावात् प्रत्यपत्यं भेदेन प्रत्ययोत्पत्तिप्रसङ्गो नास्त्येवेति निवर्त्त्याभावादिदं नियमार्थं नारब्धमित्यत आह- "सर्वेऽपत्येन युज्यन्ते" इति। अत्रैवोपपत्तिमाह- "अपतनादपत्यम्" इति। यन्निमित्तं हि यस्य पापेष्वपतनं तदपतनात् तस्यापत्यं भवति। तस्माद्यो व्यवहितेन जनितः सोऽपि परमप्रकृतिवाच्यस्यार्थस्यापत्यं भवति। अत्र परमप्रकृतिग्रहणञ्चोपलक्षणं वेदितव्यम्। इतरप्रकृतिवाच्यस्यापि ह्यर्थस्याव्यवहितजनितोऽपत्यं भवत्येव। यत्पुनरुक्तम्- कस्यायमित्युक्ते उत्पादयितारं व्यपदिशति, नात्मानमिति, न तेनोत्पादयितुरेवापत्येन योगः, शक्यते प्रतिपादयितुम्। यस्मान्न तत्रा यस्य तेनापतनं स जिज्ञासितः स्यात्, किं तर्हि? य उत्पादयितारं व्यपदिशति नात्मानम्। यदि यस्य तु तेनापतनं स जिज्ञासितः स्यात्, तदाऽऽत्मानमपि व्यपदिशेदेव। यदि च सर्वेऽपत्येन न युज्येरन्, तदा "अपत्यं पौत्रप्रभृति गोत्रम्" इति योऽयमपत्यपौत्रप्रभृतिशब्दयोः सामानाधिकरण्येन निर्देशः, स नोपपद्यते॥ यदपेक्षया पौत्रादिव्यपदेशमासादयन्ति पुमांसस्तं प्रति तेषामनपत्यत्वात्। तस्मादतोऽपि निर्देशात् सर्वेऽपत्येन युज्यन्त इति विज्ञायते। "तत्पुत्त्राोऽपि गार्ग्योः" इति। किं पुनः कारणं तत्पुत्त्राोऽपि गार्ग्य इत्याह- "सर्वस्मिन्" इत्यादि। यदपि गार्ग्यायण इत्यत्रैकेन व्यवहितेन जनितं गोत्रापत्यं यस्मात् तत्राापि गर्गशब्दाद्यञेव भवति, तस्मात् तत्पुत्त्राोऽपि गाग्यी भवति। गर्गशब्दादित्यनेन परमप्रकृतेर्भवतीति दर्शयति। एतच्चैकग्रहणाल्लभ्यत इत्युक्तम्। एकशब्दोऽत्र प्राथम्यनियमे वर्त्तत इति वेदितव्यम्, यथा- वर्गाणां प्रथमद्वितीयाः संवृतकण्ठाः श्वासानुप्रदाना अघोषा एकेऽल्पप्राणा इतरे सर्वे महाप्राणा इति। अत्र हि

प्रथमेऽल्पप्राणा इति गम्यते। एकशब्दस्येदं विवरणम्-- "प्रथमा प्रकृतिः" इति। का च प्रथमा? या परमप्रकृतिरप्रत्ययान्ता "गर्ग नड" इत्येवमादिका। प्रथमैव प्रकृतिः प्रत्ययमुत्पादयति, नाप्रथमा- गार्गिगार्ग्यगार्ग्यायणप्रभृतिशब्दाः प्रत्ययान्ताः। गर्गस्यापत्यं गार्ग्यः, तत्पुत्त्राणोऽपि गार्ग्यः। नडस्यापत्यं नाडायनः, तत्पुत्त्राणोऽपि नाडायनः। सर्वत्र व्यवहितजनितेऽपि गोत्रापत्ये प्रथमा प्रकृतिः प्रत्ययमुत्पादयति॥

बालमनोरमाकार-मतेऽपि-संख्याविशेषोपादाने तदितरसङ्ख्याव्यवच्छेदस्य स्वभावसिद्धत्वादेक एवेति गम्यते। अपत्याधिकारात्प्रत्ययाधिकाराच्चापत्यप्रत्यय इति तद्विशेष्यलाभः। तदाह गोत्रे एक एवापत्यप्रत्ययः स्यादिति। औपगव इति। उपगोर्गोापत्ये "तस्यापत्यमि"त्यण्। गार्ग्य इति। गर्गस्य गोत्रापत्ये "गर्गादिभ्य" इति यञ्। नडस्य गोत्रापत्ये "नडादिभ्यः" इति फक्। "गोत्र एक एव प्रत्ययः स्या"दित्येवोक्तौ त्वनन्तरापत्यप्रत्ययान्तादौपगवशब्दादिञ्प्रत्ययो न निवार्येत। नियमस्य सजातीयविषयतया गोत्रप्रत्ययान्तादेव गोत्रप्रत्ययो वार्येत। अतोऽपत्यग्रहणमित्याहुः।

तत्वबोधिनीकार मतेऽपि-"गोत्रे" इति जात्यपेक्षया एकवचनम्। एकशब्दः सङ्ख्यावाची। "गोत्रेऽभिधित्सितेऽपत्यत्वबोधकप्रत्यय एक एव स्या"दित्युक्तेर्गोत्रापत्ये प्रथम एव शब्दः प्रत्ययं लभते नान्यः। यदि त्वनन्तरापत्यप्रत्ययान्तादपि प्रत्ययः स्यात्तर्हि गोत्रापत्ये एक एव प्रत्ययो न कृतः स्यात्। इत्थं च "अपत्यप्रत्ययान्तात्प्रतिषेधो वाच्यः"इति वार्तिकाथीऽप्यनेन सङ्ग्रहीत इत्याशयेन व्याचष्टे-गोत्रे एव एवेति। अपत्यप्रत्यय इति। एतच्चाधिकारल्लब्धम्। अन्ये तु--एकशब्दः प्रथमपर्यायी, प्रथमश्चापत्यप्रत्ययशून्यः। तथा च "प्रथमा प्रकृतिर्गोत्रे अपत्यप्रत्ययं लभते"इति सूत्रार्थः व्याचक्षते। तत्क्लिष्टम्। "अस्यां पङ्क्तावेकमानये"त्युक्ते "प्रथम"मिति प्राथम्यार्थस्याऽप्रतीतेः। वस्तुतस्तु "प्रथमादित्यधिकाराद्गोत्रे प्रथमादेव प्रातिपदिकादपत्यप्रत्ययः"इति व्याख्यायैकग्रहणमिह त्यक्तुं शक्यमित्याहुः। उपगुशब्द एव प्रत्ययं लभते, न त्वौपगवशब्दः इति "गोत्रापत्येऽप्यनन्तरापत्य इवाणेव भवति, न त्विञ्। गोत्रापत्ये "गर्गादिभ्यो य"ञिति विशिष्य विधानादनन्तरापत्य इवात्र "अत इञ्" न भवति, किं तु यञेव। स च गार्ग्यस्यापत्येऽपि भवति, नत्वत्र यञन्तात्फक्, "एको गोत्रे"इति नियमात्। नाडायण इति। "नडादिभ्यः फ"गिति गोत्रापत्ये विधानादत्रापि "अत इञ"न भवति, किन्तु फगेव, स च नाडायनस्यापत्येऽपि भवति, न तु फगन्तादिञ्, उक्तनियमात्। नन्वेकस्मिन्गोत्रे युगपदनेकप्रत्ययाऽप्रसक्तेर्व्यर्थमिदं सूत्रमित्याशङ्क्य सूत्रारम्भफलं मतभेदेन व्यवस्थापितम्।

उपर्युक्तमतानां परिशीलनं कृत्वा सिद्धं भवतीति यद् एको गोत्रे इति सूत्रं पाणिनिव्याकरणस्य महत्त्वपूर्णं सूत्रमस्ति। येन विना अपत्याधिकारस्य ज्ञानमपूर्णं सशङ्कितं च भवति। यद्यपि प्रकृतसूत्रविषये नव्यप्राच्याचार्याणां सन्ति विभिन्नानि मतानि तथापि क्वचिच्चास्ति समानहृदयम्। तेषां सारांशोऽत्र प्रस्तूयते- अपत्यशब्दः क्रियानिमित्तो न तु

पुत्रपर्यायः। प्रत्ययमालादोषनिवृत्त्यर्थं प्रकृतसूत्रमावश्यकम्। एको गोत्रे इति योगं विभज्य प्रथमाद्गोत्रेऽपत्यप्रत्ययः इत्यपूर्वविधिं व्याख्याय ततः एकः, तेन गोत्रे एक एव प्रत्यय इति प्रकारेण नियमसूत्रमिदं नव्यानां मतं समादर्त्तव्यम्। यतोहि योगविभागे सूत्रस्थैकग्रहणमेव लिङ्गमस्ति अन्यथा एकग्रहणं व्यर्थं स्यात्।

## सन्दर्भाः

१. व्यवहाराय नियमः संज्ञानां संज्ञिनि क्वचित्।
   नित्य एव तु संबन्धो डित्थादिषु गवादिवत् .वा.प .2.366
   कृतकत्वाद् अनित्यत्वं संबन्धस्योपपद्यते।
   संज्ञायां सा हि पुरुषैर् यथाकामं नियुज्यते। वा.प 2.367
२. अमरकोषः
३. बाहुलकात् करणे यत् प्रत्ययः इति तत्त्वबोधिनीकारः।
४. मनुस्मृतिः, ९.१३७
५. ४.१.१०१ अष्टाध्यायी
६. प्रत्ययान्तरात्प्रत्ययोत्पत्तेः आवर्त्तनम्-प्रत्ययमालादोष इत्युच्यते।
७. सि॰ कौ.
८. परिभाषेन्दुशेखरः प्रथमतन्त्रम्
९. पाणिनिसूत्रम् ४.१.१०५
१०. पाणिनिसूत्रम्-४.१.१६२

## सन्दर्भग्रन्थाः

१. वाक्यपदीयम् (१,२)भर्तृहरिः, रघुनाथ शर्मा, प्रथमम्-१९९७, संपूर्णानन्दसंस्कृतमहा विद्यालयः, वाराणसी।

२. अष्टाध्यायीसूत्रपाठः, पाणिनिः, पुष्पादीक्षितः, प्रथमम्- २०१०, संस्कृतभारती-नई दिल्ली।

३. वैयाकरणसिद्धान्तकौमुदी (१,२), भट्टोजिदीक्षितः, गिरिधरशर्मा, परमेश्वरानन्द-शर्मा, एकादशतमम्-२००४,मोतीलालबनारसीदासः-दिल्ली।

४. मनुस्मृतिः, मनुः, शिवराज आचार्यः कौण्डिन्यायनः, प्रथमम्-२०१४, चौखम्बा-विद्याभवनम्-वाराणसी।

५. सिद्धान्तरत्नाकरः, रामकृष्णभट्टः, आजादमिश्रः, प्रथमम्-१९९५, साहित्य शिल्पी-लखनऊ।

६. वैयाकरणसिद्धान्तकौमुदी(१), भट्टोजिदीक्षितः, गुरुप्रसादशास्त्री त्रयः, प्रथमम्-२०१२, चौखम्बा सुरभारती, वाराणसी।

७. प्रौढमनोरमा, भट्टोजिदीक्षितः, बालकृष्णशास्त्री, द्वितीयम्-१९४०, वाणीविलासः, वाराणसी।

८. परिभाषेन्दुशेखरः, नागेशभट्टः, सत्यनारायणमूर्त्तिः, प्रथमम्-२००४, राष्ट्रिय-संस्कृत-विद्यापीठम्, तिरुपतिः।

९. वैयाकरणसिद्धान्तकौमुदी(३), भट्टोजिदीक्षितः, गोविन्दाचार्यः, लक्ष्मीशर्मा, प्रथमम्-२०१५, चौखम्बासुरभारती-वाराणसी।

१०. शब्दकौस्तुभः, भट्टोजिदीक्षितः, विन्ध्येश्वरीप्रसादद्विवेदी गणपतिशास्त्रीमोकाटे च, द्वितीयम्-१९९१, चौखम्बासंस्कृतसीरीजआफिस, वाराणसी,

११. व्याकरणमहाभाष्यम् (१.४) पतञ्जलिः, गुरुप्रसादशास्त्री, बालशास्त्री, द्वितीयम्-२००१, प्रतिभा-दिल्ली।

१२. प्रौढमनोरमा, भट्टोजिदीक्षितः, जयशङ्करलालत्रिपाठी, द्वितीयम्-२००२, कृष्णदास अकादमी-वाराणसी।

१३. लघुसिद्धान्तकौमुदी(५), वरदराजाचार्यः, भीमसेनशास्त्री, तृतीयम्-१९९३, भैमी-दिल्ली।

१४. वैयाकरणसिद्धान्तकौमुदी(२), भट्टोजिदीक्षितः, गोविन्दाचार्यः, लक्ष्मीशर्मा, प्रथमम्-२०१६, चौखम्बा सुरभारती-वाराणसी।

१५. काशिका(४,५) वामनजयादित्यौ, जयशङ्करलालत्रिपाठी,द्वितीयम्-२०१२, तारा बुक एजेन्सी-वाराणसी।

१६. अमरकोषः, अमरसिंहः, हरगोविन्दमिश्रः, प्रथमम्-१९३९, चौखम्बा संस्कृत सीरिज आफिस-वाराणसी।

१७. वैयाकरणभूषणसारः, कौण्डभट्टः, शङ्करशास्त्री,प्रथमम्-१९५७, आनन्दाश्रमः-पूना।

१८. महाभारतम्, वेदव्यासः, रामनारायणदत्तशास्त्री, प्रथमम्-१९६५, गीताप्रेस-गोरखपुर।

१९. परमलघुमञ्जूषा, नागेशभट्टः, कालिकाप्रसादशुक्लः, प्रथमम्-१९६१, साधनाप्रेस-बड़ौदा।

२०. व्याकरणमहाभाष्यम्, पतञ्जलिः,भार्गवशास्त्री, कैयटः नागेशः वैद्यनाथपायगुण्डे च, द्वितीयम्-१९८७, चौखम्बासंस्कृतप्रतिष्ठानम्-देहली।

# महाभाष्यालोके सिद्धान्तरत्नाकर-कौमुदीमूलार्थ-विद्योतिनिटीकयोः 'ऋ लृक्' इति सूत्रविचारः

**श्रीओम शर्मा**

माहेश्वरसूत्रेषु द्वितीयमिदं सूत्रम्। महाभाष्ये प्रत्याहाराह्निके 'ऋ लृक्' इति सूत्रव्याख्यावसरे 'अथ लृकारोपदेशः किमर्थः?' इति लृकारोपदेशविषये एव प्रश्नं करोति भाष्यकार, न तु अन्येषां वर्णानां सन्दर्भे। अतः प्रतीयते प्रश्नकरणे अस्ति च किमपि तात्पर्यम्।, वर्तते च काचिद्विशेषवार्त्ता। यद्यपि नन्दीश्वरकृतकाशिकायामनेकेषामृषीणां नाना प्रकारिकायां जिज्ञासायां सत्यां शिवः सर्वजिज्ञासानिवृत्तये शिवसूत्रजालं विस्तारितवान् उक्तञ्च -

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**
**उद्धर्त्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्।।**

अर्थात् नृत्तम्पदार्थाभिनयं तस्य अवसाने=उपरान्ते नटानां राजा नटराजः नटराजानां राजा नटराजराजः उभयत्रापि षष्ठीसमासः। ननाद इति पदस्य अन्तर्भाविण्यर्थतया नादयामास इत्यर्थः। नवाधिकाः पञ्च नवपञ्च नवपञ्चानां वाराणां समाहारो नवपञ्चवारम्। सनकादिसिद्धाः = सनकः आदिर्येषां सिद्धानां तेषाम् उद्धारकामनया, अत्र सनकादिसिद्धानिति पदेन आदिसिद्धसनकादारभ्य इदानीन्तनानां सिद्धानामपि ग्रहणं भवति। ढक्कां=डमरूं निनादेन सूत्राणि प्रकाशितानि सन्ति। अत एव अन्यर्षीणां कृते लृकारस्योपदेशस्य फलं भवेत्, किन्तु पाणिन्युद्देश्यकं फलमस्ति न वा? इति उक्तप्रश्नस्य तात्पर्यमस्ति। अत एव सिद्धान्तरत्नाकरे लृकारविषये पूर्वपक्षः स्थापितः प्राचीनैः -'लृकारोपदेशो व्यर्थः फलाभावात्'। अन्त्यवर्णचतुर्दशं तु पाणिन्युद्देश्येनैवोपदिष्टं तदुक्तं नन्दिकेश्वरकृत-काशिकायाम्-

**अत्र सर्वत्र सूत्रेषु अन्त्यं वर्णचतुर्दशम्।**
**धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये।।**

अथ प्रकृतमनुसरामो वयम्-उपर्युक्तप्रश्नकरणेऽयमस्ति विशेषः अस्य हि लृकारस्याल्पीयान् चैव प्रयोगविषयो वर्त्तते। यश्चापि प्रयोगविषयः सोऽपि क्लृपिस्थस्यैव। कृपेश्च लत्वमसिद्धमस्ति यतोहि 'कृपो रो लः' इति त्रैपादिकं सूत्रमस्ति। अतः लत्वस्या सिद्धत्वात् ॥ कारस्यैवाच्कार्याणि भविष्यन्ति तस्मान्नार्थ लृकारोपदेशेन। इत्युक्त्वा

भाष्यकार: लृकारोपदेशस्य प्रयोजनानि पठति– 'लृकारोपदेशो यदृच्छाऽशाक्तिजानुकरण-प्लुत्याद्यर्थ:' तर्हि कोऽयं यदृच्छा शब्द: तदा भाष्यकार: लिखति–चतुष्टयी शब्दानां प्रवृत्ति:–जातिशब्दा:, गुणशब्दा:, क्रियाशब्दा:, यदृच्छाशब्दाश्च। यथा यदृच्छया कश्चित् लृतको नाम, तस्मिन् अच्कार्याणि यथा स्यु:,तदर्थं लृकारोपदेश: आवश्यक:। तेन दध्यळतकाय देहि,मध्वळतकाय देहि इत्यादिप्रयोगा: सिद्ध्यन्ति। किन्तु न सन्ति यदृच्छाशब्दा: इत्युक्त्वा लृकारोपदेशस्य प्रथमं प्रयोजनं प्रत्याख्यातम्।

अशक्तिजानुकरणार्थं लृकारोपदेशस्य द्वितीयं प्रयोजनं भाष्यकारेण पठितम्। तद्यथा–अशक्त्या कयाचित् ब्राह्मण्या 'ऋतक्' इति शब्दस्य प्रयोगस्थाने 'लृतक्' इति प्रयुक्तम्। तस्यानुकरणं 'ब्राह्मण्यळतक' इत्याह, 'कुमार्यळतक' इत्याहेति। कैयटेन प्रदीपे अशक्तिजानुकरणशब्दानां जातिशब्दत्वं प्रतिपादितम्। यस्मात् अनुक्रियमाणे शब्दे या जाति: समवेता तत्संबद्धमनुकार्यमनुकरणं प्रत्यायति। "अनुकरणं शिष्टाऽशिष्टाऽप्रतिषिद्धेषु यथा लौकिक वैदिकेषु" अर्थात् अनुकरणं हि शिष्टस्य साधुर्भवति। अशिष्टाऽप्रतिषिद्धस्य तु नैव दोषाय भवति नाभ्युदयाय।

शिष्टानामनुकरणं यथा–लोके तावद् य एवमसौ ददाति य एवमसौ यजते, य एवमसावधीते। एतस्य यदि कोऽप्यनुकरणं करोति सोऽप्यभ्युदयेन युज्यते। अशिष्टाऽप्रतिषिद्धं यथा–य एवमसौ हिक्कति य एवमसौ हसति, य एवमसौ कण्डुयति। एतस्य यदि कोऽप्यनुकरणं करोति चेत् नैव तद्दोषाय स्यात् नाभ्युदयाय, इत्यादि प्रपञ्चं निरूप्य न च अपशब्द: प्रकृति: न ह्यपशब्दा उपदिश्यन्ते, न चानुपदिष्टा प्रकृतिरस्ति।

यद्यपि लृकारस्योपदेशस्य तृतीयप्रयोजने तत्प्रत्याख्यानाय 'गुरोरनृतोऽन्त्य-स्याप्येकैकस्य प्राचाम्' इत्यस्य स्थाने होतलृकार इत्यादौ दोषवारणाय (प्लुतकार्याय) 'गुरोररवतोऽनन्त्यस्याप्येकैकस्य प्राचाम्' इति सूत्रभेदेनेष्टसिद्धिं प्रदर्श्य 'प्लुताद्यर्थ: लृकारोपदेश:' प्रत्याख्यातुं शक्यते किन्तु अयं प्रत्याख्यानपन्था: 'महतो वंशस्तम्वात् लट्वानुकर्षणवद् अयुक्तं प्रतिभाति। अत एव प्लुताद्यर्थ: लृकारोपदेश: आवश्यक इति कैयटस्यापि मतम्। किन्तु नागेशस्तु प्रकृतभाष्यमुद्योते इत्थं वर्णयति–बह्वायाससाध्यमल्पफलं तु न युक्तमत एव लृकारोपदेशस्य प्रत्याख्यानमपि कर्तुं शक्यते। किन्तु भाष्यकारेण अशक्तिजानुकरणार्थत्वम् लृकारोपदेशस्य प्रयोजनं स्थापितमिति सन्दर्भे तु नास्ति नागेशस्यापि कश्चन विरोध:।

सिद्धान्तरत्नाकरे तु– श्रीरामकृष्णभट्टेन लृकारोपदेशो व्यर्थ: फलाभावात् इत्यस्य स्थापनं कृतम्। तद्यथा– ऋलृक् इति सूत्रव्याख्यावसरे सिद्धान्तरत्नाकरकार: प्रतिपादयति यत्– ननु इह लृकारोपदेशो व्यर्थ: फलाभावात्। न च कृपेर्लत्वे कृते कल्प्यते इत्यादौ लृकारस्य इक्भिन्नत्वात् लघूपधगुणो न स्यादिति वाच्यम् ऋ यतोहि लत्वस्यासिद्धत्वात् ऋकार एव तदुपपत्ते:। अपि च क्लृपिस्थ'लृ'कारस्यानुकरणे असिद्धत्वाभावात् 'दध्यळकार:'

इत्यादौ यणादि कार्यार्थमिति न वक्तव्यं यतोहि 'ऋलृवर्णयोः सावर्ण्यं वाच्यम्' इति वार्त्तिकात् ऋकारलृकारयोः सावर्ण्यविधानात् ऋकारकार्यस्य लृकारेऽपि संभवात्॥ ॥कारलृकारयोः सावर्ण्यविधानमिति तु न वक्तुं शक्यते यतोहि 'प्राल्कारीयती'त्यादिषु प्रयोगेषु 'वा सुप्यापिशलेः' इत्यत्र ऋतीत्यनुवृत्या ऋकारादौ सुब्धातौ विधीयमानवृद्ध्यर्थं सावर्ण्यविधेरावश्यकत्वात्। यद्यपि 'प्रकृतिवदनुकरणं भवति' इत्यतिदेशानुकरणेऽप्य-सिद्धत्वस्य वक्तुं शक्यत्वात् तथापि यत्कार्यं प्रति लत्वं नासिद्धं तदर्थः सः। तथा च 'क्लृप्तः क्लृप्तवान्' इत्यत्र 'अनचि च' इति सूत्रेण द्वित्वं यथा स्यात्,अन्यथा द्वित्वं प्रति लत्वस्य असिद्धत्वाभावेन लृकारस्याच्विरहात्तन्न स्यात्। अपि च 'क्लृ३प्तशिखः' इत्यत्र 'गुरोरनृतोऽन्त्यस्याप्येकैकस्य प्राचाम्' इति सूत्रेण प्लुतो यथा स्यात्। न च 'दध्य्लृकारः' इत्यादौ 'प्रकृतिवदनुकरणं भवती'ति परिभाषया तत्सिद्धिः, 'यत्तदेतेभ्यः परिमाणे वतुप्' इति सूत्रनिर्देशेनानित्यत्वादिह तस्याप्रवृत्तेः। न च 'एकदेशविकृतमनन्यवत्' इति परिभाषया इकारात् परत्वमाश्रित्य द्वित्वोपपतौ किं तेनेति वाच्यम्॥ एकदेशविकृतमनन्यवत् इति न्यायस्य स्थानिवत्सूत्रस्थत्वेन यथोद्देशपक्षे तं प्रति लत्वस्यासिद्धत्वादुक्तन्यायस्य लत्वेऽप्रवृत्तेः। अत एव क्लृप्तशिख इत्यत्र 'अनृत....' इति प्लुतनिषेधो न शङ्क्यः, 'गम्लृ-सुप्लृ' इत्यत्र लृकारानुकरणे सति दध्य्लृकार इत्यादौ यणादिकार्यार्थं तस्यावश्यकत्वाच्च। न च ऋकारलृकारयोः सावर्ण्यविधानादेतत्सिद्धिः॥ उपर्युक्तवार्त्तिकं दृट्वा सूत्रकृतोऽप्रवृत्तेः। किं च क्लृप्तशिख इत्यत्र 'अनृतण्णण्ण' इति निषेधं वारयितुं सावर्ण्यस्यानित्यत्वं वाच्यम्, तच्च लृकारोपदेशेन ज्ञाप्यते। इत्येवं प्रकारेण सिद्धान्तरत्नाकरकारः प्राचीनानां मतं निरूप्य स्वमतं निरूपयति–

वस्तुतस्तु 'अनृत.....' इति निषेधस्य 'सञ्ज्ञा पूर्वको विधिरनित्यः' इति न्यायेन सञ्ज्ञापूर्वकविधेरनित्यतया 'क्लृ३प्तशिखे'त्यत्र प्लुतसिद्धेः लृकारोपदेशो व्यर्थः। लृकारोपदेशव्यर्थे हेतुद्वयमस्ति-(१)निषेध्यसर्म्पकस्य प्लुत इति पदस्य सञ्ज्ञात्वात्। (२) अनृत इत्यस्य पर्युदासत्वेऽपि ऋत इत्यस्य पर्युदस्यमान सर्म्पकस्य सञ्ज्ञात्वानपायात्। किन्तु कौमुदीमूलार्थविद्योतिन्यां तु सिद्धान्तरत्नाकरवत् प्रत्याख्यानविषयकचर्चा नास्ति, नापि भाष्यवत् लृकारोपदेशस्य प्रयोजनान्युक्तानि। अपितु कौमुदीमूलार्थविद्योतिनीकारेण दीनबन्धुझामहोदयेन अद्यत्वे समाजोपयोगी 'लृकार' इत्यस्योच्चारणं कथं भवेदिति विचारो प्रतिपादितः। तद्यथा- 'ऋलृक्' इति सूत्रे त्रयबोध्यवर्णानि वर्णसङ्घातरूपाणि सन्ध्यक्षराणि उच्यन्ते। तत्रा ऋकारस्य मध्ये रेफः उभयतोऽज् भागः। तेन वर्णैकदेशाः वर्णग्रहणेन गृह्यन्ते इति पक्षे प्रार्तऋतम् मातृरूपमित्यादौ रोरीति सूत्रं न प्रवर्त्तते।

लृकारस्य मध्ये लकारः आदावन्ते च ऋकारवद् अज् भागः। अत एव अनयोर्व्यजनध्वनिरिति विशेषः। अन्ते अज्भागश्च इकारध्वनिरिति। अत एव 'रि-लि' वत् अनयोरुच्चारणं बोध्यम् , न तु 'रि ल्रि' इतिवत्। अत्र सन्दर्भे भाष्यकार एव प्रमाणं तद्यथा - लृकारोपदेशो यदृच्छाऽशक्तिजानुकरणप्लुताद्यर्थमिति वार्तिकव्याख्यायां

भाष्यकारेणोक्तं यत् – अशक्त्या कयाचिद् ब्राह्मण्या ॥तक् इति प्रयोक्तव्ये लृतक् इति प्रयुक्तम्, तस्यानुकरणे वृद्धब्राह्मणी 'लृतक' इत्याह। अत्र चिन्तयन्तु भवन्तः यदि लृकारेऽपि रेफभागः स्यात् तदा तु ऋकारमुच्चारणेऽशक्ता ब्राह्मणी लृकारमध्ये कथं रेफभागोच्चारणं कर्त्तुं प्रभवति। अत लृकारे नैव रेफभाग इति स्पष्टं लभते। अन्यथा उक्तभाष्यासङ्गतिस्स्यात्। तस्मात् लृकारे नैव रेफभाग इति स्पष्टमेव लभ्यते।

अपि च 'चकृपे कृप्तम्' इत्यादिप्रयोगेषु 'कृपो रो लः' इति सूत्रेण रेफस्य स्थाने लादेशे रेफसदृशस्य वा लकारसदृशादेशे चलृपे क्लृप्तमिति। अत्र विचारणीयोऽयं विषयः वर्त्तते यत्– रेफो वा रेफसदृशो वा कथं स्यात्? एवम् आदेशेन स्थानिनिवृत्तेरवश्यं भावात्, अन्यथा चलीक्लृप्यत् इत्यत्र पूर्वत्रापि रेफश्रवणापत्तिस्स्यात्। अपि च वैयाकरणसिद्धान्तकौमुद्याम् 'अकः सवर्णे दीर्घः' इति सूत्रे होतृ–ॠकार इति प्रयोगावसरे 'ऋति सवर्णे ऋ(ॠ) वा' 'लृति सवर्णे लृ (ल्लृ) वा' इत्युभयत्रापि विधेयं वर्णद्वयं द्विमात्रम्, तत्रा आद्यस्य मध्ये द्वौ रेफौ तयोरेका मात्रा अभितोऽज्भक्तिः। उक्तप्रयोगे ऋकारस्य लृकारस्य च स्थाने नृसिंहवत् द्व्यन्तरात्मा लृकारो द्विलकारवान् कश्चिद्वर्णो भवति। तथा च द्वितीयवार्तिकद्वारा विधेयविषये तु मध्ये द्वौ लकारौ अभितोऽज्भक्तिः। अनेन व्याख्यानेनापि स्पष्टमेव प्रतीयते यत्– यदि लृकारमध्येऽपि रेफोच्चारणं स्यात्तदा तु 'द्वितीयस्य मध्ये लकाररेफा'विति भट्टोजिदीक्षितः वदेत्, किन्तु तथा नोक्तमाचार्येण अनेन स्पष्टं प्रतिभाति यत् लृकारे नास्ति रेफभागः।

पुनः कौमुदीमूलार्थविद्योतिनीकारः स्वदाक्षिणात्यगुरूनुदाहरति यत्–मम गुरवः ऋलृक् इत्यादौ लकारमात्रोपरागेणैव उच्चारणं कुर्वन्ति स्म। तथा च वेदेऽपि क्लृप्तादि पदे रेफशून्यतयैव लृकारोच्चारण सम्प्रदायो दृश्यते।

महाराष्ट्रादिषु प्रदेशेषु तु 'ऋ' इत्यस्य रू इत्युच्चारणम् 'लृ' इत्यस्य लु इतिवत् ऋकारळकारयोरुच्चारण सम्प्रदायः। तन्मते अन्ते उकारध्वनिः इति विशेषः। किन्तु ब्रजमण्डले ऋकारळकारोच्चारणं 'रि ल्रि' इतिवत् भवति अर्थात् तन्मते अन्ते इकारध्वनिः। अत एव भर्त्तृहरिणा वाक्यपदीये उक्तम्–

**दैवीवाग्व्यतिकीर्णेयमशक्तैरभिधातृभिः।**
**अनित्यदर्शिनां त्वस्मिन्वादे बुद्धिविपर्ययः।।**

किन्तु यजुर्वेदे प्रातिशाख्यनिर्देशानुसारं ऋकारान्तेषु वर्णेषु एकारान्तध्वनिः उच्चार्यते, अत एव यजुर्वेदानुसारं तु ऋकारस्य 'रे' इतिवदुच्चारणं तथा लृकारस्य 'ले' इतिवदुच्चारणं कर्त्तव्यम्। अनेन व्याख्यानेन सुस्पष्टं प्रतिभाति यत् लृकारे रेफोच्चारणं सर्वथा निर्मूलम् इति सुधियो विभावयन्तु.।।

**सन्दर्भाः**

१. नन्दिकेश्वरकाशिका-१

२. नन्दिकेश्वरकाशिका-२
३. पाणिनिसूत्रम्- ०८.०२.१८
४. ऋलृक् इति सूत्रे भाष्यवार्त्तिकमिदम् अर्थगतं प्रवृत्तिनिमित्तमनपेक्ष्य यः शब्दः प्रयोक्तृ-अभिप्रायेणैव प्रवर्तते स यच्दृच्छा-शब्दो यथा-डित्थादिः।
५. लट्वापक्षिविशेषो फलविशेषो वा।
६. पाणिनीयसूत्रम्-०६.०१.९२
७. परिभाषेन्दुशेखरः-३६
८. पाणिनीयसूत्रम्-०८.०४.४७
९. पाणिनीयसूत्रम्-०८.०२.८६
१०. पाणिनीयसूत्रम्-०५.०२.३९
११. परिभाषेन्दुशेखरः-३७
१२. पाणिनीयसूत्रम्-०६.०१.१०१
१३. वाक्यपदीयब्रह्मकाण्डम्-१५४

## सन्दर्भग्रन्थसूची

१. पाणिनीयशिक्षा, पाणिनिः, आमोदवर्धनकौण्डिन्यायनादित्रयः, शिवराज आचार्यः कौण्डिन्यायनः, प्रथमम्-२०१५, चौखम्बा विद्याभवनम्, वाराणसी।

२. कौमुदीमूलार्थविद्योतिनी, दीनबन्धुझा, शशिनाथझा, प्रथमम्, १९८६, कामेश्वर-सिंहदरभङ्गासंस्कृतविश्वविद्यालयः, दरभङ्गा।

३. वाक्यपदीयम्, भर्तृहरिः, रामकिशोर त्रिपाठी, प्रथमम्,१९९७, भारतीय-विद्या-संस्थानम्, वाराणसी।

४. लघुसिद्धान्तकौमुदी(५), वरदराजाचार्यः, भीमसेन शास्त्री, द्वितीयम्, २००६, भैमीप्रकाशनम् -दिल्ली।

५. अष्टाध्यायीसूत्रपाठः, पाणिनिः,पुष्पादीक्षितः, प्रथमम्-२०१०, संस्कृतभारती-नई दिल्ली।

६. लघुसिद्धान्तकौमुदी(६), वरदराजाचार्यः, भीमसेन शास्त्री, द्वितीयम्-२००५, भैमीप्रकाशनम्-दिल्ली।

७. सिद्धान्तरत्नाकरः, रामकृष्णभट्टः, आजादमिश्रः, प्रथमम्-१९९५, साहित्य शिल्पी-लखनऊ।

८. वैयाकरणसिद्धान्तकौमुदी(१), भट्टोजिदीक्षितः, गुरुप्रसादशास्त्री त्रयः, प्रथमम्, २०१२, चौखम्बा सुरभारती-वाराणसी।

९. प्रौढमनोरमा, भट्टोजिदीक्षितः, बालकृष्णशास्त्री, द्वितीयम्, १९४०, वाणीविलासः-वाराणसी।

१०. परिभाषेन्दुशेखरः, नागेशभट्टः, सत्यनारायणमूर्त्तिः, प्रथमम्-२००४, राष्ट्रिय-संस्कृत-विद्यापीठम्, तिरुपतिः।

११. सिद्धान्तकौमुदी(१), भट्टोजिदीक्षितः, गोविन्दाचार्यः, लक्ष्मीशर्मा, प्रथमम्-२०१५, चौखम्बासुरभारती-वाराणसी।

१२. शब्दकौस्तुभः, भट्टोजिदीक्षितः, विन्ध्येश्वरीप्रसादद्विवेदी गणपतिशास्त्रीमोकाटे च, द्वितीयम्-१९९१,चौखम्बासंस्कृतसीरीजआफिस-वाराणसी,

१३. व्याकरणमहाभाष्यम्(१,) पतञ्जलिः, गुरुप्रसादशास्त्री, बालशास्त्री, द्वितीयम्-२००१, प्रतिभा प्रकाशन-दिल्ली।

१४. लघुसिद्धान्तकौमुदी(१), वरदराजाचार्यः, भीमसेनशास्त्री, तृतीयम्-१९९३, भैमी-दिल्ली।

१५. वैयाकरणसिद्धान्तकौमुदी (२), भट्टोजिदीक्षितः, गोविन्दाचार्यः, लक्ष्मीशर्मा, प्रथमम्-२०१६, चौखम्बा सुरभारती-वाराणसी।

१६. काशिका(१) वामनजयादित्यौ,जयशङ्करलालत्रिपाठी,द्वितीयम्-२०१२, तारा बुक एजेन्सी-वाराणसी।

१७. अमरकोषः, अमरसिंहः, हरगोविन्दमिश्रः, प्रथमम्-१९३९, चौखम्बा संस्कृत सीरिज आफिस-वाराणसी।

१८. संस्कृत व्याकरण शास्त्र का इतिहास, युधिष्ठिरमीमांसकः, प्रथमम्-१९७३, रामलाल कपूर ट्रस्ट-सोनीपत।

१९. वैयाकरणभूषणसारः, कौण्डभट्टः, शङ्करशास्त्री, प्रथमम्-१९५७, आनन्दाश्रमः-पूना।

२०. वेदान्तसारः, सदानन्दः, रामशरणत्रिपाठी, प्रथमम्-१९५४, चौखम्बा विद्या भवन-वाराणसी।

२१. परमलघुमञ्जूषा, नागेशभट्टः, कालिकाप्रसादशुक्लः, प्रथमम्-१९६१, साधनाप्रेस-बड़ौदा।

२२. व्याकरणमहाभाष्यम्, पतञ्जलिः, भार्गवशास्त्री, कैयटः नागेशः वैद्यनाथपायगुण्डे च, द्वितीयम्-१९८७, चौखम्बासंस्कृतप्रतिष्ठानम्-देहली।

२३. https%èkèksa.wikipedia-orgèk

# महाभाष्ये वर्णिता पतञ्जलिकालिकी कृषिव्यवस्था

**सुरेश शर्मा**
ज्योतिषविभागः राष्ट्रियसंस्कृतसस्थानम्
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः, उत्तराखण्डः

भारतदेशो ह्यस्माकं कृषिप्रधनदेशोऽस्ति। कृषिः भारतीय-अर्थव्यवस्थाया मेरुदण्डोऽस्ति। अस्माकं देशस्य समस्तक्षेत्रफलस्य एकपञ्चाशतप्रतिशतमिते क्षेत्रफले कृषिकार्यं भवति तथा द्विपञ्चाशत-प्रतिशतं जनाः कृष्युपर्याश्रिताः सन्ति। सम्पूर्णविश्वे भारतीयकृषिः सुप्रसिद्धाऽस्ति कृषिकार्यमिदं भारतवर्षे वैदिककालात् प्रचलति। इदं मन्यते यद् ब्रह्मणा विश्वस्य सर्जनं कृत्वा सर्वप्रथमं भारतदेशे मानवजातेः सर्जनमकरोत्। अस्य कारणमिदमासीद् यद् भारतवर्षस्य भूमिः सर्वाधिका उर्वरा आसीत्। भारतभूमौ एव मावजीवनोपयोगिसर्वविधवस्तूनामुत्पादनक्षमता आसीत्। अतः कृषेः प्रारम्भः भारतदेशादेवाभवत्। प्रमाणरूपेण वैदिकवाङ्मयेऽस्माकं कृषिव्यवस्थाया महनीयोल्लेखः प्राप्यते। तद् यथा-

अक्षैर्मा दीव्यः कृषिमित् कृषस्य वित्ते रमस्व बहुमन्यमानः।

वैदिकवाङ्मये बीजवपनम्, क्षेत्रकर्षणम्, कृष्युपकरणानि, धान्यानां प्रकारादिनां विवेचनं सविस्तरेणावाप्यते। वैदिकवाङ्मयानन्तरं कृष्या स्थितिज्ञानार्थं लौकिक-वाङ्मयमेवाश्रयणीयम्। अस्माकं प्राचीनग्रन्थकारैः काले-काले स्वग्रन्थेषु तात्कालिक-कृषिव्यवस्था प्रतिपादिता। एतादृग्ग्रन्थेषु महर्षिपतञ्लिकृतं महाभाष्यं महत्त्वपूर्णं स्थानं विभर्ति।

पतञ्जलिकृतं महाभाष्यं न केवलं व्याकरणशास्त्रस्याद्भुतो ग्रन्थोऽस्त्यपितु तात्कालिकैतिहासिकस्रोतोऽप्यस्ति। भगवता पतञ्जलिना महाभाष्ये तात्कालिकी सामाजिक-राजनैतिक-आर्थिकव्यवस्था विविधोदाहरणानां माध्यमेन प्रतिपादिता। भारतीयानामभ्युदये समुचिते काले सुसम्पन्नस्यास्य महाभाष्यस्यावलोकनेन ज्ञायते यत् तस्मिन् काले भारतस्य का वा दशाऽऽसीत्, कथञ्चैतद्देशीया कालं यापयन्ति स्म, कृष्यादिकं तदा कीदृशमासीत्, जातिविभागः कथं क्रियते स्म, तदानीन्तनानां मनुष्याणां स्वभावः कथमासीत्, देशे तदानीं प्रमाणादीनां व्यवहार आसीन्न वा, जनानां लोकव्यवहारः कथमासीत्, ग्रामनगरादीनां व्यवस्था निर्माणव्यवस्था वा कथं क्रियते स्म, चिकित्सीयव्यवस्था कीदृश्यासीत् - इति।

बहुसंख्याकाः भारतीय-पाश्चात्यविद्वांसः महाभाष्यकारस्य कालः १५० ईसापूर्व मन्यन्ते। युधिष्ठिरमीमांसकानुसारेण पतञ्जलिः काश्मीरदेशस्य निवासी आसीत्। परं तदपि समीचिनं न मन्यन्ते विद्वांसः। महाभाष्याध्ययनेन ज्ञायते यत् पुष्यमित्राः स्वकीयशासनकाले विशालयज्ञमायोजयत्। तस्मिन् यज्ञे समुपस्थितेषु पण्डितेषु पतञ्जलिरप्यासीत्। तद्यथा - ''भवद्विधः क्षत्रियं याजयेत्। पुष्यमित्रं याजयामः।'' इत्यादयः। मत्स्यपुराणानुसारेण पुष्यमित्रस्य कालः १४९ ईस्वीपूर्वतः १८५ ईस्वीपूर्व यावत् ३६ वर्षमित आसीत्।

पतञ्जलेः जन्मस्थानविषयेऽपि मतैक्यं नास्ति पण्डितेषु। पतञ्जलिः कात्यायनकृते ''दक्षिणात्यः'' इति शब्दस्य प्रयोगं करोति येनेदं प्रतीयते यत् स उत्तरभारतीय आसीत्। तस्य जन्मस्थानविषये 'गोनर्दः' शब्दस्य प्रयोगः बहुत्र प्राप्यते। पण्डितानां मतानुसारेण गोनर्दः अवधप्रदेशस्य गोंडानामस्थानमस्ति।

पतञ्जलिकाले कृषिविषये जनानां कीदृशं ज्ञानमासीत्, कथं वा तेषां कर्षणं भवति स्म के के वा कर्षका आसन्, इत्यादिविषये भाष्ये प्रदत्तोदाहरणैः अत्र विचारो विधीयते। तत्रा ''वर्णो वर्णेन'' इत्येतस्य सूत्रस्य व्याख्यानावसरे भगवता प्रोक्तं यत् - इयं हि सर्वे मनुष्या अल्पेनाल्पेन महतो महतोऽर्थान् काङ्क्ष्यन्ति। एकेन माषेण शतसहस्रम्। एकेन कुद्दालपदेन खारीसहस्रम्।'' इति।

वर्तमानकाले सर्वेषामयं स्वाभाविको धर्मः यदल्पप्रयासेन महती कार्यसिद्धिरपेक्ष्यते। उदाहरेणेनेदं ज्ञायते यत् तस्मिन् कालेऽपि जनानां स्वभाव एतादृगेवासीत् यदेकमाषसुवर्णेन वस्त्रादीनां शतं सहस्रमपीच्छन्ति स्म। अथवा एकेन माषेण सहस्रसंख्याकान् माषानपीच्छन्तिस्म। तथा ''एकेन कुद्दालपदेन खारीसहस्रम्'' अत्र कुद्दालपदेन खनिताग्रस्थितपरिमितधान्येन तादृशधान्यवापेन, अथवा खननार्थं भूम्यां पतितः कुद्दालो यत्परिमितं क्षेत्रं व्याप्नोति तत्परिमितेन क्षेत्रेण खारीणां सहस्रमिच्छन्ति। वस्तुतः कर्षकाणामयं व्यवहारः यदेकेन हलेनैकस्मिन् दिवसे यावन्मितं क्षेत्रं क्रष्टुं शक्यते तावन्मितं क्षेत्रं एकहलक्षेत्रं, तथैकेन कुद्दालेनैकस्मिन् दिवसे यावत्क्षेत्रं क्रष्टुं शक्यते तत्कुद्दालपदमितं क्षेत्रम्। कुद्दालपदमितक्षेत्रेण धन्यानां खारीसहस्रमिच्छन्ति। अत्र खारीशब्दः धान्यादीनां भारप्रमाणम्। ज्योतिर्गगनभास्करः आचार्यभास्करः लीलावत्यां निरूपयति यत् -

**हस्तोन्मितैर्विस्तृतिदैर्घ्यपिण्डैर्यत् द्वादशास्त्रां घनहस्तक्षेत्रम्।**
**धान्यादिके यद् घनहस्तमानं शास्त्रोदिता मागधखरीका सा।।**

अर्थात् हस्तमितं विस्तृतम्, हस्तोन्मितं दीर्घं पिण्डं च यत्क्षेत्रं पात्रं वा निर्मीयते तत् घनहस्तक्षेत्रं तथा मगधदेशे धान्यादीनां तौलमाने तत्क्षेत्रं खारीपदेन व्यवह्रयते।

द्रोणैस्तु खार्याः खलुः "षोडशांशः स्यादाढको द्रोणश्चतुर्थभागः।......९

इत्यादिभास्करोक्तप्रमाणैः खारीसहस्रैः एकमणमितं भारप्रमाणं भवति। अत एक कुद्दालपदमितक्षेत्रेण खारीसहस्रमितमेकमणमितं वा धान्यमिच्छन्ति।

कथं कुद्दालपदमितक्षेत्रेण खारीसहस्रमितं धान्यमुत्पादयितुं शक्यते? एतत्तु तदैव सम्भाव्यते यदि धान्यानां सेचनार्थं जलस्य सम्यम् व्यवस्था स्यात्। अस्यापि प्रमाणं तत्रोपलभ्यते। ''मीनाति मिनोतिदीघाल्यापि च'' इति सूत्रे ''अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा शाल्यर्थं कुल्या प्रणीयन्ते ताभ्यश्च पानीयं पीयत उपस्पृश्यते च शालयश्च भाव्यन्ते'' इति व्यहारदर्शनात् ज्ञायते यत् कृषकाः वृष्ट्युपरि एवाश्रिता नासन् अपितु सेचनार्थं कृत्रिमसाधनानामपि प्रयोगं कुर्वन्ति स्मः। कुल्या-शब्दः कृत्रिमनदीवाचकः ''कुल्याल्पा कृत्रिमा सरित्'' इत्यमरकोशवचनात् कुल्याः जलस्रोतात् क्षेत्रं यावत् नीता कृत्रिमा वारिप्रवाहिकाऽल्पा नदी वा भवति। तथाविधानां कुल्यानां शाल्यर्थं निर्माणेन समृद्धशालीमान् देशो भविष्यतीति व्यवहारदर्शनादनुमीयते।

**शालीप्रकाराः**- महाभाष्याध्ययनेनेदं ज्ञायते यत् शालीनां प्रकारा अपि भिन्नास्तथा देशविशेषे विशिष्टा चासन्। यथा ''वर्णो वर्णेन'' इति सूत्रे ''लोहितशालीमान् ग्रामः'' इत्युदाहृतम्। अनेन ज्ञायते यत् कश्चित् शालयोः लोहितवर्णा भवन्ति स्म तथा लोहितवर्णाः शालयः ग्रामविशेषे भवन्ति स्म। एवमेव ''सर्वबीजी ग्रामः'' कश्चित् ग्रामः सर्वबीजी आसीत्। तस्मिन् ग्रामे कृषकाः सर्वविधधान्यानामुत्पादनं कुर्वन्ति स्म।

तस्मिन् काले जनाः धान्येनैव धनिनो भवन्ति स्म। भगवता ''तृतीया तत्कृतार्थेन गुणवचनेन'' इति सूत्रे ''धान्येन धनवान्'' इत्युदाहरणेन ज्ञायते यद् जनाः धान्येनैव धनी न तु धनेन। अर्थात् मुद्राणां व्यवहारो नासीत् तथा जनाः धान्येनैव क्रयविक्रयस्य व्यवहारं कुर्वन्ति स्म। यदा कश्चिज्जनः वस्त्रमिच्छति तदा सः धान्यप्रदानेन वस्त्रं क्रीणाति स्म। पतञ्ललिकालिकाः कृषकाः सामाजिकव्यवहारकुशला अपि आसन्। ''पञ्चभिर्हलैः कर्षयति'' इत्युदाहरणे एकः कृषकः पञ्चभिर्हलैः क्षेत्रं कर्षयतीति ज्ञायते। पञ्चभिर्हलैः कर्षणार्थं दशवृषाणामावश्यकता वर्तते। परं प्रायश एकस्य कृषकस्य पार्श्वे दशवृषाः भवितुं न शक्नुवन्ति। अतः ग्रामस्य सर्वे कृषकाः प्रथममेकस्य कृषकस्य क्षेत्रं कर्षति स्मः, अनन्तरं च द्वितीयस्य। अनेन कर्षणकार्यं शीघ्रं सम्पाद्यते स्म तथा पारस्परिक-सहयोगस्य भावोऽपि वर्धते स्म।

एवं प्रकारेण पतञ्जलिकृतं महाभाष्यं व्याकरणशास्त्रस्याद्भुतग्रन्थः त्वस्त्येवापितु तात्कालिकीनां सामाजिक-आर्थिकादिव्यवस्थानां महत्त्वपूर्णस्रोतोऽप्यस्ति। सूत्राणां व्याख्यानप्रसङ्गे भगवता यान्युदाहरणानि प्रदत्तानि तेषामध्ययनेन ज्ञायते यत् तस्मिन् काले कृषिव्यवस्था सुसम्पन्ना आसीत्। बहुमात्रायां धान्यस्योत्पत्तिर्भवति स्म। तस्मिन् काले कृषकाः न केवलं वृष्ट्युपरि एवाश्रिता आसन् अपि तु धान्यानां सेचनार्थं कृत्रिमसाधनानां कुल्यानां वा प्रयोगं कुर्वन्ति स्म। धान्यानां विविधप्रकारा उपलब्धा आसन्। ग्रामविशेषे

धान्यविशेषस्यापि प्रमाणं दृश्यते।

**सन्दर्भाः**

१. ऋग्वेद-34.13
२. महाभाष्यम्-३.३.१४७
३. महाभाष्यम्-३.२.१२३
४. महाभाष्यम्-१.१.६८
५. लीलावतीपरिभाषा श्लो.सं.-८
६. महाभाष्यम् -६.१.४०
७. महाभाष्यम् -१.१.६८
८. महाभाष्यम्-२.१.२९

**सन्दर्भग्रन्थसूची -**

१. महाभाष्यम्
२. लीलावती, लषणलाल झा, चौखम्बा संस्कृत प्रतिष्ठानम् वाराणसी।
३. ऋग्वेद:

# अष्टाध्याय्यां महाभाष्ये शिक्षाव्यवस्थायाः परिशीलनम्

**अजयकुमार पोखरियालः**

शोधच्छात्रः

उत्तराखण्डसंस्कृतविश्वविद्यालयः, हरिद्वारम्

शिक्षायाः मूलभूता ब्रह्मचर्यप्रणाल्यासीत्[१] इत्यव न केवलं शिक्षाविषये प्रत्युत ज्ञानसंचयचर्या तथान्तरिकजीवननिर्माणे चावधानं प्रदीयते स्म किन्तु। गुरुशिष्यौ परस्परं विद्यासम्बन्धेन युक्तौ भवतः स्म[२]। उक्तसम्बन्धः योनिसम्बन्ध इव पवित्रः तथा प्रभावपूर्णश्चासीत्। शिष्याः अन्तेवासिरूपेणाचार्येण साकमेव वसन्तो वास्तविकतयाचार्य-जीवनेन प्रभाविताः भवन्ति स्म। तथा च ब्रह्मचारिणः चरणनायकविद्यासंस्थाने अन्यब्रह्मचारिभिस्साकं विद्याध्ययनं कुर्वन्ति स्म। आचार्यजीवनस्य वेगः शक्तिश्च तत्स्थापितचरणमाध्यमेन प्रकटिता भवति स्म। ब्राह्मणक्षत्रियवैश्यवर्णानां ब्रह्मचारिणः ‘‘वर्णी’’ इत्युच्यन्ते स्म (वर्णाद् ब्रह्मचारिणि)। अयं शब्दः संहिताब्राह्मणेष्वविदितः आसीत्। गुरोः सान्निध्येऽधीयानानां कृते ‘‘छात्रः’’ इति सामान्यशब्दः प्रयुज्यते स्म[३]। छात्रशब्दस्य व्युत्पत्तौ मधुरा कल्पना क्रियते यत् सः आचार्यजीवने छत्रमिवाच्छादको भवतीति। (छत्रं शीलमस्य)। अयमेकः आध्यात्मिकः विचारः, येन शिष्यः गुरुं प्रति विशेषतया जागरूकः सम्भूय स्वकर्त्तव्यपालनस्य बलमवाप्नोति स्म (गुरुकार्येष्ववस्तिः)। उच्यतेऽपि यत् सः गुरूणां त्रुटिं प्रति मनः संयोज्य स्वशक्तेः नाशं न करोति स्म तथा ब्रह्मचारिणं स्नातं कुर्वाणः आचार्यः अपि तथैव चिन्तयति स्म यत् मम सदाचारमेव ते स्वीकुर्युः न तु त्रुटीः।

छात्राः द्विधा भवन्ति स्म - दण्डमाणवाः अन्तेवासिनश्च[४]। दण्डमाणवाः केवलं माणवाः इत्युच्यन्ते स्म[५]। ते प्रारम्भिकाः अध्ययनरताः छात्राः भवन्ति स्म। यथा पतञ्जलिरप्याह यत् ‘वेदाध्ययनात् पूर्वं छात्रस्य माणवकसंज्ञा भवतीति[६]। तत्त्वबोधिन्यनुसारं तु सः दण्डमाणवः यस्योपनयनं नाभवत्। दण्डधारणात् ते दण्डमाणवाः इत्युच्यन्ते स्म। पलाशस्य सः दण्ड आपाढः कथयामास। मतंगजाते[७] माणवः वयसि बालः इत्युक्तः। ते निजदण्डधृताः आश्रमे इतस्ततः परिभ्रमन्तः परिदृश्यन्ते स्म। माणवानां वर्णः माणव्यः कथ्यते स्म[८]।

यदा वेदाध्ययनकालः समायाति तदाचार्यः उपयनसंस्कारं कारयति। तदर्थं माणवकमुपनयते इति। वाक्यमिदं प्रचलितमासीत्[९]। एतद् विशिष्टं कर्म आचार्यकरण-

मित्युच्यते स्म। अस्य संस्कारस्यानन्तरं माणवकः वास्तविकरूपेण आचार्य-सान्निध्यं प्राप्नोति स्म। उच्यते काशिकायामपि-''आचार्यकरणमाचार्यक्रिया इति। माणवकमीदृशेन विधिनाऽऽत्मसमीपं प्रापयति यथा स उपनेता स्वमाचार्यः संपद्यते। माणवकमुपनयते। आत्मानमाचार्याऽकुर्वन्माणवकमात्मसमीपं प्रापयतीत्यर्थः।

**छात्रकर्तव्यम्** - उपनयानन्तरं छात्रगुर्वोर्मध्ये यः नूतनः विद्यासम्बन्धः जायते, तेन तौ परस्परमुपस्थानीयौ जायेते। अर्थात् शिष्यः उपगुरुं गत्वा सेवामाचरेत् अध्ययनञ्च कुर्यात् (उपस्थानीयः शिष्येण गुरुः) तथा च गुरुः अन्तेवासिनं स्वसमीपं संस्थाप्य शिक्षयेत् (उपस्थानीयोऽन्तेवासी गुरोः)। उभयोः कृते एषः सुष्ठु सम्बन्धः भवति। अध्यापनदशायामाचार्यः अनूचानः[१०] एवं प्रवनीयः[११] कथ्यते स्म। (प्रवचनीयो गुरुः स्वाध्यायस्य) इति। छन्दाध्यायी शिष्यस्य संज्ञा शुश्रूष्वभवत्, यतोहि सः श्रुति परायणमुत ''श्रवणीयं कर्णाभ्यां श्रुत्वा धारयति स्म[१२]। स्वपितुः सकाशादध्ययनं कुर्वाणाः ब्रह्मचारिणः ''पितुरन्तेवासी कथ्यन्ते स्म[१३]। आचार्यकुले आधीयानः आचार्यपुत्रः अपि विशिष्टस्थानं भजते स्म, अतः तदर्थम् ''आचार्यपुत्रः'' इति शब्दस्य उत्पत्तिः जाता[१४]। कात्यायनः लिलेख- गुरुवद् गुरुपुत्र इति[१५]। गुरुपुत्रेऽपि गुरुरिव वृत्तिः उचिताऽऽसीत्[१६]।

**छात्रनामकरणम्** - छात्राणां नामकरणे आधारत्रयं विद्यते -

१. अध्ययनविषयानुसारम्।

२. तत्कालचरणशिक्षानुसारम्।

३. यस्य गुरोः सान्निध्ये पठन्ति स्म, तथा यस्य ग्रन्थान् पठन्ति स्म तदनुसारम्।

विषयानुसारं छात्रनामकरणस्य विधानं सूत्रेषु विद्यते[१७]। क्रतुसोमयज्ञाध्ययनं-कुर्वाणाः छात्राः तत्तद्यज्ञनाम्ना -अग्निष्टोमिकः वाजपेयिकाः राजसूयिकाः कथ्यन्ते स्म[१८]। तथैव वेदस्य क्रमपाठं पदपाठञ्चाधीयानाः छात्राः क्रमकाः पदकाश्चोच्यन्ते स्म। विशेषग्रन्थानां पाठकाः ''अनुब्राह्मणी'' कथयामासुः[१९]। ग्रन्थेऽस्मिन् उक्थादिगणः महत्त्वपूर्णं वर्तते। यस्मिन् हि नूतन-नूतनाध्ययन- विषयाणामुल्लेखो विद्यते।

**अध्यापनस्य नियमः** -शिक्षासंस्थायामध्ययनस्य दिनान्यनध्यायाः कथ्यन्ते स्म[२०]। एतद्व्युत्पत्त्याधारेणैव अनध्यायः तादृशः दिवसः यस्मिन् अध्ययनं न स्यात्। गृह्यसूत्रेषु अनध्यायस्यावकाशस्य च नियमाः प्रदत्ताः सन्ति। महर्षिपाणिनिः अपि अस्योल्ले खं चकार यत् अध्ययने देशकालसम्बन्धिनः केचन नियमास्सन्ति। तान् उल्लङ्घ्य यः अधीते स्म तस्य नाम तथैव उच्यते स्म[२१]। अतः काशिकायां तादृशानां छात्राणामुल्लेखः प्राप्यते, ये श्मशाने चतुष्पदे च अध्ययन-कारणात् ते श्माशानिकाः चातुष्पथिकाश्च कथ्यन्ते स्म।

**स्त्रीशिक्षा तथाधिकारश्च** - महर्षिपाणिनिः पतञ्जलिश्च उभावपि वैदिक-

चरणेध्ययनकर्तृणां स्त्रीणामुल्लेखं चक्रतुः। ''जातेस्त्रीविषयादयोपधात्[२२] ''सूत्रेस्मिन् जातिपरिभाषान्तर्गतं गोत्रचरणयोः उभयोरपि ग्रहणं वर्तते। (गोत्रं च चरणानि च, भाष्यम्)। इत्थं प्रकारेण कठचरणाध्ययनकर्त्री छात्रा कठी तथा ऋग्वेदस्य बह्वचचरणस्य बह्वची उच्यते स्म। छात्राणां नामकरणस्य ये नियमाः आसन् त एव छात्राणां कृतेऽपि आसन्। उदाहरणार्थम्- आपिशलिव्याकरणाध्येत्री ''ब्राह्मणजातेः स्त्री आपिशलोच्यते स्म[२३]। कात्यायनः अत्र कस्यचित् पूर्ववैयाकरणस्य सम्भवतः आपिशलि- सूत्रोल्लेखञ्चकार। इत्थमेव पाणिनिव्यासकरणाध्येत्री पाणिनीया ब्राह्मणी भवति स्म। भाष्याध्ययनाज्ज्ञायते यत् मीमांसा समं क्लिष्टविषयाध्ययनमपि स्त्रीणां कृते विहितमासीत् यथा-काशकृत्स्नाचार्यस्य मीमांसाशास्त्राध्येत्री छात्रा काशकृत्स्नोच्यते स्म। (एवमपि काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी, काश कृत्स्नीमधीते काशकृत्स्ना ब्राह्मणी[२४]। पतञ्जलिः नियमिताध्येत्रीन् छात्राः अध्येत्री' इत्यकथयत्। भाष्ये स्त्री-छात्राणां नामकरणस्य यत् प्रकरणं विद्यते, तस्य पृष्ठभूमि एतादृशी वर्तते यत् स्त्रीणामुच्चशिक्षा समाजस्य एका सामान्यप्रथास्यात्। पाणिनिः एतासां अध्येत्री स्त्रीणां कृते निर्मितछात्रशालानामुल्ले खं चकार[२५]। आचार्यस्य स्त्री त्वाचार्यानी कथ्यते स्म परं या स्वयं आचार्यवत् विद्याक्षेत्रे वर्धमानाध्यापने स्वकार्यं करोति स्म तथा छात्राणामुपनयनस्य अधिकारिण्यप्यासीत् साऽऽचार्या कथ्यते स्म। पतञ्जलिस्त्वेकस्मिन् सूत्रे एतावत् संकेतं करोति यत् एताभ्यः आचार्याभ्यः पुरुषछात्राः अपि अधीयते स्म, यथा-औदमेध्याचार्याभ्यः पाठकाः छात्राः निजाचार्याणां नाम्ना औदमेघाः कथ्यन्ते स्म[२६]। इत्थमपि ज्ञायते यत् यथा शाकलादिचरणानां विद्यार्थिनः संघादर्शानुसारं निजसंगठनं निर्मान्ति स्म, ये च शाकलसंघादिनाम्ना प्रसिद्धाः आसन् इत्थमेव औदमेध्याछात्रसंघानाम् औदमेधाः इति बहुवचनान्तनाम भवति स्म। कठी वृन्दारिकावच्छब्दः कठशाखायाः तादृश्याश्छात्रायाः कृते भाषायां प्रयुज्यते स्म या निजचरणे विशिष्टां कीर्तिमग्रपदञ्च प्राप्नोति स्म। षष्टिपथस्य तथा शतपथस्याध्येत्री स्त्री षष्टिपथिकी तथा शतपथिकी कथ्यते स्म[२७]। माणकवतनुपनीता कुमारी छात्रा माणविका कथ्यते स्म। पतञ्जलिः अष्टाध्यायी विषये एका महत्त्वपूर्णा सूचनामकथयत् यत् तस्य सम्बन्धः केनचिदेकचरणेनासीदपितु सकलचरणपरिषदः तं स्वीकुर्वत्यः आसन्। तद्यथा- सर्ववेदपारिषदं हीदं शास्त्रम्[२८]।

नूतनशास्त्ररचना न समेषां सामर्थ्यमासीत्। पाठ्यक्रमस्य अध्ययने छात्रस्य या प्रगतिः भवति स्म। तामभिव्यञ्जनाय भाषायां केचन प्रयोगाः शब्दाश्च प्रचलिताः अभवन्।

ग्रन्थान्ताधिके च[२९]।

अनेन प्रकारेणास्मिन् शोधपत्रे अष्टाध्याय्यां महाभाष्ये च शिक्षाव्यवस्थायाः परिशीलनं प्रस्तुतमिति।

**सन्दर्भाः**

१. अष्टाध्याय्याम्, पाणिनिः, ५.१.५४
२. तत्रौव, ४.३.७७
३. छत्रादिभ्यो णः, तत्रौव, ४.४.६२
४. दण्डमाणवान्तेवासिषु, अष्टाध्याय्याम्, पाणिनिः, ४.३.१३०
५. तत्रौव, ६.२.६९
६. अतृचो माणवे ब्रह्मश्चरणाख्यायामिति, तत्रौव, २.४.२५४
७. तत्रौव, ४.३७९
८. तत्रौव, ४.२.४२
९. तत्रौव, १.३.३६
१०. तत्रौव, ३.२.१०९
११. तत्रौव, ३.४.६८
१२. तत्रौव, २.३.५७, ३.२.१०८
१३. तत्रौव, ६.३.२३
१४. तत्रौव, ६.२.२३३
१५. तत्रौव, १.२.५६वां १
१६. उद्योगपर्वणि ४४.१२
१७. अष्टाध्याय्याम्, ४.२.६०–६२
१८. क्रतुकथादिसूत्रान्ताट्ठक्, तत्रौव, ४.२.६०
१९. क्रमादिभ्यो वुन्, तत्रौव, ४.२.६०–६१
२०. अधीयते अस्मिन्नित्यध्यायः, अष्टाध्याय्याम्, ३.३.१२२
२१. अध्यायिन्य देशकालात्, तत्रौव, ४.४.६१
२२. महाभाष्ये, ४.१.६३
२३. पूर्वसूत्रनिर्देशो–वाऽपिशलमधीत इति, ४.२.२४ वा० ३
२४. महाभाष्ये, ४.२.२४
२५. अष्टाध्याय्याम्, ६.२.८६
२६. महाभाष्ये, औदमेध्यायाश्छात्रा औदमेघाः ४.१.७८॥ वा. २
२७. शतषष्टेः षिकन्पथः, काशिकायाम्, ४.२.६०
२८. महाभाष्ये, २.२.५८, ६.३.२४
२९. अष्टाध्याय्याम्, ६.३.७९

# व्याकरण-दर्शन में भर्तृहरि का विशिष्ट योगदान

**अनिता मल्ल**

भारतीय इतिहास के पर्यालोचन से यह बात स्पष्ट होती है कि प्राचीन काल में दैवी-वाणी अव्याकृत अर्थात् प्रकृति-प्रत्यय-विभाग से रहित थी। शिक्षार्थियों के समक्ष इसका उपदेश प्रतिपद-पाठ शैली के द्वारा ही किया जाता था।

इस प्रकार प्रतिपद -पाठ के उपदेश के द्वारा शिक्षा देने में अत्यन्त परिश्रम एवं अधिक कालक्षेप होता था। अतः देवताओं ने उस समय के महान् शाब्दिक वृहस्पति के शिष्य इन्द्र से प्रार्थना की आप शब्दोपदेश की ऐसी कोई सरल प्रक्रिया बतावें जिसके द्वारा अल्प परिश्रम एवं अत्यल्प काल में बहुत से शब्दों का बोध सरलतया हो जाये। इस प्रकार संस्कृत -शब्दों में प्रकृति-प्रत्यय विभाग रूपी प्रथम संस्कार सम्पन्न हुआ। इस संस्कार के कारण ही देववाणी का दूसरा नाम संस्कृत हुआ।

जैसा कि माना जाता है भाषा, विचारों की अभिव्यक्ति का माध्यम होती है और भाषा का मूल उसका व्याकरण होता है। संस्कृत के व्याकरण की अपनी अलग विधाएँ तथा चिन्तन के अपने स्वतन्त्र क्षेत्र हैं। भारतीय वाङ्मय के अवलोकन एवं मनन से यह बात विदित होती है कि सृष्टि कर्ता ब्रह्मा से लेकर देवराज इन्द्रादि देवताओं एवं ज्ञान के महान् अन्वेषक महर्षियों के समय तक व्याकरण- शास्त्र की अनेक विधियां प्रकाश में आ चुकी थीं। व्याकरण ग्रन्थों का दार्शनिक विवेचन कात्यायन एवं महर्षि पतञ्जलि की कृतियों से दृष्टिगोचर होने लगता है, लेकिन इसका स्पष्ट और प्रामाणिक रूप भर्तृहरि के वाक्यपदीयम् में मिलता है। भर्तृहरि को व्याकरण दर्शन अर्थात् शुद्धाद्वैत का प्रमुख प्रतिपादक माना गया है, इनके व्यक्तित्व और विचार के विषय में ध्यान देते हुए इन्हें कुछ लोग बौद्ध कहते हैं, कुछ परम आर्ष तथा वैदिक कहते हैं।

इनके व्यक्तित्व एवं कृतित्व की दृष्टि से विचार करने पर यह ज्ञात होता है कि ये सर्वाधिक विवादास्पद वैयाकरण रहे। इतने महान् वैयाकरण भर्तृहरि के विषय में वास्तविक परिचय नहीं हो पाया। दुनिया इन्हें नीतिशतक आदि ग्रन्थ के माध्यम से ही जानती है अथवा सिद्ध कथाओं के माध्यम से या चीनी यात्री इत्सिंग की एतिहासिक आख्याओं के आधार पर जानती है। पाणिनि, व्याडि, कात्यायन तथा

पतञ्जलि की समकक्षता वाले तथा उन्हीं के समान उज्ज्वल व्यक्तित्व वाले इस महान् ज्ञानी ने एक स्थान पर भी अपने उक्त पूर्वजों की परम्परा में खुलकर अपना परिचय नहीं दिया।

भर्तृहरि ने अपनी प्रतिभा से सभी को प्रभावित किया था। वाक्यपदीयम् जैसे अद्वितीय ग्रन्थ की रचना कर इन्होंने सम्पूर्ण विश्व को चकित कर दिया। भर्तृहरि का सबसे प्रसिद्ध ग्रन्थ वाक्यपदीयम् है। वाक्यपदीयम् का अर्थ है- वाक्य- पद- प्रतिपादक ग्रन्थ। इसमें कुल तीन काण्ड हैं जिनमें एक हजार नौ सौ छाछठ कारिकायें है। इनकी अन्य प्रमुख कृतियों में-

१. नीतिशतकम् २. शृङ्गारशतकम् ३. वैराग्यशतकम्

४. महाभाष्य

**नीतिशतकम्**- इसमें भर्तृहरि द्वारा नीतिशतक सूक्तियों का अत्यन्त प्रचलित एवं लोकप्रिय संकलन है, इसके साथ-साथ दैनिक जीवन के गूढ एवं प्रत्यक्ष सत्यों को भर्तृहरि ने बड़े हृदयग्राही ढंग से प्रस्तुत किया है–

**यां चिन्तयामि सततं मयि सा विरक्ता**
**साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।**

**शृङ्गारशतकम्**- इसमें भर्तृहरि ने पहले शृङ्गार रस के आकर्षण का चित्रण किया है, किन्तु धीरे-धीरे उसकी अस्थिरता दिखलाकर शान्त रस की तुलना में उसकी तुच्छता प्रकट की है–

**सुरतजनितस्वेद-सार्द्रगण्डथलीनाम्।**
**अधरमधु बधूनां भाग्यवन्तः पिवन्ति।**

भर्तृहरि की सबसे प्रसिद्ध रचना वाक्यपदीयम् है। वाक्यपदीयम् में भर्तृहरि ने व्याकरण के दार्शनिक पक्ष को प्रस्तुत किया है। अब प्रश्न यह उठता है कि संस्कृत-व्याकरण में दार्शनिक विवेचन का प्रारम्भ कब से हुआ है। यह निश्चित रूप से नहीं कहा जा सकता कि व्याकरण-शास्त्र से सम्बद्ध दार्शनिक ग्रन्थों के प्रणयन का आरम्भ का हुआ। पाणिनि के 'अवङ्स्फोटायनस्य' से यह ध्वनित होता है कि व्याकरण का दार्शनिक चिन्तन पाणिनि के पूर्व ही आरम्भ हो चुका था।

महर्षि पाणिनि ने अष्टाध्यायी के सूत्रो में जिन वैयाकरणों की चर्चा की है, उनमें- आपिशलि, काश्यप, गालव, भारद्वाज, शाकटायन, स्फोटायन हैं। इसके अतिरिक्त भारद्वाज, भागुरि, शौनक, गौतम आदि भी हैं।

इन्द्र से व्याडि तक महाभाष्य, काशिका एवं कविकल्पद्रुम आदि व्याकरण ग्रन्थों में व्याकरण के इन आदि आचार्यों का संक्षेपतया साङ्गोपाङ्ग उल्लेख किया गया

है। इन सब की जीवनी कालक्रम, सिद्धान्त एवं कुछ उपलब्धियों के आधार पर विद्वानों ने यह निश्चय किया है। कि इन सबका उल्लेख महर्षि पाणिनि ने यद्यपि नहीं किया है, फिर भी ये अवश्य ही पाणिनि के पूर्ववती व्याकरण- शास्त्र के आचार्य थे संस्कृत- व्याकरण के निर्माताओं में आचार्य पाणिनि सबसे प्रामाणिक महावैयाकरण माने जाते हैं, जिनकी अपूर्व कृति अष्टाध्यायी, संस्कृत- व्याकरण ग्रन्थों में सर्वप्रामाणिक मानी जाती है। इनके अमूल्य सूत्रों पर आचार्य कात्यायन ने अपना वार्तिक प्रस्तुत किया है। कात्यायन के वार्तिक पर महर्षि पतञ्जलि ने भाष्य लिखकर सोने में सौगन्ध्य का आधान किया है।

कात्यायन एवं पतञ्जलि दोनों ने प्रसंगतः दार्शनिक तत्त्वों का विवेचन किया है, किन्तु भर्तृहरि ने दार्शनिक विवेचन को क्रमबद्ध एवं सुव्यवस्थित किया है।

आचार्य भर्तृहरि निःसन्देह मीमांसा- दर्शन के भी महान् पण्डित थे। उनकी मीमांसा -दर्शन -सम्बन्धी कृति मीमांसावृत्ति भले ही आज उपलब्ध न हो, किन्तु उसमें व्यक्त मतों का अनुमान सरलता से लगाया जा सकता है। वाक्यपदीयम् के द्वितीय काण्ड में मूलतः मीमांसा और व्याकरण की इन धारणाओं के बीच तालमेल का यत्न और यथार्थ व्याख्या की दिशा में प्रयास ही नहीं, महत्त्वपूर्ण कार्य भी किया है।

भर्तृहरि का अनुपम ग्रन्थ वाक्यपदीयम् तीन काण्डों में विभक्त मिलता है- ब्रह्मकाण्ड, वाक्यकाण्ड एवं पदकाण्ड। ब्रह्मकाण्ड अथवा आगम काण्ड को कुछ लोग इनकी स्वतन्त्र कृति मानते हैं। इस बात के लिये इनके द्वितीय काण्ड में लिखे गये श्लोक को प्रमाण में के रूप उद्घृत करते हैं।

ब्रह्मकाण्ड में शब्दब्रह्म का स्वरूप, शब्दब्रह्म से जगत् की उत्पत्ति तथा ब्रह्म को अनादिनिधनम् कहा गया है। इसमें ब्रह्म की प्राप्ति को व्याकरण के अध्ययन का परम प्रयोजन मानते हुये बहुत ही क्रमबद्ध ढंग से चार कारिकाओं में चर्चा की गई है। इसी क्रम में भर्तृहरि व्याकरण की महत्ता को बताते हुये कहते हैं कि-

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**
**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥**

वाक्यपदीयम् का द्वितीय काण्ड पूरे वाक्यपदीयम् का आधार है। इस काण्ड में वाक्य की अखण्डता के उस सिद्धान्त को प्रतिपादित किया गया है, जिसे आज की सबसे बड़ी भाषातात्त्विक उपलब्धि कहा जाता है। इसके अन्तिम दस श्लोकों में महाभाष्य की ऐतिहासिक चर्चा से इस में निहित विचारों को समझने और उनके पाठ करने में पर्याप्त सहायता मिलती है।

वाक्यपदीयम् तृतीय काण्ड को पदकाण्ड या प्रकीर्ण काण्ड के नाम से जाना जाता है। इस काण्ड के समस्त वर्ण्य-विषय व्याकरण या पद से सम्बन्ध रखते हैं। पद के सम्बन्ध वाले प्रायः सभी विषय जो तथाकथित व्याकरण के विषय है, इस काण्ड में वर्णित है। इन सबके दार्शनिक और व्याकरणात्मक पहलुओं पर बहुत कुछ और बहुत ही मौलिक ढंग से कहा गया है। ये चौदह तत्त्व हैं- जाति, व्यक्ति, सम्बन्ध, द्रव्य (पदार्थ), गुण, दिक्, साधन, क्रिया, काल, सङ्ख्या, उपग्रह, लिङ्ग, पुरुष और वृत्ति।

जाति समुद्देश में भर्तृहरि जाति के बारे में बताते हुए कहते है। जाति का सम्बन्ध केवल नाम मात्र से ही वे स्वीकार नहीं करते, उनकी दृष्टि में क्रिया ही जाति रूपा है।

पद के विषय में भी वे प्रकृति-प्रत्यय की कल्पना को अपोद्धार और लोक-व्यवहार का ही विषय मानते हैं। वाक्यपदीयम् के तृतीय काण्ड के जाति समुद्देश्य में इसकी चर्चा हुई है।

एव शिष्ट प्रयोगमभिसमीक्ष्य प्रकृतिरूहितधा प्रत्ययश्च।

जाति-व्यक्ति द्रव्य और पदार्थ, शब्दार्थ सम्बन्ध, गुण संख्या और वचन दिक्, साधन या कारक उपग्रह, पुरुष, क्रिया, काल लिङ्ग और वृत्ति में सभी विषय इसमें विवेचित हुये हैं, इन सबके दार्शनिक और व्याकरणात्मक पहलुओं पर बहुत ही मौलिक ढंग से कहा गया है। इस तरह सामान्य और व्यापक धारणाओं का प्रतिपादन भर्तृहरि ने इस काण्ड के प्रथम तीन प्रकरणों में किया है:- जाति, द्रव्य एवं सम्बन्ध।

साधन का लक्षण प्रस्तुत करते समय वैशेषिकों, मीमांसको, अद्वैतवादियों और साङ्ख्यों के मतों की भी संक्षेप में व्याख्या की गयी है।

साधन स्वरूप की व्याख्या करते समय हेतु, कारक, लक्षण, करण, में अन्तर स्पष्ट किया गया है।

इस तरह प्रत्येक काण्ड में वाक् की अवस्था पर बल देने का भर्तृहरि का आशय भले ही रहा है, परन्तु वह अपनी कृति में आद्योपान्त उस परम शब्द-तत्त्व ब्रह्म के बारे में सदा जागरूक है जिससे अखिल ब्रह्माण्ड तथा तद्विप्यक अनन्त प्रकार के ज्ञान, विषय और उसमें व्यञ्जक शब्दों से पूर्ण रूप से अनुभव व्यक्त कर पाते हैं और इसे एक प्रकार की एकता प्रदान करते हैं। चाहे जाति या द्रव्य, साधन या क्रिया, दिक् या काल के बारे में बताया जा रहा हो, वह किसी भी प्रकार इन सबको आन्तर शब्दतत्त्व से जोड़ ही देते हैं, तृतीय काण्ड के इन समुद्देश्यों के रूप में हमें व्याकरण का एक ऐसा आधार दिखायी पड़ता है जिससे संसार के किसी भी भाषा का विवेचन किया जा सकता है।

इसका आधार एक भाषावर्ग से न होकर कई भाषा- वर्गों से है।

हम कह सकते हैं कि भर्तृहरि का "वाक्यपदीयम्" व्याकरण-दर्शन का एक महत्त्वपूर्ण और उपयोगी ग्रन्थ है। जैसा कि संस्कृत-साहित्य में अन्यत्र देखने को नहीं मिलता।

प्रथम काण्ड में शब्दब्रह्म की चर्चा हो या द्वितीय काण्ड के वाक्य की अखण्डता की चर्चा, अथवा तृतीय काण्ड के चौदह समुद्देश जिसमें क्रमशः भर्तृहरि के द्वारा एक-एक व्याकरण के विषय को लेकर सभी भारतीय दार्शनिक ग्रन्थों का उदाहरण देते हुए हमें उनके विचारों से अवगत कराया गया है। इस प्रकार भर्तृहरि का वाक्यपदीयम् व्याकरण और दर्शन का अद्भुत समन्वय है तथा इसमें वर्णित उनके विचार अत्यन्त उत्प्रेरक हैं और आधुनिक युग के विचारशील वैयाकरणों के लिए दिशा-निर्देश करते हैं।

## सन्दर्भ

१. संस्कृतं नाम दैवी वाग् अन्वाख्याता महर्षिभिः दण्डी, काव्यादर्श १३.३

२. वृहस्पतिरिन्द्राय दिव्यं वर्षतहसं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाचाथ च नान्तंजगाम महाभाष्य, १.१.१

३. वाग्वे पराध्य-तामिन्द्री मध्यतोऽडवक्रम्य व्याकरोत्थ-तै.सं.

४. नीतिशतकम्-भर्तृहरि

५. शृंगारशतकम्-भर्तृहरि

६. पा.सू., ३, १, १२३

७. पा.सू., ६, १, ९२, अष्टाध्यायी

८. तदेव, १२, २, २५

९. प्रतिशाख्य, २.२३, २८, ६.४३, १३, ३१, ३७

१०. न्यायप्रस्थामार्गास्तानभ्यस्त स्वं च दर्शनम्। प्रणीतो गुरूणाऽस्याकयभागमसंग्रहः।। (वा., २. ४.८४)

११. अना दिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्तते अर्थभावेन प्रक्रियाजगतो यतः।। वा.प. ब्रह्मकाण्ड प्रथमकारिका

१२. वाक्यपदीयम्, ब्रह्मकाण्ड, कारिका सं.- ११

१३. वा. प. तृतीय काण्ड, जाति समु. कारिका-३३

१४. अपोद्धत्यैव वाक्योभयः प्रकृतिप्रत्यययादिवत्।-जाति समु. कारिका-१ त्रिपादी १.१.१

# व्याकरणशास्त्रे परिष्काराणामुद्भवो विकासश्च

**अमित शर्मा**
शोधच्छात्रः (व्याकरणविभागः)
राष्ट्रियसंस्कृतसस्थानम् (भोपालपरिसरः) भोपाल

नमः पाणिनिकात्यायनपतञ्जलिभ्यः शब्दविद्यासंप्रदायकर्तृभ्यः परमऋषिभ्यो गुरुभ्यः।

शिक्षाव्याकरणच्छन्दोनिरुक्तज्योतिषकल्पाख्येषु षट्सु वेदाङ्गेषु शब्दनां साधुत्वविवेचकं शास्त्रं प्रधानतममिति विचिन्त्य 'मुखं व्याकरणं स्मृतम्' इति विदुषां प्रवादः। तद् व्याकरणम् अंशत्रयात्मकं राराष्टि भूतले। तद्यथा-

प्रथमांशः - प्रक्रिया।

द्वितीयांशः - परिष्कारः।

तृतीयांशः - दर्शनम्।

अत्र द्वितीयांशः अर्थात् परिष्कारपद्धतेः विकासः उद्भवश्च इति विषयम् अवलम्ब्य पत्रमिदं प्रस्तूयते। भट्टोजिदीक्षितस्य प्रगीतग्रन्थानां पश्चाद् व्याकरणशास्त्रे नव्यन्यायशास्त्रानुगतशैल्याः वैचारिकपरिवर्तनम् अभवत्। चर्तुदशशताब्द्याः पश्चाद् नव्यन्यायप्रणीतलेखनशैल्याः परिणामः तावत् यद् न्यायशास्त्रमतिरिच्य साहित्यशास्त्रस्य 'रसगङ्गाधरग्रन्थः'' वेदान्तशास्त्रस्य ग्रन्थः 'अद्वैतसिद्धिः' व्याकरणशास्त्रस्य ग्रन्थः 'लघुशब्देन्दु-शेखरः मञ्जूषा च' उदाहरणस्वरूपं परिलक्ष्यते।

**व्याकरणे परिष्कारपद्धतेरुद्भवः** - अस्याः पद्धतेः प्रतिष्ठापकः सर्वतन्त्रस्वतन्त्रः शब्दशास्त्रपारङ्गतः हरिदीक्षितशिष्यः सतीशिवभट्टयोः सुतः नागेशभट्टः आसीत्। ते पद्धतिमिमामवलम्ब्य बहून् ग्रन्थान् व्यरचयन्। नागेशानन्तरं काश्यां नव्यव्याकरणस्य परम्पराया वर्धनाय पण्डितगङ्गारामशास्त्री श्रमं कृतवान्। इमे मूलतः पर्वतीयब्राह्मणाः आसन्। एतेषां जनपदः "अल्मोडा'' आसीत्। अमी नव्यन्यायेन सह पाणिनिव्याकरणस्यापि विशिष्टविद्वांसः आसन्।

लघुशब्देन्दुशेखरः परिभाषेन्दुशेखरश्चेत्यनयोर्ग्रन्थयोः अध्ययनाध्यापनेन ते नव्यव्याकरणे परिष्कारशैलीमारभन्त। गुरुपरम्परानुसारेण शिष्यप्रशिष्याश्च एतेषां परिष्काराणां कोटिप्रकोटिषु नवीनतामानेतुं प्रयत्नं कृतवन्तः। यत्र पूर्वं न्यासपरम्परामनुसृत्य शास्त्रार्थस्य परम्पराऽऽसीत्।

तत्रौव अर्थोन्मेषेण परिष्कारस्य कोटिप्रकोटिषूपरि शास्त्रार्थं समारभत्। शैल्यामस्यां परिष्काराणां महत्त्वमासीत् तथा च तार्किकरीत्या नागेशमतस्य समीक्षाकरणाय विद्वांसः अवसरमलभन्त। परिष्कारविकासे पण्डितगङ्गारामशास्त्रिणा प्रचलितपरिष्कारपरम्पराद्यावधौ काश्यामविच्छिन्न-रूपेण प्रचलमाना वर्त्तते। एतेषां त्रयः शिष्याः प्रमुखाः आसन्–

१. पण्डितरुद्रानाथः

२. पं. जगन्नाथशास्त्री

३. पं. रघुनाथशास्त्री

एतेषां शिष्यद्वयं राजमान्यासीत्। तयोः विवरणमधः प्रस्तूयते–

**काशीनाथशास्त्री** –सम्प्रदायेस्मिन् विश्वविश्रुतो विद्वान् काशीनाथशास्त्री अष्टपुत्रेषु लब्धप्रतिष्ठः आसीत्। अमी गङ्गारामशास्त्रीवर्याणां शिष्यत्वं स्वीकृत्य परिष्कारपद्धत्या शेखरद्वयम् अध्यजीगपत्। अमीषां लोकोत्तरप्रतिभां विलोक्य काश्यामुक्तिरियम् प्रसिद्धा- 'काश्यामेकः काशीनाथः' इति। काशीनाथः स्वाधीतं व्याकरणं परिष्कारपद्धतिं दृढीकृतवन्तः। एतेषां महती विशाला शिष्यपरम्परासीत् तेषु मुख्याःख्र

- पण्डितराजारामशास्त्री
- पं. बालशास्त्री (रानाडे)
- पं. योगेश्वर ओझा

पं. राजारामशास्त्रिणः काशीराजकीयपाठशालायामध्यापनं चक्रुः। तत्रा बालसरस्वती-त्युपाधिभूषिता बालशास्त्रिणः काशीनाथशास्त्रिणः समीपे व्यकरणमधीत्य गुरुपादाज्ञानुसारं राजारामशास्त्रीणां समीपे समग्रं व्याकरणं धर्मशास्त्रञ्चाधीतवन्तः। अस्य प्रमाणस्य श्लोकोऽयम्

**नव्यन्यायपरिष्कृतिरीत्या शब्दानुशासनेऽनुपमः।**
**श्रीबालशास्त्रिपूज्यः श्रीराजारामशास्त्रिवरः॥**

पं. राजारामशास्त्रीप्रणीतग्रन्थः एक एवोपलभ्यते। तस्य नाम 'विधवोद्वाहशङ्का - समाधिः' अस्य रचना कालः १९१२ विक्रमसंवत् आसीत्।

बालशास्त्री - एतेषां शब्दशास्त्रधुरधुरीणां श्रीबालशास्त्रिपादानां जन्म १८३९ ईस्वीये काश्यामेव अभवत्। एतेषां जन्मऋक्षीय नाम 'विश्वनाथः' आसीत्। परञ्च एते 'बाल' इति उपनाम्ना ख्यातिलब्धः। एकदा ग्वालियरसम्राजः सदसि षड्दर्शनवेदवेदाङ्गादि-विविद्याशास्त्रनिष्णातविदुषां समक्षं ऋग्वेदस्य बाल्यखिल्यसूक्तस्य पाठं श्रावितवान्। एतेषां वाग्वैभवेन लोकोत्तरप्रतिभया समेऽपि विद्वांसः चकितचकितास्सञ्जाताः। तस्मिन् सदसि विद्वत्कुलेन "बालसरस्वती" इति महनीयोपधिना समलङ्कृतः। इमे केवलं न्यायव्याकरणयोः पण्डिताः नासन् अपि च धर्मशास्त्रयागादिक्षेत्रेष्वपि कृतपरिश्रमा आसन्। एभिः स्वकीये जीवने ज्योतिष्टोमयज्ञस्यापि सम्पादनं कृतम्।

एतेषां ग्रन्थाः कृतयश्च अधिकाः न भवन्ति। परञ्च परिभाषेदुशेखरस्य सारासारविवेकव्याख्यानम्, श्रौतविषयस्य बृहद्ज्योतिष्टोमपद्धतिः, महाभारतस्योपरि टिप्पणीप्रकाशः निर्माञ्चक्रुः। बालशास्त्रीपादानां महती शिस्यपरम्परा आसीत्–

१. शिवकुमारशास्त्री (१८५७ ई. - १९१८ई.)

२. गङ्गाधर शास्त्री (तैलङ्गः) (१८५३ -१९१३)

३. मण्म दामोदरशास्त्री (१८४८ - १९०७)

४. पं. स्नेहिरामशास्त्री (१८४५ - १९१९)

५. पं. दण्डिभट्टः (१८४८ - १९२३)

शिवकुमार शास्त्री –एते निखिलशास्त्रनिष्णाताः विद्यारसाः महामहोपाध्यायाः इति नैकपुरस्कारेण विभूषिताः पं. प्रवराः शिवकुमारशास्त्रीवर्याः। एतेऽपि व्याकरणशास्त्रे महत्ख्यातिं प्राप्नुवन्तः। एतेषामपि शिष्यपरम्परा विशालाऽऽसीत् तद्यथाख्र

१. महामहोपाध्यायः डॉ. गङ्गानाथ झा

२. विद्यावाचस्पति मधुसूदन ओझा

३. वैयाकरणकेसरी जयदेवमिश्रः।

उपर्युक्तसमस्तविदुषां समये व्याकरणनिकाये परिष्काराः चरमावस्थापन्नास्सन्तः अध्यापने शास्त्रार्थे च समायाताः।

– श्री तात्याशास्त्री (रामकृष्णशास्त्री) बालशास्त्रिणः अन्तेवासी विश्वविश्रुतप्रतिष्ठवैयाकरणाः आसन्। एतेषां एकैव रचना वैयाकरणकुलस्योपकारकभूता सञ्जाता। सा च रचना 'भूति'– नाम्ना ख्यापिता जगतीतले। नागेशभट्टप्रणीतपरिभाषेन्दु-शेखरस्य मूलपक्ती एवञ्च पूर्वोत्तरपक्षप्रतिपादनटीकेयं नितरामानन्दं जनयति विद्वत्कुले। 'भूति'– टीकायाः संस्तुत्यां पद्यमिदमुचितम्

**शम्भोर्नागेशनाम्नो गहनतरगिरां मर्म सम्यक् प्रकाश्य।**
**प्रौढ्या सत्सम्प्रदायागतमखिलमलं ख्यापयत्यर्थजातम्॥**
**विद्यार्थिव्रातमाता कठिनतमपरीक्षाऽब्धिपोतायमाना।**
**तात्याशास्त्रीन्द्रकीर्तिर्जगति विजयतां भासते यदर्कः॥**

एतेषामपि विशालशिष्यपरम्पराऽऽसीत् तेषु प्रमुखतमाः पं. रामयशस्त्रिपाठिवर्याः आसन्। ते 'महाशय' इत्यपरनाम्नापि काश्यां प्रथिताः आसन्। एतस्मिन् क्रमे वैयाकरणकुलदीपकभूतवंशावतारशास्त्रनिष्णातः म.म. 'नित्यानन्दपर्वतीयः' समागच्छन्ति। इमेऽपि परिष्कारपद्धतिं वर्धयितुं प्रचारयितुं लघुशब्देदुशेखरस्य 'दीपक' नामिकां टीकां वितेनिरे। इयं टीका तदानीन्तनसमयतः अद्यावधिपर्यन्तं पठनपाठने स्वकीयं वैशिष्ट्यम् आवहति।

बालशास्त्रीपरम्परायामेव परिष्कारसरणिमवलम्ब्य भट्टोजिदीक्षितप्रणीतव्याकरणशास्त्र-प्रकियास्वरूपप्रमुखग्रन्थस्य 'सिद्धान्तकौमुदी' इत्यस्योपरि सर्वातिशायिनिटीकां विस्तार्य वैयाकरणनिकाये महतीं प्रतिष्ठां प्राप्य पं. सभापतिशर्मोपाध्यायाः लक्ष्मीनामिकां टीकां वितेनिरे। टीकेयं सम्प्रति अनुपलब्धाऽस्ति परञ्च प्रौढप्राचीनवैयाकरणानां सन्निकटे उपलभ्यते। एतेषां शास्त्रिवर्याणां लेखनकार्येण वैयाकरणकुलमत्यन्तं मुग्धमस्ति। एतेषां प्रमुख परिष्कारबहुलग्रन्थानां वर्णनमधोलिख्यते

१. नागेशभट्टप्रणीतलघुमञ्जुषायाः रत्नप्रभाटीका

२. सशब्दरत्नप्रौढमनोरमायाः - प्रभाटीका

३. सिद्धान्तकौमुद्याः - लक्ष्मीटीका

परिष्कार-रक्षणाय प्रचाराय प्रसाराय च स्वनामधन्यः शास्त्रार्थमहारथी पं.जयदेवमिश्रः अतीव स्मरणीयः वर्त्तते वैयाकरणनिकाये। एतैः महनीयपरिश्रमेण तथा च शास्त्रार्थपाटवेन शास्त्रार्थबहुलग्रन्थानां प्रणयनमकारि। ते ग्रन्थाः निम्नलिखितास्सन्ति

१. परिभाषेन्दुशेखरस्य - विजया टीका

२. शास्त्रार्थरत्नावली

३. व्युत्पत्तिवादस्य - जया टीका

एतेषां प्रमुखः शिष्य म.म. गङ्गानाथ झा आसीत्। तेन स्वकीयगुरुपादानां सुशंसायाम् अतीव मनोहरं पद्यं रचितम् —

**जयः कुले जयोऽभ्यासे जयः पण्डितमण्डले।**
**जयो मृत्यौ जयो मोक्षे जयदेवे सदा जयः।।**

**पं. गुरुप्रसादशास्त्रिवर्याः -**

स्नेहिरामशास्त्रिपादानां एवञ्च पं. शिवनारायणशास्त्रिचरणानां कुले स्वाध्यायप्रियन्याय-व्याकरणसांख्यवेदात्तादिषु अतीवदुर्लभं सम्पादनकार्यं विधाय "काश्यां त्रैपुरुषी विद्या" प्रसिद्धलोकोक्तिरपि असतीकृता। एतेषां वैदुष्यं लेखनस्य प्रमाणं षट्टीकाविभूषितः लघुशब्देन्दुशेखरः तथा च राजलक्ष्मीसंवलितमहाभाष्यम् अत्यन्तं सराहनीयं विद्यते। शिवकुमारशास्त्रि-दामोदरशास्त्रि-तात्याशास्त्रि-रामयशस्त्रिपाठि-शिवनारायणप्रभृतिविदुषां परिष्काराणां समन्वयं स्वकीयग्रन्थे विशिष्टपरिष्कारस्थले द्रष्टुं शक्यते यथा - रप्रत्याहारः, वर्णात्कारः, स्थानिवद्- इत्यादयः। कतिपये विद्वांसः इतोऽपि सन्ति ये व्याकरणशास्त्रपरिष्कारान् सम्वर्धयन् रक्षितवन्तः। तेषां नामानि कृतयश्च—

| **नाम** | **कृतिः** |
|---|---|
| म.म. खुद्दी झा | घुशब्देन्दुशेखरस्य नागेशोक्तिटीका |

| | |
|---|---|
| पं. दीनबन्धु झा | कौमुदीमूलार्थविद्योतनी |
| पं. रामाज्ञा पाण्डेय: | व्याकरणदर्शनस्य भूमिका |
| पं. शशिनाथ झा | परमलघुमञ्जुषाया: सरला टीका |
| पं. वेणीमाधवशास्त्री परिष्कारदर्पणम्, | व्युत्पत्तिवादस्य टीका |
| पं. सूर्यनारायण शुक्ल: | पङ्क्तिप्रभा, वादरत्नम् |
| पं. बालकृष्ण पञ्चोली | भूषणसारस्य - प्रभाटीका |
| पं. विश्वनाथ शास्त्रीशेखरद्वयस्य - | सुबोधिनीटीका |
| पं. स्नेहिराम शास्त्री शब्देन्दुशेखरस्य | -त्रिपुरसुन्दरीटीका |

इयं महती विशालपरिष्कारमण्डित-जनितपरम्परा अवच्छिन्नरूपेण काश्यां विलसति। तत्पश्चात् पं. पुरुषोत्तमशास्त्रीवर्या:, अपरपाणिनि: श्रीरामप्रसादत्रिपाठीवर्या:, राममनोहरमिश्रा: शतशिष्यपरम्पराप्रवर्तका: पं. रामयत्नशुक्लमहाशया: एतेऽपि अर्वाचीनयुगीय-विद्वांस: स्मरणीया: सन्ति। पं. रामयत्नशुक्लपुरुषोत्तमगुरुचरणयो: शिष्यत्वमङ्गीकृत्य शब्दशास्त्रपारङ्गता: विद्वत्कुलस्यालङ्कारा: वैयाकरणधूर्धुर: गीष्पति: मदीय: परमगुरुचरण: पं. ब्रजभूषण ओझा चेत्येते सर्वे साम्प्रतिके काले परिष्कारपद्धते: सरंक्षणाय प्रसाराय च बद्धादरा: सन्ति।

**सन्दर्भा:**

१. काशी की पाण्डित्यपरम्परा पृ. सं. १६९
२. तत्रैव १७०
३. तत्रैव १७७
४. लघुशाब्देन्दुशेखरस्य षट्टीकोपेतभूमिका
५. काशी की पाण्डित्य परम्परा पृ. सं. २९२

**सन्दर्भग्रन्थसूची**

१. काशी की पाण्डित्य परम्परा - आचार्यवलदेव उपाध्याय
२. लघुशब्देन्दुशेखर षट्टीकोपेत - पं. गुरुप्रसाद शास्त्री
३. लघुशब्देन्दुशेखर: सुबोधिनी टीका - आचार्य विश्वनाथमिश्र
४. संस्कृत वाङ्मय का वृहद् इतिहास - आचार्य वलदेव उपाध्याय
५. परिष्करदर्पणम् - पं. वेणीमाधव शास्त्री
६. सिद्धान्तकौमुदी लक्ष्मी टीका - पं. सभापतिशमीपाध्याय

# व्याकरणशास्त्रे महाभाष्यस्य उपयोगिता

**सुशील प्रसाद बडोनी**

महाभाष्यं पतञ्जलिना रचितः व्याकरण- ग्रन्थः अस्ति। पाणिनि मुनिः व्याकरणस्य अभूतपूर्व ग्रन्थम् अष्टाध्यायी रचितवान्, यश्च ग्रन्थः सूत्ररूपेण अस्ति। तस्याः वाक्य रूपेण व्याख्या कात्यायनेन कृता। पतञ्जलिः द्वयो विस्तृतां व्याख्यां महाभास्ये कृतवान्। संस्कृत-व्याकरणक्षेत्रे पातञ्जलमहाभाष्यस्य मूर्धाभिषिक्तं स्थानं वर्तते। यथोत्तरं मुनीनां प्रामाण्यम् इत्यादिभिः आभाणकैः इदं प्रमाणितं भवति। महान् शब्दयोगी, वाग्योगवित्, सङ्ग्रह प्रतिकञ्चुकः भाष्यकारः पतञ्जलिः वदति-इष्टमेवैतत् सङ्गृहीतं भवति इति। इष्टमित्यक्त्वा तेन ये प्रयोगाः दर्शिताः ते संस्कृत-व्याकरण-जगति ग्राह्याः जाताः। इष्टमिति ये प्रयोगाः न निर्दिष्टा ते लोके प्रचारे विद्यन्ते चेदपि साधुत्वं न भजन्ते।

महाराज्यं वा पालनीयम्, महाभाष्यम् वा पठनीयम् इत्येतत् प्रसिद्ध वचनम् अस्य ग्रन्थस्य श्रेष्ठतां सुष्ठु ज्ञापयति, व्याकरण दर्शने भाष्यकारः सूक्ष्म-गम्भीर-रुक्षाणां विषयाणामपि विवरणं गुडजिह्विकान्यायेन रोचकया, आसेचन कया, सरसतया, मधुरतया च शैल्या कृतवान् अस्ति। लौकिकैः उपमानैः युक्ता संवादशैली, नितरां सुरक्षिता, स्तुत्या च शैली आधृता अस्ति।

वेदान्नो वैदिकाः शब्दा सिद्धा लोकान्नो लौकिकाः, किमर्थमध्येयं व्याकरणम्, इत्येतत् भाष्यकारस्य वचनं सूचयति यत् तस्मिन् अपि काले संस्कृतस्य अध्ययने व्याकरणस्य महत्त्वम् न ज्ञातवन्तः आसन् इति। भर्तुहरिः अपि इदम् ऐतिहासिक-सत्यं सुचयति। व्याकरण-ज्ञानस्य अभावेन् भविष्यति काले संस्कृतस्य शुद्धतायाः रक्षेण कियान् क्लेशः भवेत इत्येतद् भाष्यकारेण आसीत्। अतः शुद्ध भूतेन तेन आगमवचनपरिपालनार्थ 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति घोषितम्। भविष्यपुराणे प्रतिसर्ग-पर्वणि चित्रकूट-निवासिनः पतञ्जले भाष्यविशारदत्वम् उत्कर्षिण प्रतिपादितमस्ति

**चित्रकूटे गिरौ रम्ये,नानाधातुविचित्रिते।**
**तत्रावसन् महाप्राज्ञ, उपाध्यायः पतञ्जलिः।।**

**वेदवेदाङ्ग तत्वज्ञो, गीताशास्त्रपरायणः।**
**विष्णु भक्तः सत्त्यसन्धो भाष्यशास्त्रविशारदः।।**

एवं तावद् विज्ञायते यत् साम्प्रतम् अनधिगम्यमानानां पतञ्जलितः पुर्ववर्तिनामशेषणां व्याकरण-भाष्यवचनानाम् यथास्थानं महाभाष्यकारेण उपयोगो विहितः। कात्यायनतः पूर्व वर्तिनां वार्तिककाराणां वैयाकरणानां नियमाः, बहूनि बचनानि च यथास्थानं तत्रा सन्निवेशितानि सन्ति। सर्वभाष्येषु महिष्ठत्वादेव पातञ्जल-भाष्यस्य महाभाष्यत्त्वाभिधानम् उपपद्यते। महाऽकूपारावगाहनेन् यथाशाक्ति विविधानि रत्नानि यथा विचीयन्ते, तथैव पातञ्जल महाभाष्यस्य पर्यालोडनेन नानातत्त्वानि समासाध्यन्ते विचारकैः विद्वद्वरेष्यैः। ब्रह्मशब्दोपासकेन भर्तृहरिणा वाक्यपदीयं ग्रन्थरत्नं महाभाष्याम्बुधि पूर्वकमेवऽऽविष्कृतम्।

व्याकरणशास्त्रस्य प्रथमः प्रवक्ताः 'ब्रह्मा' समाम्नातः यथोक्त ॥कतन्ते- ब्रह्मा वृहस्पतये प्रोवाच, वृहस्पति रिन्द्राय, इन्द्रोभरद्वाजाय, भरद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः।

अर्थप्रत्यायकत्वस्य समनेऽपि साधुशब्दाः धर्मसाधनत्वेन बोधिताः सन्ति। महाभाष्येऽपि समानायत्त्म् अर्थावगतौ शब्दश्चापशब्दैश्च शास्त्रेण धर्मनियमः क्रियते, शब्देनैवार्थोऽभिधेयो नापशब्देन, एवं क्रियमाणम् अभ्युदयकारि भवति, इति। ''एवम् एकः शब्दः सम्यक् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति। अन्यच्च तेऽसुराः ''हेलयो हेलयः इति कुर्वन्तः परावभूवुः, तस्मात् ब्राह्मणेन नो म्लेच्छित वै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः'' इत्यादिना च असाधूनां शब्दानामधर्मसाधनत्वस्य बोधनाद् आगम-मन्त्रोऽयम् -

**यस्तु प्रयुङ्क्ते कुशलो विशेषे, शब्दान् यथावद् व्यवहारकाले।**
**सोऽनन्तमाप्नोति जयं परत्र, वाग्योगविद् दुष्यति चापशब्दैः।।**

अन्यच्च यथा जाया विवृतसर्वागावयवा भूक्ता कामयमाना इष्टाय पत्ये प्रेम्णा दर्शयेद् आत्मानम्, तथैव साधुशब्दप्रयोक्तृणे वैयाकरणाय इयं वाक् स्वात्मानं विवृणुते।

साधुशब्दस्यैव शक्तितत्त्वं विद्यते। यथोक्तम् भर्तृहरिणा -

**यथैषां तत्रा सामर्थ्य, धर्मेऽप्येवं प्रतीयताम्।**
**साधूनां साधुभिस्तस्माद्, वाच्यमभ्युदयार्थिभिः।।**

भाष्यकारः पतञ्जलिः स्वस्य स्वोपज्ञप्रज्ञया अद्भुतेन चित्रविचित्रेण प्रतिभावलेन शब्दप्रयोगद्वारा सूत्रकारनिर्दिष्टपद्धातिम् अनुसरन् प्रभूता उभूतिसम्भूतया अद्भुतसूक्ष्म बुद्ध्या शब्दसिद्धेः सुगमं मार्ग बोधयति। तदीया शैली नवनवोन्मेषणशालिनी, नानाविधतर्क समन्विता महतसूक्ष्मेक्षिकयुता च शास्त्रीयसिद्धान्तं सः यथरोचितरीत्या प्रतिपादयति। अस्यां सिद्धान्तप्रतिपादनप्रक्रियायां सः स्वस्य परिष्कृतमस्तिकात् उद्भूताः चिररुचिरानल्पाः कल्पनाः अपि समायोजयति। एताः निगुदाकृति कल्पनाः गूढशयम् अवगन्तुं न केवलं पेलवधिः अपितु व्युत्पन्नमतिः अपि कष्टम् अनुभवति, अतः एव टीकाकाराणामपि

अनेकत्र मतभेदाः दृश्यन्ते।

भाष्यकारः अनुभवी न्यायवादी इव अद्भुततर्कैः स्वस्य वादं प्रतिपादयति अतः पूर्वपक्षस्य उपस्थापनावसवरे तदीयं प्रवलं तर्कं दृष्ट्वा अप्रबुद्धः पाठकः कदाचित् अयमेव उत्तरपक्ष इति। अग्रे उत्तरपक्षस्य उपस्थापनावसरे सः पूर्वोक्तानां तर्काणां सर्वेषां कृते समीचीनम् उत्तरं यच्छति। शिष्यबुद्धिपरीक्षार्थं व्युत्पादनार्थं वा भाष्यकारः सूत्रं विभिन्नदृष्ट्या प्रत्येकपक्षेण च दर्शयति, विवृणोति च तस्मिन् क्षणे यत् सूत्रभोग्यं भवेत् तस्य खण्डनं, मण्डनं का कृत्वा अन्तिमं निर्णयं पाठकानां कृते त्यजति। भाष्यकारस्य वैज्ञानिकी व्याख्यान शैली अत्युत्तमा अस्ति यत् पूर्वपक्षउत्तरपक्षयोः समर्थनेन प्रबलतमां युक्ति–प्रदर्श्य अपि निर्णयावसरे मौनम् आश्रयति। भाष्यकारः वदति–

एते दोषा समा भूयांसो वा। तस्मान्नार्थोऽनया परिभाषया दोषा खल्वपि साकल्येन परिगणिताः। प्रयोजनानामुदाहरणमात्रम्, कुत एतत्। न हि दोषाणां लक्षणमस्ति, तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि तदर्थमेषा परिभाषा कर्तव्या, प्रति विधेयं च दोषेषु  एवं वदन् प्रत्यक्षरूपेण स्वस्य अभिमतं प्रकाशयति। तस्मादस्तु स एव मध्यमः पक्षः इति स्पष्टरूपेण अभिप्रायकथनं तु अतिविरलतया शङ्कासमाधानपूर्वकम् अवगता स्यात् इतिधिया एव भाष्यकारेण निर्णयाः न श्राव्यन्तो इति भाष्यते।

ये अन्वाख्यान – प्रत्याख्यानपराः अन्तर्विरोधाः आपाततः दृश्यन्ते तस्य निगूढरहस्य उत्तरं स्वयं भाष्यकारः वदति यत् – न हि दोषाः सन्तीति परिभाषा न कर्तव्य सूत्रं वा न प्रणेयम्, न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते, न च मृगाः सन्तीति यवा नोप्यन्ते  इति अत एव अनेकेषां सूत्राणां प्रत्याख्यानं ज्ञात्वा अपि भाष्यकारस्य इदं कथनं सुसङ्गतं भासते–

प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य...... भवितुम् किम्पुनरियता सूत्रेण  अपि च सामर्थ्ययोगान्न हि किञ्चिदास्मिन्शास्त्रे पश्यामि यदनर्थकं स्यात्। अस्य व्याख्यानशैली अत्यन्तं वैचित्र्यपूर्णा, यथाप्रसंङ्ग यथाभिमतं समाधानस्य दाने तस्य क्षमता अपूर्वा। किन्तु इदं सर्वं सः पाणिनिव्याकरणस्य परिधौ करोति एत्येतत् स्मर्तव्यम् भाष्यकारः सूत्रन्यासे किमापि परिवर्तनं कृत्वा लाघवेन दोषाणां परिहारं दर्शयेद् चेदपि अन्ते इदं दृढं कथयति सिध्यत्येनं सूत्रं तु भिद्यते। अपाणिनीयं तु भवति, अथान्यासमेवास्तु इति। एतदवधेयं यत् भाष्यकारः यावच्छक्यं पाणिनिसूत्रैः एव सर्वं निर्वहति। निरर्थकं सूत्रस्य परिवर्तनं वार्तिकानां योजनं वा सः न सहते। वार्तिककारः 'क्ङिति च'  सूत्रस्य क्ङितिप्रतिषेधे तन्निमित्तग्रहणस्योपसंख्यानम्, उपधारोश्वीत्यर्थम् इत्युक्त्वा तन्निमित्तग्रहणं इत्येद् वदति तत्सर्वम् अनावश्यकं मन्यमानः भाष्यकारः उपधार्थेन तावन्नार्थस्तन्निमित्तग्रहणेन इति वदन् उक्तस्य प्रस्तावस्य खण्डनं करोति। किन्तु यदा पाणिनिसूत्रेण विशेषयुक्तिप्रयुक्तिभिः अन्यथासिद्धं भवेत् विरोधं

करोति। किन्तु अयं विरोधः दुर्ष्यामूलः न अपि तु समन्वयमूलः – "नासूया कर्तव्या यत्रानुगम आचार्येण क्रियते।

प्रत्याहार कल्पनायाः विषये अपि भाष्यकारस्य स्वीया धारणा विद्यते। तदनुसारं माहेश्वर-सूत्राणां पाणिनि-प्रोक्तानां प्रत्ययानां धातूनामपि कदाचित् नेदं प्रत्ययग्रहणं, किन्तर्हि, प्रत्याहारग्रहणम्, इति प्रत्याहारं मन्यमानः इष्टं साधयति। मात्रच्, प्रत्याहारः अस्य उत्तमं निदर्शनम्।

सूत्राणां सन्धिविषये अपि भाष्यकारस्य कौशलम् अत्यपूर्वम्। लक्ष्यानुरोधेन यत्र यथा आवश्यकं तत्रा तथैव सूत्रस्य विभागं कुर्वन् इष्टसिद्धिं सम्पादयति। किन्तु कुत्रापि दोषः यथा न स्यात् तथा साधयति इत्येतत् अवधेयम्। गर्गादिभ्यो यञ् टाङसिङ्सामिनात्स्याः इत्येतयों सूत्रणां भाष्यम् अस्य प्रमाणम्। लक्ष्यदर्सनवशेन सूत्राणां न्यासपरिर्तने योगविभागे चापि भाष्यकारस्य अपूर्वा कल्पनाशाक्तिः वर्तते। ई च खनः इत्येतत् सूत्रम् अस्य उदाहरणम्। भाष्यकारः अत्र हस्वम् इकारं मन्यते।

**सन्दर्भः**

१. भविष्यपुराणम्
२. महाभाष्यप्रथमाह्निके
३. वाक्यपदीयम्
४. पा.१.१.३९
५. पा.१.१.११
६. पा.१.१.३९
७. पा.१.१.१
८. पा.६.१.७७
९. पा.१.१.४
१०. पा.५.१.५९
११. पा.४.१.१०५
१२. पा.७.१.१२
१३. पा.३.१.१११

# शाब्दविचारः

**पुरुषोत्तमदासः**

शोधच्छात्रः नव्यव्यकारणम्

दृश्यते (आत्मतत्त्वं, ब्रह्मतत्त्वं, शब्दतत्त्वं वा) विचार्यते बोध्यते येन तद्दर्शनम्। शास्त्रपदेनाप्येतदुच्यते शिष्यते अनुशिष्यते हितमुपदिश्यतेऽनेनेति शास्त्रम्। योगरुढ्याश्रयणेन चाऽत्यन्तत्वाऽवबोधकं शास्त्रं दर्शनमिति फलति। तच्च आस्तिकनास्तिकभेदेन द्विविधम्। तत्रा च व्याकरणशास्त्रमपि आस्तिकदर्शनं भवति। ब्रह्म सत्यं जगन्मिथ्या इति वेदान्तसिद्धान्तवत् सत्यप्राप्तये नानोपाय-वर्णनं तथेदमपि शब्दसाधुत्व-प्रक्रियाप्रदर्शनं सत्यप्राप्त्यर्थमेव तदुक्तं भर्तृहरिणा-

**उपायाः शिक्षमाणानां बालानामुपलालनाः।**
**असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते।।इति।।**

एवञ्च व्याकरणनिकाये शब्दब्रह्मैव सर्वजगदुपादानमिति प्रसिद्धयति। तत्रा जगतः शब्दमयत्वं किं शब्दपरिणामत्वनिबन्धनमुत शब्दानुत्पत्तिनिबन्धनमुत आह उत वा शब्दविवर्त्तत्वनिबन्धनमिति जिज्ञासायामुच्यते- जगतः शब्दमयत्वं शब्दमयत्वं शब्दब्रह्मविवर्त्तत्वनिबन्धनमेव। तदुक्तं वाक्यपदीये-

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**

**श्री भट्टोजिदीक्षितश्चाह श्री लक्ष्मीरमणं नौमि गौरीरमणरूपिणम्।**
**स्फोटरूपं यतः सर्वं जगदेतद् विवर्त्तते।।**

सर्वं दरीदृश्यमानं जगत् तस्मादनादिनिधनवाप्छब्दब्राह्मणोऽर्थभावेन विवर्त्तत इति संक्षिप्तार्थः। यथा चैकस्य सूर्यस्य नानवापिकूपतडागादिषु प्रतिबिम्बनं न नानास्वप्रयोजकं, तथैकस्य नित्यस्य शब्दब्रह्मणो नानाकारेण विवर्त्तनमपि न नानात्वप्रयोजकम्। कार्यशब्दस्तु नाना। शाब्दिकैर्भेदसहिष्णोरभेदस्य स्वीकारात्। नित्यकार्यशब्दयोरौपाधिकभेद-भिन्नत्वस्वीकाराच्च कार्यशब्दानां नानात्वेऽपि न नित्यस्य नानात्वशङ्का।

जगतः शब्दविवर्त्तत्वस्वीकारादेव जडादिपदार्थानामपि शब्दात्मकत्वमबलम्ब्य नित्यत्वं स्यादिति शङ्कोच्छेदेऽतात्त्विकान्यथाभावस्यैव विवर्त्तपदार्थत्वात्।

**शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।**
**छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत।। इति**

इत्यत्र करिकायां भर्त्तृहरिराचार्यः संसारोऽयं शब्दस्य परिणाम इति प्रत्यपादयत् अनादि निधनं ब्रह्म इत्यत्र तु विवर्त्तवादं समर्थितवान्। विवर्त्तपरिणामयोश्च भेदे महान् उभयोः विरोधो भूयात्। यतो ह्युपादानसमसत्ताककायापत्तिः परिणाम्ः। उपादानविषय

**सत्ताककार्यापत्तिः विवर्त्तः–**

सत्ताककार्यापत्तिः विवर्त्तः।

वेदान्तसारे अतत्त्वतोऽन्यथा प्रथा विवर्त्तः। सतत्वतोऽन्यथा प्रथा विकारः इत्युदीरितः।

किञ्च शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः इति वाक्यपदीयस्यायमर्थः अयं सर्वोऽपि वाच्यवाचकभेदभिन्नः संसारः शब्दस्य सूक्ष्मवाक्तत्त्वस्य परिणाय इत्याम्नायविदो वेदविदो विदुर्जानन्ति, न तु वयं वदामः। अतः प्रथमं सर्गादावेतत् सर्वं विश्वं छन्दोभ्य एवं व्यवर्त्तत। अत्र छन्दः पदेन लक्षणया सूक्ष्मं वाक्तत्त्वं गृह्यते नित्यशब्दत्वरूपत्त्छन्दः साधर्म्यात्। यत्र मते वेदस्यानित्यता तत्रा वेदस्य मन्त्ररूपस्य सूक्ष्मवाक् कार्यत्वेन कार्यकारणयोरभेदो बोध्यः।

तदेवं व्याकरणदर्शनेऽपि विवर्त्तवादः स्वीक्रियते, किन्तु नाऽयमद्वैतवेदान्त-प्रक्रियास्वीकृतविवर्त्तेन सर्वथा समानः। यतो हि वाक्यपदीये तस्य शब्दब्रह्मणः स्वतन्त्रशक्तिः कालः स्वीक्रियते–

**अध्याहितकलाः यस्य कालशक्तिमुपश्रिताः।**
**जन्मादयो विकारा षड् भावभेदस्य योनयः।।**

नामरूपात्मकोऽयं संसारः शब्दाख्यस्य ब्राह्मणो विवर्त्त एव न तु परिणामः शब्द एव सर्वेषां पदार्थानां कारणम्। न हि तादृशं किमपि ज्ञानं यत्र शब्दो न भासते। तदुक्तम्–

**न सोऽस्ति प्रत्ययो लोके यः शब्दाऽनुगमादृते।**
**अनुविदूमिव ज्ञानं सर्वं शब्देन भासते।। इति**

शब्दः नित्यः अथीऽपि नित्यः। वेदाः प्रमाणम्, यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यस्य निःश्वसितं वेदाः इत्यादयः। वाक्यपदीयेऽपि

**अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरम्।**
**विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।**

शब्दार्थयोः सम्बन्धः नित्यः उच्यते हि पदपदार्थयोः इतरेतराध्यासरूपः स्मृत्यात्मकः योऽयं शब्दः सोऽर्थः योऽर्थः सः शब्दः इति। वस्तुतः उभयत्र भेदः परन्तु तादात्म्येन अभेदः भासते। वाक्यपदीये पुनः उच्यते–

**नित्याः शब्दार्थसम्बन्धाः तत्राम्नातः महर्षिभिः।**

**सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः।। इति**

ननु पूर्वपक्षः केनचिद् उत्थापितः यत् - शब्दः यदा अस्माभिः श्रुतः तस्मिन् समये जिज्ञासा भवति यत् किम् प्रातिपदिकम्, को धातुः, कश्च प्रत्ययः तर्हि शब्दस्य नित्यत्वं तु न भवति। नागेशेनाऽपि उक्तम्।

तत्रा प्रतिवाक्यं सङ्केतग्रहासंभवात् वाक्यान्वाख्यानस्य लघुनोपायेनाशक्यत्वाच्च कल्पनया पदानि प्रविभज्य पदे प्रकृतिप्रत्ययभागान् प्रविभज्य कल्पिताभ्यामन्वयव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्यः।

वस्तुतस्तु वाक्यं नित्यमखण्डञ्च तथापि प्रत्येकवाक्ये सङ्केतग्रहणस्यासम्भवतया कृतेऽपि प्रयत्ने केनापि सरलेनोपायेन वाक्यसंयोजनाया अपार्यत्वाच्च वाक्यं पदेषु पदानि च प्रकृतिप्रत्ययादिषु कल्पनया प्रविभज्य कल्पिताभ्यामेव तत्सत्त्वेन तत्सत्त्वं तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यां तत्तत्पदप्रकृतिप्रत्ययादीनामर्थविभागञ्च कुर्वन्ति स्म शिष्याः। विभागश्च केवलं व्याकरणशास्त्रविषयो न तु वास्तिविक इति यथाऽह हरिरपि-

**पदे न वर्णा विद्यन्ते वर्णेषु अवयवा न च।**
**वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन।।**

भर्त्तृहरेरपि शब्दस्य प्रकाराः अर्थात् अष्टौ पदार्थाः अन्वाख्येया उक्ताः-

**अपोद्धारपदार्था ये चाऽर्थाः स्थितलक्षणाः।**
**अन्वाख्येयाश्च ये शब्दाः ये चाऽपि प्रतिपादकाः।।**

**कार्यकारणभावेन योग्यभावेन च स्थिताः।**
**धर्मे च प्रत्यये चाङ्कं सम्बन्धाः साध्वसाधुषु।।**

**ते लिङ्गैश्च खशब्दैश्च शास्त्रेऽस्मिन्नुपवर्णिताः।**
**स्मृत्यर्थं अनुगम्यन्ते केचिदेव यथागमम्।।** (वाक्यपदीयम्)

पदे प्रकृतिप्रत्ययविभागः काल्पनिकः शब्दस्य नित्यत्वं कथं साध्यम्

समाधानम्  मुख्यं वाचकत्वं तु कल्पनया बोधितसमुदायरूपे पदे वाक्ये वा लोकानां तत् एवार्थबोधात् ''उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः'', इति न्यायेन व्याकरणभेदेन स्थानिभेदेऽपि न क्षतिः, देशभेदेन लिपिभेदवदिति दिक्।

ननु शब्दः यदि नित्यः तर्हि सर्वदा श्रूयेता उच्चरित्रे सत्येव श्रूयते अन्यथा तु न श्रूयते तर्हि शब्दस्य नित्यत्वं कथं साध्यम्। भर्त्तृहरिणा समाधानं दत्तम्-

**आण्डभावमाविपन्नः यः क्रतुः शब्दसंज्ञकः।**
**वृत्तिस्तस्य क्रियारूपा भागशो क्रमं भजते।।** (वाक्यपदीयम्)

मृगाण्डेषु उत वा कुकुटाण्डेषु पूर्वं यथा अद्रवं भवति तन्मध्ये तिरश्चां चक्षूंषि, नासिका, मुखम्, जानुद्वयं भवतः सक्रमः भवति। कारणम् उच्चारणं केवलं प्रयत्नमात्रं न तु शब्दोत्पत्तेः कारणम्।

किञ्च वैश्वरु वागुत्पन्नः अनित्यः भवितुमर्दति। अभिव्यञ्जकं ध्वनिम् उत्पन्नम् अनित्यं भवितुमर्हति। अभिव्यञ्जकं ध्वनिमुत्पन्नमित्यनेन अभिव्यङ्ग्यस्य परारूपस्य वाग्विशेषस्य अनित्यत्वं तु न भवति तत्तु नित्यत्वमेव –

तदाह–

**परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिताः।**
**हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।।**

**वैखर्या हि कृतो नादः परश्रवणगोचरः।**
**मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।। इति**

युगपदेव मध्यावैखरीभ्यां नाद उत्पद्यते। तत्रा मध्यमानादोऽर्थवाचकः स्फोटात्मकशब्दव्यञ्जकः। वैखरीनादो ध्वनिः सकलजनश्रोत्रग्राह्यो भेर्यादिनादवन्निरर्थकः। मध्यमानादश्च सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मतरवायुव्यङ्ग्यः शब्दब्रह्मरूप-स्फोटव्यञ्जकश्च। तादृशमध्यमानादव्यङ्ग्यः शब्दः स्फोटात्त्मको नित्यः ब्रह्मरूपश्च। कारणस्वरूपाविरोधेन कार्यप्रतिभासाद् ब्रह्मणो विकारित्वाभावेन न नित्यत्वहानिरिति व्याख्यातारः। स्थितिप्रवृत्तिविभागदिशब्देनैव क्रियते इति न शब्दतत्त्वस्य ब्रह्मण इवापरिमितशक्तिमत्त्वे क्षतिः।

एतेन मध्यमानादव्यङ्ग्यस्य स्फोटात्मकस्य शब्दस्य ब्रह्मरूपत्वं नित्यत्वञ्च सिद्ध्यति। इति शम्।

**सन्दर्भग्रन्थाः**

१. सर्वदर्शनम्

२. परमलघुमञ्जुषा, चौखम्बा पब्लिशर्स २०११ लोकमणिदहाल

३. वैयाकरणसिद्धान्तमञ्जूषा

४. वैदिकवाङ्मयस्य इतिहासः

५. वैयाकरणभूषणसारः (कौण्डभट्टः)

६. वाक्यपदीयम् (डॉ. हरिनारायण तिवारी)

७. शब्दार्थमीमांसा

८. महाभाष्यम् (श्रीपतञ्जलिः)

९. वेदान्तसारः (ईश्वरकृष्णः)

# "तुल्यास्यप्रयत्नं सवर्णम्" इति सूत्रस्य भाष्यदृष्ट्या समीक्षणम्"

**प्रमोदकुमारशुक्लः**
सहायकाचार्यः(व्याकरणम्)
राष्ट्रियसंस्कृतसंस्थानम्
लखनऊपरिसरः, लखनऊ

सूत्रमिदं सवर्णसंज्ञाविधायकं सूत्रं वर्तते। अस्य सूत्रस्य व्याख्याने महाभाष्यकारेण अतिविस्तृता चर्चा कृता। सर्वप्रथममस्माभिः ज्ञातव्यं यत् किमिदं तुल्यास्यप्रयत्नम् इत्युक्ते पदस्यास्य आशयः कः? तुलया सम्मितं तुल्यम् इत्युक्ते समानं सदृशं वा। आस्यं च प्रयत्नश्च आस्यप्रयत्नम् समाहारद्वन्द्वः। तुल्यमास्यं च तुल्यप्रयत्नं च सवर्णसंज्ञं भवति। 'तुल्यास्यप्रयत्नम्' अस्य समस्तपदस्य चतुर्धाऽर्थाः कर्तुं शक्यन्ते तद्यथा- १. द्वन्द्वगर्भबहुब्रीहिः- आस्यं च प्रयत्नश्च अनयोः समाहारः आस्यप्रयत्नम्, तुल्यमास्यप्रयत्नम् यस्य तत् सवर्णसंज्ञं स्यात्। अत्र तुलया सम्मितं व्युत्पत्तिरियं भूते अपि तुल्यशब्दः सादृश्यार्थे रूढो वर्तते। २. त्रिपदबहुब्रीहिः- तुल्यः आस्ये प्रयत्नः एषाम्। तुल्यं समानं वर्तते आस्ये प्रयत्नं येषां तेषां सवर्णसंज्ञा भवति। ३.तुल्यम् आस्यशब्दयोः तत्पुरुषो भवति, तुल्यः आस्ये=तुल्यास्यः। ततो बहुब्रीहिः भवति। ४. आस्य-प्रयत्नयोस्तत्पुरुषः आस्ये प्रयत्नः आस्यप्रयत्नः ततो बहुब्रीहिः क्रियते तुल्यः आस्यप्रयत्नं येषाम् इत्युक्ते आस्ये प्रयत्नः आस्ये प्रयत्नः समानं येषां तेषां सवर्णसंज्ञा भवति। एतेषु प्रथमं पक्षं स्वीकृत्य अत्र विचारः प्रस्तूयते, शेषत्रयाणां पक्षाणां चर्चा अन्ते करिष्यते। अत्र प्रश्न उदेति यद् आस्यं किम्, मुखम् अथवा तत्र भवं ताल्वादिकं स्थानमिति। उत्तरं प्राप्यते यत् लौकिकमास्यमिति। पशुरपत्यं देवतेत्यादिवत् प्रसिद्धमित्यर्थः। यद्यपि ताल्वादिकमपि लौकिकमास्यम्, तथापि तत्रा योगवशादास्यशब्दो वर्तते इति झटिति न तत्प्रसिद्धमिति मुखमेव प्रसिद्धत्वाल्लौकिकमुक्तम्। तस्यैव च प्राथम्याद् ग्रहणं युक्तमिति। ओष्ठात्प्रभृति प्राक्काकलकात् इत्यत्र काकलकं नाम ग्रीवायामुत्पन्नप्रदेशः। पुनः प्रश्नः जायते यद् यदि निमित्तवशात्प्रवर्तते ततस्ताल्वादिष्वपि प्रवर्तिष्यतीति। तदा कथ्यते यत् सत्यपि निमित्ते रूढिवशान्मुखे एव तत्प्रवर्तते न ताल्वादिष्वित्यर्थः कृत्यल्युट इति करणे ण्यत्। अयमत्र व्यक्तिस्फोटपक्षेऽभिव्यक्तिः, जातिस्फोटपक्षे तूत्पत्तिः। आङ्पूर्वात्स्यन्दतेः 'अन्येष्वपि दृश्यते' इति डः। एतद् आस्यं कर्म, अन्नं कर्तृ, आस्यन्दते=द्रवीकरोति, अन्नप्रक्षेपणेन

मुखस्य द्रवत्वोत्पादनात्। प्रयत्नविषयको प्रश्नः पुनरायाति यत् प्रयतनं प्रयत्नः, प्रारम्भो यत्नस्य वा। भावेऽभिधेये नङ्प्रत्ययः क्रियते। तेन नङशब्दस्य भावः साधनं भवति। यदा प्रश्नो भवति यत् अस्योपादनं किम्? तदा आस्य एव सर्ववर्णानां निष्पादादिति भावः। नासिकाऽपि न बाह्या वर्णोत्पत्ति-निमित्तम्। किं तर्हि? अस्यान्तश्चर्मविततमस्ति पणचर्मवत्, तसम्बद्धा रेखा नासिकाः, तस्यां वाय्वभिजाताद्वर्णोत्पत्तिः, विसर्जनीयस्यैकीयमतेनोरस्यत्वात्सावर्ण्याभावेऽपि न दोषः। सूत्रे आस्य ग्रहणस्य विशेषप्रयोजनं अग्रे कथ्यते- 'प्रयत्नस्य विशेषणनिर्माणाय आस्यस्य ग्रहणं कृतम्। आस्ये येषां प्रयत्नः तुल्यो वर्तते तेषामेव परस्परं सवर्णसंज्ञा भवति इत्यादिविचाराः अग्रे प्रस्तोष्यते। केवलं प्रयत्नमात्रस्य तुल्यतायां सवर्णसंज्ञायाः निवारणं क्रियते। सवर्णसंज्ञायां भिन्नस्थानयुक्तेषु वर्णेष्वपि प्रयत्नस्य तुल्यतया सवर्णसंज्ञायाः अतिप्रसङ्गो भवति। सवर्णसंज्ञायां भिन्नस्थानयुक्तानां जबगडदशामपि सवर्णसंज्ञा भविष्यति। अत्र प्रयत्नसाम्येन अतिप्रसङ्गः प्राप्नोति। भाष्ये शकारः प्रत्याहारपाठवशात्पठितः। अत्र प्रत्याहारे जबगडदानां प्राप्नोतेत्यर्थः। शकारस्य तु विवृतत्वात्स्पर्शानां स्पृष्टत्वादप्रसङ्ग एव। ततश्च ऊर्ग्ज इत्यादौ झरो झरीति लोपप्रसङ्गः। आस्ये येषां तुल्यो देश इत्यास्येन देशो विशेष्यते। तत्रा व्यभिचाराभावादास्येन देशस्य विशेषणमयुक्तमित्यर्थः। तस्य सम्भवव्यभिचारसद्भावादित्यर्थः। बाह्यप्रयत्नव्युदासाच्चत्वार आभ्यन्तरा गृह्यन्ते। स्पृष्टतेषत्स्पृष्टताविवृततासंवृतताख्याः। प्रयत्नस्य विशेषणस्य रूपे आस्यस्योपादनं वर्तते इत्युक्ते आस्ये एव जायमानस्य प्रयत्नस्य समानता स्वीक्रियते। यतो हि आस्यात् बाह्यप्रयत्नाः अपि भवन्ति, ते त्यक्ता भवन्ति। सवर्णसंज्ञायै तेषां न कञ्चित् महत्त्वं वर्तते तेषां प्रयत्नानां भूते सत्यपि सवर्णसंज्ञा सिद्धो भवति। ते बाह्यप्रयत्नाः विवार-संवार-श्वास-नाद-घोषवता-अघोषवता-अल्पप्राणता-महाप्राणता चेति। एतेषु प्रत्येकं वर्गस्य प्रथम-द्वितीयवर्णाः विवृतकण्ठयुक्ताः, श्वासानुदानाः अघोषाश्च भवन्ति। प्रथमः अल्पप्राणः द्वितीयश्च महाप्राणाः सन्ति। तृतीयचतुर्थवर्णाः सम्वृतकण्ठयुक्ताः नादानुदाना घोषयुक्ताश्च भवन्ति। प्रथमः=तृतीयः अल्पप्राणः द्वितीय=चतुर्थश्च महाप्राणाः सन्ति। अनुनासिकधर्मं विहाय यथा तृतीयः तथैव पञ्चमः, पञ्चमे वर्णे केवलमनुनासिकगुणः एव अतिरिक्तो वर्तते। एवं स्वीकृतेऽपि बाह्यप्रयत्नानां वारणाय आस्यं प्रयत्नस्य विशेषणे कृतेऽपि अकारस्य केनचित् सह सवर्णसंज्ञा न प्राप्नोति। यतो हि अवर्णस्य स्थानमास्याद् बहिः वर्तते। केचन विद्वांसः काकलकात् अधोभागे उपजत्रुमवर्णस्य स्थानं स्वीकुर्वन्ति। अत एव अकारस्य उच्चारणे बाह्ययत्नः करणीयो भवति। तथैव अन्ये केचन अवर्णं सम्पूर्णमुखरूपस्थानिको स्वीकुर्वन्ति, तेषां विचारः वर्तते यत् अवर्णस्योच्चारणं कस्मिश्चित् स्थानविशेषे न भूत्वा सम्पूर्णे मुखे भवति। अतः आस्ये एव प्रयत्नो भवति, बहिः न। एवं स्वीकृतेऽपि व्यावहारिकपक्षः सुदृढो भवति, यद् आस्ये येषां देशो तुल्यमिति। यतो हि सम्पूर्णमास्यमवर्णस्य स्थानं भवति। अस्य समाधाने वक्ति भाष्यकारः यत् यदि व्यपदेशवद् भावः स्वीक्रियते तर्हि

व्यवहारपक्षः सुदृढो स्यात् अर्थात् आस्ये देशः व्यवहारोऽयं काल्पनिकावयवावयविभावं मत्वा भविष्यति। पुनः आक्षेपो जायते यत् अनेन सवर्णसंज्ञा तु सिद्ध्यते परन्तु सूत्रस्य स्वरूपे भेदोत्पद्येत्। यतो हि एवं कृते सूत्रस्य स्वरूपमेवं स्यात्- ''आस्ये तुल्यदेशप्रयत्नं सवर्णम्'' इति। पुनः यदि यथा सौविध्यं तथा स्वीक्रियते तर्हि प्रयत्नतुल्यकारणात् भिन्न-भिन्नस्थानयुक्तानां वर्णानामपि सवर्णसंज्ञा अतिप्रसक्तो भविष्यति। तद्यथा-जबगडदइत्येतेषां बाह्यप्रयत्नाः समानाः किन्तु स्थानभिन्नाः सन्ति। सिद्धान्ततः एतेषां सवर्णसंज्ञा न भवति। परन्तु मूलसूत्रस्वरूपभूते सति भविष्यति। एवं सम्प्राप्तदोषाणां वारणाय भाष्यकारेण समाधानं कृतम् यत् नास्त्ययं लोकप्रसिद्धास्यशब्दः अपितु तद्धितान्तास्यशब्दोऽयम्। आस्ये भवः आस्यः। 'शरीरावयवाच्च' इति सूत्रेण यत्प्रत्ययो भवति। एवं तर्हि आस्ये के भवन्ति? इत्याकांक्षायामुच्यते यत् स्थानं करण=आभ्यन्तरप्रयत्नश्च। एवं स्वीकृतेऽपि आस्येन प्रयत्नं नैव विशेष्यते, आस्यं प्रयत्नस्य विशेषणं नैव भवति, अपितु प्रयत्नोऽपि विशेषितो भवति। कथमिति चेत् नहि प्रयतनं प्रयत्नः, इत्युक्ते 'प्र' उपसर्गः न सामान्यार्थे। अपितु यत्नस्यारम्भो प्रयत्नः। अर्थाद् वर्णानामुत्पत्तेः पूर्वं यो यत्नो क्रियते सैव प्रयत्नो भवति, न तु अनन्तरंजायमानो यत्नः प्रयत्नो भवति। अत एव आभ्यन्तरप्रयत्नाः एव गृह्यन्ते न तु बाह्यप्रयत्नाः। यदि यत्नस्यारम्भो प्रयत्नः अस्ति तर्हि अवर्णस्य एङोश्च एतयोः अपि सवर्णसंज्ञा प्राप्नोति। यतो हि ए, ओ इत्यनयोः पूर्वभागः अवर्णः पूर्वमुच्चरितो भवति। नैषो दोषः यतो हि एतौ प्रश्लिष्टौ पृथक् श्रवणाभावात्। एवं तर्हि 'अ' एवं 'ऐच्' अनयोः प्राप्नोति यतो हि अत्र ऐ, औ इत्येतयोः अवर्णध्वनिः पृथक् श्रूयते एव। ऐ, औ अनयोः अवर्णः विवृततरप्रयत्नयुक्तौ। एकाकी 'अकारः विवृतो भवति। आ इतोऽपि विवृततरो भवति। अतः 'अ' 'आ' अनयोः ऐ, औ एवं अन्यकेनचित् सह सवर्णसंज्ञा न प्राप्नोति। एवमपि तर्हि ऐ, औ इत्येतयोः एव परस्परं सवर्णसंज्ञा प्राप्तो भवति। यतो हि एतयो पूर्वभागस्य अकारस्य विवृततरः समानमेव प्रयत्नो भवति। नैव एतौ समानदेशीयौ अपितु ऐकारस्य कण्ठतालुः औकारस्य च कण्ठोष्ठौ अतः एतयोः सवर्णसंज्ञा नैव भविष्यति। एवमपि दोषः उदात्ताद्यवर्णानामपि सवर्णसंज्ञा न प्राप्नोति। यतो हि यदि स्थानस्य साम्यं पूर्णतया स्वीक्रियते तर्हि उदात्तादिप्रयत्नानपि पूर्णसाम्यता स्वीकरणीया भविष्यति। फलतः उदात्तसंज्ञकस्य अकारस्य अनुदात्तस्वरितयोः अवर्णाभ्यां सह सवर्णसंज्ञा भवितुं नार्हति। अतः स्थान-प्रयत्नयोश्च पूर्णसाम्यता नैव स्वीकर्तव्या। अस्य दोषस्य वारणाय कथयति भाष्यकारः यत् नास्त्ययं दोषः उदात्तादयः भेदकाः न भवन्ति, अपितु ते अभेदकाः एव। अतः एतेषां गुणानां भिन्नत्वे सत्यपि सवर्णसंज्ञा सम्भवति। पुनः द्वितीयसमाधानं प्रदीयते यत् सामान्यप्रयतनमेव प्रयत्नः इति। एवम् आस्यं च तदैव तद्धितप्रत्ययान्तं आस्ये भवः आस्यमिति। अनयोः द्वयोः यः येन साम्यं भवति तस्य तेन सवर्णसंज्ञा स्वीकरिष्यते। परं भेदे सति सवर्णसंज्ञायाः फलं खलु एवं कथ्यते। यतो हि

सवर्णसंज्ञा तु भेदे एव आश्रितो भवति, अभेदे सति सवर्णसंज्ञा व्यर्थ स्यात्। यदि एवं स्वीक्रियते यत् किञ्चिद् भेदे सति सवर्णसंज्ञा भविष्यति तर्हि शकारछकारयोः, “षकारठकारयोः, सकारथकारयोरपि सवर्णसंज्ञा प्राप्तो भवति। यतो हि एतेषां वर्णानां करण=आभ्यन्तरप्रयत्नं विहाय अन्यत् सर्वं समानं वर्तते। सूत्रे सम्भावितविग्रहाणां प्रदर्शनं कुर्वन् भाष्यकारेण कथितं यद् यदि एवं स्यात्तर्हि अत्र नैव समाहारद्वन्द्वः अपितु त्रिपदबहुब्रीहिः समासोऽयम्। तुल्यमास्ये प्रयत्नः एषामिति। एवं त्रिपदबहुब्रीहिः स्वीकारे सति शकारछकारयोः सवर्णसंज्ञा न भविष्यति। यतो हि द्वयोः आस्ये जायमानाभ्यन्तरप्रयत्नः भिन्नो वर्तते। अथवा पूर्वं तत्पुरुषो ततो बहुब्रीहिः– तुल्यः आस्ये तुल्यास्यः, तुल्यास्यः प्रयत्नः येषामिति। अत्र ‘मयूरव्यंसकादयश्च’ इति सूत्रेण सप्तम्यन्तोत्तरपदतत्पुरुषो निर्मितो भवति पश्चात् बहुब्रीहिः क्रियते। अत्रास्ये जायमानप्रयत्नः समानो भवितव्यः। अथवा परस्तत्पुरुषस्ततो बहुब्रीहिः–आस्ये प्रयत्नः आस्यप्रयत्नः। तुल्यः आस्यप्रयत्नः एषामिति। आस्ये जायमानाभ्यन्तरप्रयत्नाः येषामेषां समानं स्यात् तेषां परस्परं सवर्णसंज्ञा भवति। एवं कृते नास्ति कश्चिद् दोषः। अग्रे वार्तिककारेणोक्तं यत् प्रकृतसूत्रे तस्येति वक्तव्यम्। सूत्रे तस्य ग्रहणस्य प्रयोजनं समुद्बोधयन् कथयत्याचार्यः यत् यो यस्य तुल्यास्यप्रयत्नः स तस्य सवर्णसंज्ञो यथा स्यात्। अन्यस्य तुल्यास्यप्रयत्नोऽन्यस्य सवर्णसंज्ञा मा भूदिति। अतः सूत्रे तस्येति योजितव्यम्। भाष्यकारेण पुनरस्य निराकरणं कुर्वन् कथयति यत् तस्येति पृथक् कथनस्य नास्त्यावश्यकता यतो हि वचनमेव इदं प्रमाणम्। तदा शंका जायते यत् अन्यस्य तुल्यास्यप्रयत्नयुक्तवर्णः अन्यस्य सवर्णसंज्ञा कथन्न भवति? अस्याः शकायाः समाधानं कुर्वन् बोधितं भगवता भाष्यकारेण यत् सवर्णसंज्ञा विधायकसूत्रेणैव सिद्धोऽस्ति। यदि एव न स्यात्तर्हि अन्यस्य तुल्यास्यप्रयत्नोऽपि अन्यस्य सवर्णसंज्ञा भवेत्तर्हि सवर्णसंज्ञा विधायकसूत्रमिदं व्यर्थं भविष्यति। अतः अनेन स्वयमेव स्पष्टौ भवति यत् येषामास्यप्रयत्नः समानः तेषां परस्परं सवर्णसंज्ञा भवतीति। पुनः अग्रे अन्यत् समाधानं प्रयच्छति भगवान् भाष्यकारः यत् सम्बन्धिशब्दैर्वा पुनस्तुल्यमेतत्। तद्यथा– सम्बन्धिशब्दाः मातरि वर्तितव्यम्, पितरि शुश्रूषितव्यम् इति। न चोच्यते यत् स्वस्यां मातरि, स्वस्मिन्पितरि इति। सम्बन्धाच्चैतद्गम्यते यत् या यस्य माता, यश्च यस्य पितेति। तथैव अत्रापि ‘‘तुल्यास्यप्रयत्नं सवर्णम्’’ इत्यत्र सम्बन्धिशब्दावेतौ, तत्रा सम्बन्धादेतदवगन्तव्यम्– यत्प्रति यत्तुल्यास्यप्रयत्नं तत्प्रति तत्सवर्णसंज्ञं भवतीति। वार्तिककारेण पुनः स्वमतं स्थापितं यत् ऋकारलृकारयोः सवर्णसंज्ञा विधेया। तस्य प्रयोजनमपि बोधितं यत् ‘‘अकः सवर्णे दीर्घः’’ इत्यनेन दीर्घत्वं यथा स्यात्। अस्य खण्डनं कुर्वन् वक्ति यत् नास्ति प्रयोजनमेतत्। वक्ष्यत्येतत् सवर्णदीर्घत्वे ‘ऋति ॠ वा वचनम्’, ‘लृति लृ वा वचनम्’। तत्रा लृ वा वचनमित्यत्र दीर्घम् इत्यनुवर्तते। तत्रा लृतिशब्दे विकल्पितेऽप्राप्त एव पक्षे दीर्घो भविष्यति। स च भवन् लृवर्णस्य दीर्घाभावादृवर्णस्यान्तरतम्याद्दीर्घॠकारो भविष्यति। तत्सवर्णे यथा स्यात्। इह मा

भूद्-मध्वलृकार इति। यद्यविधाय सवर्णसंज्ञां तदुच्यतेऽग्मात्रस्य लृति तत्कार्यं स्याद् दध्य्लृकारेति। तस्माद्विधेया सवर्णसंज्ञा। ऋकारस्य ऋकार एव सवर्ण इति ऋत्येव भविष्यति। ततः ''लृति''। ऋत इत्येव। इदं चासवर्णार्थम्। तेन लृति रूपद्वयं सिद्धम्। तत्राासंहितायामृकारे होतृ ऋकार इति रूपम्। संहितायामपि ऋत्यक इति शाकलप्रकृतिभाव एतदेव रूपम्। शाकलाभावे होतृकारः होतृकार इति रूपद्वयम्। लृकारेऽसंहितायां संहितायां च शाकले होतृलृकार इति। शाकलाभावे होतृकारो होत्लृकारो इति रूपद्वयम्। तत्कथनस्यावश्यकता नास्ति द्वावप्येतौ दीर्घै ॠ ॡ इति। तत्रा ऋकारे कदाचिद् इति दीर्घ कदाचिदृ इति। लृकारेऽपि ॠ ॡ इत्येतौ भविष्यतः सत्यां सवर्णसंज्ञायामिति भावः। अर्धतृतीयमात्रत्वादिति केचिदाहुः। अन्ये तु ईषत्स्पृष्टकरणत्वादनयोः ऋकारलृकारयोश्च विवृतत्वात्ताभ्यां तयोरग्रहणादनच्त्वमाहुः। सत्यच्त्वे दीर्घसंज्ञानयोर्भविष्यति। येषां तु मतमर्धतृतीयमात्रावेताविति, तेषां मते सत्यप्यच्त्वे द्विमात्रत्वाभावादेतयोदीर्घसंज्ञा न प्राप्नोति। तस्माद्द्विमात्रावेतावभ्युपगन्तव्यौ। तच्चावश्यं वक्तव्यं। त्वयापि ॠवावचनम्, ॡवावचनमिति ब्रुवताऽच्त्वमनयोर्वक्तव्यम्। अन्यथा विधानमात्रमनयोः स्याद्, नाच्कार्यं प्लुतः। सति त्वच्त्वे ताभ्यां त्रिमात्रयोरपि सावर्ण्याद् ग्रहणे सति प्लुतसंज्ञा भविष्यतीति प्लुतसिद्धिः। एकैकस्मिन् संहितायां शाकलाभावपक्षे रूपद्वयं साध्यम्। तच्चोभयथापि सिध्यति। तत्रा सवर्णसंज्ञायामसत्यां यथा सिध्यति तथा पूर्वमेवोक्तम्। इह तु यथा सिध्यति तथोच्यते (अकः सवर्णेदीर्घः इत्यत्रान्तरतमत्वदीर्घत्वयोः उपादेयविशेषणयोः विवक्षितत्वादुभय-विशिष्टैकासम्भवाद्विकल्पः। यश्चान्तरतमो नासौ दीर्घो यश्च दीघी नासावन्तरतम इति।) द्वयोॠकारयो रेफद्वययुक्तत्वाद्विवृतत्वाच्च कदाचिद्रेफद्वययुक्त ॠ भवति कदाचिद्विवृत ॠ कारः। लृकारेऽपि कदाचिदृकारान्तरतम ॠकारः कदाचिद् लृकारान्तरतमलृकार इति साम्यमुभयोः पक्षयोः। यदि एवं तर्हि ऋकारग्रहणेन लृकारग्रहणं सन्निहितं भवति, अनेन ''उरण् रपरः'' इति सूत्रेण लृकारस्यापि रपरत्वं प्राप्नोति। तदा समाधानं करोत्याचार्यः यत् लृकारस्य लपरत्वं वक्ष्यामीति। तच्चावश्यं वक्तव्यं यतो हि असत्यां सवर्णसंज्ञायां विधानार्थम्। तदेव सत्यां रेफबाधनार्थं भविष्यति। यदि ऋकारेण लृकारोऽपि गृह्यते तर्हि ''रषाभ्यां णो नः समानपदे'' इति सूत्रे ऋकारस्य ग्रहणं कर्तव्यमिति एवं यदुक्तं मातृणां, पितृणाम् आदिषु णत्वविधानाय अधुना तदत्रापि प्राप्नोति-क्लृप्यमानं पश्य। यतो हि ऋकारेण लृकारग्रहणे सति लृकारस्य पश्चात् नकारस्यापि णत्वं भविष्यति। एवं तर्हि द्वयोः सवर्णसंज्ञा न भूते सति णत्वं कथन्न भवति? यतो हि अत्र रेफानन्तरं नकारः वर्तते। अतः 'कृत्यचः' इति सूत्रेण णत्वं भवितव्यम्। अस्याः शङ्कायाः समाधानं क्रियते यत् 'चुटुतुलशर्व्यवाये न' इत्युक्ते चवर्ग-टवर्ग-तवर्ग-ल-शषस-इत्येतेषां व्यवधाने रकारषकारात्परे नस्य णत्वं न भवतीति। क्लृप्यमानमित्यत्र लकारस्य व्यवधानकारणात् णत्वं न भवति। अन्ये आचार्याः कथयन्ति यत् ''त्रिभिश्च मध्यमे वर्गैर्लशसैश्च व्यवाये न'' इति वार्तिकेन मध्यस्थाः त्रयः वर्गाः- च-ट-तवर्गाः एवं ल-श-स-इत्येतेषां

व्यवधाने नकारस्य णत्वं न भविष्यति। एवं ते "षकारस्य व्यवधानं न स्वीकुर्वन्ति। अतः लृकारः इत्यस्मिन् यः 'ल्' इति एकदेशावयवो वर्तते एनमेव मत्वा 'क्लृप्यमानं पश्य' इत्यत्र नकारस्य णत्वं न भवति। यदि एवं स्यात्तर्हि ''रषाभ्यां णो नः समानपदे'' इति सूत्रे णत्वविधानस्य प्रसङ्गे ऋकारग्रहणस्य(ऋवर्णान्नस्य णत्वं वाच्यम् इत्यस्य) न कापि आवश्यकता वर्तते यतो हि वर्णानामेकदेशोऽपि वर्णानां ग्रहणेन गृहीतो भवति, अत एव ऋकारस्य एकदेशो यो रेफः तमेव मत्वा (मातृणाम्, पितृणाम् इत्यादिषु ऋकारघटितप्रयोगेषु) णत्वं भविष्यति। अतः निष्कर्षतः वक्तुं शक्यते यत् ऋकारलृकारयोः सवर्णसंज्ञा स्वीकर्तव्यः, एवं कार्यमिदं लघुभूतमपि वर्तते।

अतः एवं निष्कर्षतः भगवता भाष्यकारेण ''तुल्यास्यप्रयत्नं सवर्णम्'' इति प्रकृतसूत्रे समुत्पन्नानां दोषाणां समाधानं कुर्वन् सूत्रस्यास्य व्याख्यानं विहितम्। तेनोक्तांशमेव मया अत्र स्वकीयशोधपत्रे यथामतिः समीक्षितम्। इति श्रीकृष्णार्पणमस्तु।।

**संदर्भग्रन्थाः**


१. व्याकरणमहाभाष्यम्, प्रो.जयशंकरलालत्रिपाठी, चौखम्बा कृष्ण अकादमी, वाराणसी २००७

२. व्याकरणमहाभाष्यम्, डॉ.चारुदेवशास्त्री, चौखम्बासंस्कृतभवनम् वाराणसी, २००५

३. लघुसिद्धान्तकौमुदी, डॉ.सुरेन्द्रदेव शास्त्री, चौखम्बा ओरियण्टल दिल्ली, २०१०

४. वैयाकरणसिद्धान्तकौमुदी, श्रीगोपालदत्तपाण्डेय, चौखम्बासुरभारतीप्रकाशन, वाराणसी २०१०

५. वैयाकरणसिद्धान्तकौमुदी, श्रीगोविन्दाचार्य चौखम्बासुरभारतीप्रकाशन, वाराणसी, २०१६

# Science and Scientific Elements in Patañjali's *Mahābhāṣya*

**Richa Biswal**

Sanskrit is a beautiful and a wonderful language. It is also known as *Devabhāṣā* or *Devavāṇi* i.e. language of Gods. Sanskrit is appreciated for the perfection of its grammar and for the beauty of its poetry. We take it as a source of upliftment and enlightenment and as a sacred medium for expressing the highest spiritual truths and experiences. Ancient Sanskrit Texts, technically known as शास्त्रे-s, are a repository for scientific wisdom contained as a capsule. It is well said by Justice Markandeya Katju that "there is a misconception about Sanskrit language that it is only a language for chanting *mantras* in temples or religious ceremonies. More than 95 % of the Sanskrit literature has nothing to do with religion, and it deals with philosophy, law, science, literature and grammar etc.

Thus, Sanskrit in particular, was the language of our scientists in ancient India. Though, today it appears that we lack behind the western countries in the context of science but still the Knowledge of the great scientific achievements of our ancestors and our scientific heritage will encourage us and give us the moral strength to take India to the fore-front of science in the modern world once again. Hence, the fragrance of this wisdom needs to be spread far and wide. An attempt has been made in this paper in this direction.

The word Sanskrit means pure, refined, prepared or perfect. It was the language of our philosophers, scientists, mathematicians, poets and grammarians including our great sage Patatjali (150 BC). Patañjali is one of the three most famous Sanskrit grammarians (popularly known as *Trimuni*) of ancient India, the other two being Pāṇini and Kātyāyana who preceded Patañjali. In grammar, Pāṇini, the author of *Aṣṭādhyāyī* and Patañjali, the author of *Mahābhāṣya* (Mbh) have no equals in the world. The fact has been recorded in the following verses:

शास्त्रेष्वाद्यं व्याकरणं मुख्यं तत्रापि पाणिनेः।

रम्यं तत्र महाभाष्यं हृद्या तत्रापि पस्पशा।।

अष्टाध्यायी-महाभाष्ये द्वे व्याकरण-पुस्तके।
ततोऽन्यत् पुस्तकं यत्तु तत् सर्वं धूर्तचेष्टितम्।।

The *Mahābhāṣya* (2nd century B.C.) of Patañjali is a mix of grammar as well as philosophy of grammar. This is a monumental work in the tradition of Pāṇinian Grammar. Here Patañjali explains a large number of the *sūtras* (at least 1228) of Pāṇini and Kātyāyana's *Vārtikas*. The *Mahābhāṣya* is written in an extra-ordinary style which is lively, simple and animated. The language of *Mahābhāṣya* is lucid and elegant, presenting arguments in a conversational style remotely comparable to the dialogues of Plato. The *Mahābhāṣya* is divided into eight *adhyāyas* of four *pādas* each and each *pāda* is further sub-divided into minimum one and to maximum nine *āhnikas.* Thus in all, there are eighty five *āhnikas* in this text.

In fact, it is the first and oldest existing commentary on the *Aṣṭādhyāyī* of Panini. It has remained supremely authoritative and furnishes the last and final word in all cases of serious doubts raised in grammatical issues. In short, it is an encyclopaedic work which has been flooded with brilliant quotations, the number of which may even exceed to 700. Interestingly those quotations quoted in Patañjali's *Mahābhāṣya* are not confined to any particular subject. They cover almost all the areas existing around us. Sometimes they are related to our social, cultural, political, historical, geographical, philosophical, religious and spiritual issues and sometimes they are related to science and scientific issues. However, in the present paper, I will deal with science and scientific elements present in Patañjali's *Mahābhāṣya*.

**Science of Medicine** : Patañjali's knowledge of medicine can be clearly seen in the following statements of Mbh :

- दधित्रपुसं प्रत्यक्षो ज्वरः (The दधित्रपुस causes fever),
- नड्वलोदकं पादरोगः (The नड्वलोदक causes feet diseases),
- आयुर्वै घृतम्[१] (Ghee is treated as the life itself),
- मूत्राय कल्पते यवागूः। उच्चाराय कल्पते यवान्नम्[२] (The yav*ā*gu or rice gruel helps in urination)
- अतिसारो व्याधिः[३] (*Atisāra* or dysentery is a great disease)

- कृतश्मश्रुश्च पुनः श्मश्रूणि कारयति[४] (The shaved person shaves again)
- श्लेष्मघ्नं मधु ५ (The honey cures shleshma or phlegm)
- पित्तघ्नं घृतम्[६] (The ghee cures *pitta* or bile)

**Science of Animals (Zoology)** : Apart from the knowledge of medicine Patañjali also had a great knowledge of zoology. Zoology or animal biology is the branch of biology that studies the animal kingdom, including the structure, embryology, evolution, classification, habits and distribution of all animals, both living and extinct, and how they interact with their eco-system. In the following statements of *Mahābhāṣya* one can visualise some aspects of zoology when Patañjali says :

- मातृकं गोवोऽनुहरन्ते[७] (The cows inherit their mothers).
- पैतृकमश्वा अनुहरन्ते[८] (The horses inherit their fathers).
- व्याददते पिपीलिकाः पतङ्गमुखम्[९] (The ants enter to the mouth of insects)
- कपोतः शरदं पश्पशाते[१०] (The doves desire copulation in theAutumn).
- श्वानः खल्वपि मुमूर्षवः एकान्तशीलाः सूनाक्षाश्च[११] (The dogs nearing death prefer loneliness).
- गोषु कृष्णा बहुक्षीरा[१२] (The black cows give plenty of milk).
- गोमयाद् वृश्चिको जायते[१३] (The scorpios are born from the cow-dung)
- गोलोमाविलोमयोर्दुर्वा जायन्ते[१४] (The durva or cynodon dactylon grass generates from the furs of the cows).

**Science of Omen** : Patañjali also had the knowledge of the science of omen. An omen is an event or happening that one takes as sign of something to come. Omens generally get a bad rap, probably because, a lot of them predict bad stuff, at least according to superstition. But the interpretation of omens really depends on the country and culture. What is considered as an ominous sign in one place might mean a lifetime of good luck somewhere else. According to Oscar Wilde, "there is no such thing as an omen. Destiny does not send us heralds. She is too wise or cruel for that." Let us now see how Patanjali was a master of this science : जायाघ्नस्तिलकालकः पतिघ्नी पाणिलेखा[१५]. That means, the *tilakalaka* kills the wife and the *pāṇilekhā* (a line in the hands) kills the husband. However, these statements may not be applicable in univrsal contexts.

**Astrology** : Patañjali had the knowledge of Astrology also as he says :

**वाताय कपिला विद्युदातपायातिलोहिनी।**
**पीता भवति शस्याय दुर्भिक्षाय सिता भवेत्।।**[१६]

(If the lightning is tawny or reddish then it indicates storm, if the lightning is more red then it indicates sun, if the lightning is yellow then it indicates good crops, if the lightning is white then it indicates draught).

**Physics** : Similarly, Patañjali's knowledge of physics also can be witnessed in some of the statements of Mbh. For example, the theory of gravitation is an important issue in the field of physics. It is popularly known as Newton's law of universal gravitation.

Now let us see, what is the nature of Newton's law of universal gravitation. In 1687, English Mathematician Sir Isaac Newton published *Principia*, which hypothesizes the inverse-square law of universal gravitation. This law states that a particle attracts every other particle in the universe using a force that is directly proportional to the product of their masses and inversely proportional to the square of the distance between their centres. This is a general physical law. It is a part of classical mechanics and was formulated in Newton's work 'Philosophiae Naturalis *Principia Mathematica* (the Principia)', first published on $5^{th}$ July, 1687. When two objects of mass $m^1$ and $m^2$ are placed at a distance$^r$ from each other, there exists a force$^f$ known as gravitational force of acceleration.

In a simple terminology, it means that whenever we throw anything up it goes to a certain extent and then it automatically comes down. It never goes in any other direction. It is because the earth pulls it vertically down. It is widely said that when Newton was sitting under a tree, an apple fell on him. The fall of an apple prompted Newton to start thinking in this direction. He thought that it may be possible that the earth attracted the apple.

In Newton's words : "I deduced that the forces which keep the planets in their orbs must [be] reciprocally as the squares of their distances from the centres about which they revolve : and thereby compared the force requisite to keep the Moon in her Orb with the force of gravity at the surface of the Earth; and found them answer pretty nearly."

The equation is as follows : F = G x $m^1$ x $m^2$ èk $r^{2,}$ {\display style F=G{\frac {m_{1}m_{2}}{r^{2}}}\ }where *F* is the force of gravitational

attraction, $m_1$ and $m_2$ are the masses of the objects interacting, $r$ is the distance between the centres of the masses and $G$ is the gravitational constant.

**Explanation**: Every object in the universe attracts every other object with a force which is proportional to the product of their masses and inversely proportional to the square of the distance between them. The force is along the line joining the centres of two objects.

**Importance of the universal law of Gravitation**: The universal law of gravitation successfully explained several phenomena which were believed to be unconnected:

1. The force that binds us to the earth
2. The motion of the moon around the earth
3. The motion of planets around the sun
4. The tides due to the moon and the sun.

Thus, it is known to each and all that the law of Gravitation is propounded by Isaac Newton and he discovered this theory in 1687. But it may be known to quite a few that the law of gravitation is already described in Patañjali's *Mahābhāṣya* around 2000 years before Newton thought of it. According to the History of Sanskrit literature, Patañjali belonged to 150 B.C. and Newton belonged to a period between 1642 to 1726 AD which is around 2000 years after Patañjali.

Now let us examine how Patañjali explains this theory in his *Mahābhāṣya.* In fact, Patañjali talks about this concept under Pāṇini's rule स्थानेन्तरतमः (p.1.1.49). There is a famous rule '*iko yaṇ aci*' (P. 6.1.97) in *Aṣṭādhyāyī* which means *ik (इ, उ, ऋ, ऌ)* is to be substituted by *'yaṇ' (य, व, र, ल)* if followed by a vowel. Here a question may arise, which letter is to be substituted by what. What is the reason that इ is to be substituted by य and not by any other letter व, र or ल. Pāṇini says, it is because of *āntarya* i.e. *s*imilarity of place of articulation as suggested in his rule स्थानेन्तरतमः (p.1.1.49). Kātyāyana and Patañjali are of the opinion that this rule is not needed, because, it can be established from the *loka* or worldly behaviour itself. In this context, he gives several examples from animate and inanimate groups of objects. In case of the animate, he says, the calves sleep with their mother cows and not with others. Similarly, in case of inanimate things Patañjali explains in his *Mahābhāṣya* that if

thrown up the stone or any earthly object comes down as it comes to mix with earth and nothing else as they have common features in them. He says: अचेतनेष्वपि तद् यथा लोष्टः बाहुवेगं गत्वा नैव तीर्यग् गच्छति, नोर्ध्वमारोहति। पृथिवीविकारः पृथिवीमेव गच्छत्यान्तर्यतः इति[१७]. That means, whenever we throw something it always goes up to the extent the force used by the arms and then comes down only. It never goes to any other direction and neither it climbs up.

The commentators explain : यो यस्य गुरुतरसमुदायस्य अवयवः विकारो वा भवति स स्वभावतः एव केन्द्रस्थानं स्वगुरुतरसमुदायं प्रति आकृष्यते सादृश्यात्। तद् यथा पृथिव्या विकारः अवयवो वा लोष्टखण्डः वायुवेगे आकाशं प्रति क्षिप्तो नोच्चैरारोहति न वा तीर्यग् दिशि गच्छति अपितु स गुरुतरसमुदायस्य पृथिवीरूपस्य विकारः लघिष्ठः अवयवः इति हेतोः पृथिवीं प्रत्येव आगच्छति। इत्थमेव यः आदेशः यस्य स्थानिनः अन्तरतमः सदृशतमः तत्स्थाने स आदेशः अनायासं स्वयमायाति।

The above mentioned example is exactly the same as the theory of gravitation propounded by Newton. Similarly, he also gives other examples about water and light also : तथा या एता आन्तरीक्ष्यः सूक्ष्मा आपः तासां विकारो धूमः। स आकाशदेशे निवाते नैव तीर्यग् गच्छति नावागवरोहति। अब्विकारो अप एव गच्छन्त्यान्तर्यतः। तथा ज्योतिषो विकारोर्चिराकाशदेशे निवाते सुप्रज्वलितो नैव तीर्यग् गच्छति नावागवरोहति ज्योतिषो विकारो ज्योतिरेव गच्छन्त्यान्तर्यतः।[१९]

Thus, it was Patañjali and not Newton who gave this theory first. However, there is another view that this theory of gravitation was first of all described in the *Bṛhad Jābāla Upaniṣad* where gravitation is called *ādhāraśakti* and it has two parts :

- *Urdhvaga* : (to go up, e.g. the flame of fire always goes up) and
- *Nimnaga* : ( to come down, e.g. the Water always flows down).

According to this Upanishad, the whole world is running on this concept only. The text describes : *"Agni-somātmakam jagat"*[20] and *"ādhāra śaktyavadhritaḥ kalagnir yama urdhvagaḥ tathaiva nimnagaḥ somaḥ."*[21]

**Conclusion** : Patañjali and Newton both had the views that an object when thrown upwards reaches a certain height and then falls downwards. Patañjali has described about this concept of gravitation in the year 150 BC. So it can be considered that the theory of gravitation has

been first explained in *Mahābhāṣya* only.

Though we agree that Newton might not have studied Patañjali's *Mahābhāṣya* and the law of gravitation that he gave was his original idea but still this fact cannot be discarded that the first founder of gravitation was at least Patañjali if not Veda or *Bṛhad Jābāla Upaniṣad*. In fact, there are so many *mantras* in our Vedas which also explain the concept of gravitation. But due to the lack of knowledge of Sanskrit, people are not in a position to know such facts.

## Notes and References

1. *Mahābhāṣya (*Mbh.) 2.1.58, 6.1.32
2. Mbh. 2.3.13
3. Ibid 3.3.17
4. Ibid 1.1.586.1.127
5. Ibid 15 6-1-12
6. Ibid 15 6-1-12
7. Ibid 1.3.21
8. Ibid 1.3.21
9. Ibid 1.3.20
10. Ibid 7.3.87
11. Ibid 3.1.7
12. Ibid 4-3-42
13. Ibid 1.4.30
14. Ibid 1.4.30
15. Ibid Aahnika - 1
16. Ibid 2.3.13
17. Ibid on *Sthane'ntaratamaḥ* (P.1.1.49)
18. Commentaries like *Prad īpa, Udyota* etc. Mbh. on *Sthane'ntaratamaḥ* (P.1.1.49)
19. Mbh. on *Sthane'ntaratamaḥ* (P.1.1.49)
20. *Bṛhad Jābāla Upaniṣad* 2.4
21. Ibid 2.8

## Bibliography

1. *Pātañjalam Mahābhāṣyam*, Vol. 1., Pt. 1, Edited by Bal Shastri, Sagar University, Sagar, 1988

2. महाभाष्य of पतञ्जलि, Ed. by Kielhorn, Rev. Edn. K.V.Abhyankar, Bhandarkar Sanskrit Series, Poona,Vol.I (1962), II (1965), III (1972)

3. Mimamsaka Yudhisthira : संस्कृत व्याकरण का इतिहास, Part III, Ramlal Kapoor Trust, Haryana

4. Chakravarti, P. C. : The महाभाष्य अध्याय १, पाद १, आह्निक १ Introduction), The Indian Historically Quarterly, Vol.I, pp.703&739 Ed. by N. N. Law, Calcutta, 1925,

5. Chatterjee, K. C. : पतञ्जलि's महाभाष्य पस्पशाह्निक, Introductory chapter), Ed. with English Translation, Notes and comms. Revised Fourth Edn., Calcutta, 1972

6. A Dictionary of Sanskrit Grammar, Gaikwad Oriental Series, Oriental Institute, Baroda, 1977

7. महाभाष्यदीपिका of भर्तृहरि, Ed. K.V. Limaye, BORI, Series No.8, Poona, 1970

8. महाभाष्य of पतञ्जलि, with कैयट's प्रदीप and नागेश's उद्योत, Ed. B. B. Joshi, (Fifth Edn.), Bombay, 1951

# तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रस्य महाभाष्यदिशा न्यासान्तरसमीक्षणम्

**मलय पोडे**
सहायकाध्यापक:
राणीबाँध-सर्वकारीय-महाविद्यालय:

**1.1. उपोद्घात:** - "संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभि:" इति भणितिस्तु सुप्रसिद्धा एव। संस्कृताख्यां दैवीं वाचं समाश्रित्य प्रादुर्भूता या भारतीया शास्त्रधारा परम्परा च तस्या भगवन्नि:श्वसनसमुद्भूतो वेद: हि परमाधार:। वेदं समाश्रित्य तदुपकारकतया एव तन्मूलकानाम् अन्येषां शास्त्राणामाविर्भाव:। यथा पुरुषस्य उपकारकाणि भवन्ति तदङ्गानि तथैव वेदस्योपकारकभूतानां शास्त्राणां तदङ्गत्वं परिकल्पितम्।

वेदाङ्गेषु शब्दसाधुत्वनिष्पादकत्वेन भाषालम्बनत्वेन मुख्यं व्याकरणं मुखत्वेन परिकल्पितम्। विद्यमानेषु बहुषु व्याकरणेषु पाणिनीयव्याकरणं सकललौकिकालौकिक-शब्दनिष्पादक तया वेदमूलकतया च सर्वाणि अतिशय्य विराजते।

संस्कृतव्याकरणस्यानुपमरत्नस्वरूपमिदं व्याकरणमित्यत्र नास्ति कस्यचिद् विप्रतिपत्ति:। पाणिनीयव्याकरणम् इति नामश्रवणेनैव ज्ञायते यद् अस्य व्याकरणस्य परमाचार्यो महर्षि: पाणिनि:। व्याकरणस्यास्य त्रिमुनि व्याकरणम् इति नामान्तरम्। त्रयो मुनयो भवन्ति पाणिनि: कात्यायन: पतञ्जलिश्च। पाणिनिप्रणीतस्य सूत्रग्रन्थस्य अष्टाध्याय्या: समाश्रयणेन यद्यपि व्याकरणस्यास्य आविर्भाव: तथापि अस्मिन् व्याकरणे कात्यायनप्रणीतस्य वार्तिकग्रन्थस्य पतञ्जलिप्रणीतस्य महाभाष्यस्यापि अस्ति महत्त्वम्।

महाभाष्यकारेण अष्टाध्याय्या: सूत्रव्याख्यानावसरे सिद्धान्तप्रतिपादनाय काश्चन पद्धतय: समाश्रिता:। ता: सामान्यतो भवन्ति - प्रश्नोत्तरपद्धति:, आख्यानकपद्धति:, आक्षेपसमाधानपद्धति:, लौकिकदृष्टान्तपद्धति:, प्रत्याख्यानपद्धति: न्यासान्तरपद्धतिश्चेति।

तास्वन्यतमा भवति न्यासान्तरपद्धति:। न्यासो नाम सूत्रस्य विन्यास:। अन्यो न्यास: न्यासान्तरमिति मयूरव्यंसकादिसमास:। सूत्रस्यान्यथा विन्यासो भवति न्यासान्तरम्। एनां पद्धतिं समवलम्ब्य महामुनिना पतञ्जलिना बहुत्र लक्ष्ये अतिव्याप्त्यव्याप्त्य-सम्भवादिदोषनिरासेन सूत्रस्यादुष्टत्वं प्रतिष्ठापितम्। "तुल्यास्यप्रयत्नं सवर्णम्" इति सूत्रस्य व्याख्यानावसरे इयं पद्धति: भाष्यकारेण समाश्रिता। अस्मिन्निबन्धे सूत्रस्यास्य महाभाष्यदिशा

यः न्यासान्तरविचारः प्रस्तुतः स समीक्ष्यते।

**1.2 तुल्यास्य सूत्रार्थः** - अष्टाध्याय्याः प्रथमाध्यायस्य प्रथमपादस्य नवममिदं सूत्रम्। षड्विधेषु सूत्रेषु इदं संज्ञासूत्रम्। अनेन सवर्णसंज्ञा विधीयते। अस्मिन् सूत्रे पदद्वयमस्ति। तत्रा तुल्यास्यप्रयत्नमिति संज्ञि सवर्णमिति च संज्ञापदम्। आस्यं च प्रयत्नश्चेति विग्रहे इतरेतरद्वन्द्वसमासे आस्यप्रयत्नौ इति निष्पद्यते। तुल्यं तुल्यश्चेति तुल्यौ इतीतरेतरयोगद्वन्द्वः। तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नमिति बहुव्रीहिः। अत्र तु अन्यपदार्थो वर्णजालम्, तदनुरोधेन नपुंसके प्रयोगः। तुलया सम्मितमिति विग्रहे "नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्य-वध्यानाम्यसमसमितसम्मितेषु" (4. 4.91) इति सूत्रेण तुलाशब्दात् यत्प्रत्यये निष्पन्नः तुल्यशब्दः सदृशार्थे रूढः। अस्यन्ति प्रकाशन्ते वर्णा अनेनेत्यर्थे अस्यते ग्रासोऽस्मिन्नित्यर्थे वा क्षेप.ाार्थकाद् असुधातोः "॥ हलोर्ण्यत्" (3.1.124) इति सूत्रेण ण्यत्प्रत्यये आस्यमिति निष्पद्यते। आस्यं भवति मुखम्। तत्साम्यस्य सर्ववर्णेष्वविशिष्टत्वाद् आस्यशब्दस्य मुखपरकस्य नात्र ग्रहणम्। आस्ये भवमित्यर्थे "शरीरावयवाद्यत्" (5.1.6) इत्यनेन मुखबोधकाद् आस्यशब्दाद् यत्प्रत्यये आस्यशब्दो निष्पन्नः। आस्यं मुखस्थं ताल्वाद्युच्चारणस्थानम्। प्रकृष्टो यत्नः प्रयत्नः। अत्र व्याख्यानबलात् प्रयत्नशब्देन आभ्यन्तरयत्नस्यैव ग्रहणम्। एवं यस्य वर्णजालस्य वा वर्णद्वयस्य स्थानप्रयत्नौ तुल्यौ तस्य सवर्णसंज्ञा भवतीति सूत्रार्थः। अत एवोक्तं कौमुद्यां - "ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्।" इति।

देवालयः इति सवर्णस्योदाहरणम्। देव आलय इति स्थिते "अकः सवर्णे दीर्घः" (6.1.101) इति सूत्रेण अकः अकारस्य सवर्णे अचि आकारे परे पूर्वपरयोः स्थाने दीर्घैकादेशे आकारे देवालय इति रूपम्। अत्र अकारस्य आकारस्य कण्ठस्थानकत्वाद् विवृतप्रयत्नकत्वाच्च सूत्रेणानेन सवर्णसंज्ञा।

**1.3 न्यासान्तरपक्षविचारः**- एतत्सूत्रपदसार्थक्यवर्णनवेलायां न्यासान्तरं प्रस्तुतं महाभाष्ये भगवता पतञ्जलिना। तत्रा न्यासान्तरवाक्यमुक्तं - "सिद्धे त्वास्ये तुल्यदेशप्रयत्नं सवर्णम्" इति। एवं सूत्रस्य न्यासान्तरं भवति "आस्ये तुल्यदेशप्रयत्नं सवर्णम्" इति।

**1.3.1 न्यासान्तरस्वीकारहेतुः**- "तुल्यास्यप्रयत्नं सवर्णम्" (1.1.9) इति सूत्रे तुल्यास्यप्रयत्नमिति समस्तं पदम्। अत्र समासचतुष्टयस्य सम्भावना विद्यते - द्वन्द्वगर्भो बहव्रीहिः, त्रिपदो बहुव्रीहिः, तत्पुरुषगर्भबहुव्रीहिद्वयञ्च।

आस्यं च प्रयत्नश्च आस्यप्रयत्नौ इति इतरेतरद्वन्द्वसमासः। तुल्यौ आस्यप्रयत्नौ यस्य तत् तुल्यास्यप्रयत्नमिति द्वन्द्वगर्भबहुव्रीहिः इति प्रथमपक्षः। तुल्यशब्दस्य द्वन्द्वान्वितत्वात् द्वन्द्वघटकसर्वपदार्थान्वयः। एतेन "द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते" इति

नैयायिकवचनं न्यूनताग्रस्तत्वात् खण्डितमिति रत्नप्रकाशः।

तुल्य आस्ये प्रयत्नो यस्य तत् तुल्यास्यप्रयत्नमिति त्रिपदो व्यधिकरणपदो बहुव्रीहिः इति द्वितीयपक्षः।

तुल्यास्यशब्दयोस्तत्पुरुषस्ततो बहुव्रीहिरिति तत्पुरुषगर्भो बहुव्रीहिरिति तृतीयपक्षः। अत्र तुल्य आस्ये इति विग्रहे मयूरव्यंसकादेराकृतिगणत्वात् "मयूरव्यंसकादयश्च" (2. 1.72) इति सूत्रेण तत्पुरुषे तुल्यास्यशब्दो निष्पन्नः। ततः तुल्यास्यः प्रयत्नो यस्य तत् तुल्यास्यप्रयत्नमिति बहुव्रीहिः इति उद्योतनम्।

आस्यप्रयत्नशब्दयोः तत्पुरुषस्ततो बहुव्रीहिरिति चतुर्थपक्षः। तथाहि आस्ये प्रयत्न इति विग्रहे "साधनं कृता" इति वार्तिकेन "सप्तमी शौण्डैः" (2.1.40) इत्यत्र "सप्तमी" इति योगविभागाद्वा तत्पुरुषसमासः। ततः तुल्य आस्यप्रयत्नो यस्येति विग्रहे बहुव्रीहिसमासः।

एवं समासचतुष्टयं सम्भवति। तत्रा द्वन्द्वगर्भो बहुव्रीहिः इति पक्षे सूत्रार्थो भवति – आस्यं प्रयत्नश्च तुल्यं यस्य तस्य सवर्णसंज्ञा इति। अत एव महाभाष्ये भणितं – "तुल्यास्यं तुल्यप्रयत्नं च सवर्णसंज्ञं भवति।" इति।

द्वन्द्वगर्भबहुव्रीहिपक्षे "तुल्यास्यप्रयत्नं सर्वणम्" (1.1.9) इति सूत्रे आस्यपदविषये अस्ति विप्रतिपत्तिः। एक आस्यशब्दः कृदन्तो मुखपरकः स एव लौकिकः। अपरः तद्धितान्तः ताल्वादिस्थानपरकः। तत्रा न लौकिकस्य मुखपरकस्यास्यस्य न ग्रहणम्। लौकिकस्य मुखपरकस्य आस्यस्य ग्रहणे मुखे एव सर्वेषां वर्णानां निष्पत्तेः आस्यग्रहणं व्यर्थं भवतीति आशयेनाह पतञ्जलिः – "यदि हि लौकिकमास्यम्। किमास्योपादाने प्रयोजनं सर्वेषां हि तत्तुल्यं भवति।" इति।

यदि च आस्यग्रहणं प्रयत्नविशेषणमिति स्यात्तर्हि "आस्ये येषां तुल्यः प्रयत्नस्तेषां सवर्णसंज्ञा स्यात्।" इति सूत्रार्थः समायाति। तेन जबगडदानां सवर्णसंज्ञापत्तिः इति महान् दोषः समुद्भवतीति बोधनाय वार्तिकमाह – "सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसाम्यात्" इति।

जबगडदानां स्पर्शवर्णत्वात् तेषां प्रयत्नः स्पृष्टो भवति। एवमास्ये प्रयत्नस्य तुल्यत्वात् जबगडदानां सवर्णसंज्ञापत्तिः। आस्यञ्च प्रयत्नश्च आस्यप्रयत्नौ इति आस्यप्रयत्न-शब्दयोः द्वन्द्वपक्षस्वीकारे प्रयत्नविशेषणं नास्ति आस्यशब्दः। तस्मिन् पक्षे अपि जबगदानाम् उच्चारणस्थानस्य मुखस्य प्रयत्नस्य स्पृष्टस्य चैकत्वात्सावर्ण्यापत्तिरिति दोषः। तेन ऊर्ग्जः इत्यादौ "झरो झरि सवर्णे" (8.2.26) इति सूत्रेण गलोपः स्यात्।

तथाहि ऊर्ग् अन्नम्, तस्माज्जातः इति विग्रहे ऊर्ग्जः इति रूपम्। जकारगकारयोः आस्यप्रयत्नसाम्यात् सवर्णसंज्ञायां सत्यां "झरो झरि सवर्णे" (8.2.26) इति सूत्रेण हलः

रेफात्परस्य झरो गकारस्य सवर्णे झरि जकारे परे लोपः प्रसज्येत। स चानिष्टः। अतो वार्तिकव्याख्यायां भाष्यकृदाह – "सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः भवति – जबगडदशाम्। किं कारणम्। प्रयत्नसाम्यात्। एतेषां हि समानः प्रयत्नः।" इति।

ऊष्मणः शकारस्य विवृतप्रयत्नः, अतः जबगडदशामित्यत्र जबगडदानामिति तात्पर्यमिति कैयटः। अत आह प्रदीपे –

"भाष्ये शकारः प्रत्याहारपाठवशात्पठितः। अत्र प्रत्याहारे – जबगडादानां प्राप्नोतीत्यर्थः। शकारस्य तु विवृतत्वात्स्पर्शानां स्पृष्टत्वादप्रसङ्ग एव।" इति।

**1.3.2 न्यासान्तरपक्षः** एवं जबगडदानां सवर्णसंज्ञापत्तिदोषवारणाय महाभाष्ये न्यासान्तरपरकं वार्तिकं प्रस्तुतं – "सिद्धे त्वास्ये तुल्यदेशप्रयत्नं सवर्णम्" इति।

एतस्य वार्तिकस्य तात्पर्यं भवति "तुल्यास्यप्रयत्नं सवर्णम्" (1.1.9) इति सूत्रस्य स्थाने "आस्ये तुल्यदेशप्रयत्नं सवर्णम्" इति सूत्रन्यासः करणीयः। देशश्च प्रयत्नश्चेति देशप्रयत्नौ इतीतरेतरद्वन्द्वसमासः। तुल्यौ देशप्रयत्नौ यस्य तत् तुल्यदेशप्रयत्नमिति बहुव्रीहिसमासः। एवम् आस्ये मुखे ययोः येषां वा तुल्यो देशः प्रयत्नश्च तयोस्तेषां वा सवर्णसंज्ञा भवति। अत्र देशपदेन ताल्वाद्युच्चारणस्थानानां ग्रहणं भवति। एवं येषां वर्णानां आस्ये मुखे देशः ताल्वाद्युच्चारणस्थानं प्रयत्नश्च तुल्यं तेषां सवर्णसंज्ञा भवति। अर्थाद् आस्ये येषां तुल्यः देशः प्रयत्नश्च ते सवर्णसंज्ञाः स्युरिति न्यासान्तरार्थः फलति। तथाह्युक्तं वार्तिकव्याख्याने भाष्यकृता – "आस्ये येषां तुल्यो देशः प्रयत्नश्च ते सवर्णसंज्ञा भवन्तीति वक्तव्यम्।" इति।

जकारस्य तालु, बकारस्य ओष्ठौ, गकारस्य कण्ठः, दकारस्य च दन्ताः उच्चारणस्थानानि। एवमास्ये जबगडादानां स्पृष्टप्रयत्नस्य तुल्यत्वेऽपि उच्चारणस्थानानां भिन्नत्वान्नास्ति तेषां सवर्णसंज्ञा–प्राप्तिः। तेन ऊर्ग्ज इत्यादौ नास्ति दोष इति न्यासान्तरालम्बनेन सवर्णसंज्ञातिव्याप्तिप्रसङ्गो निराकृतः।

तदापि आस्यपदं वस्तुतो न सार्थकं तस्य सर्वेषु वर्णेषु समत्वादिति पूर्वपक्षः। तत्रा समाधानमुक्तं यद् आस्यपदं प्रयत्नविशेषणम्। अत्र प्रयत्नशब्दः सामान्ययत्नपरकः। तस्मात् प्रयत्नशब्देनाभ्यन्तरप्रयत्नस्य बाह्यप्रयत्नस्य च ग्रहणं भवति। आस्यस्य प्रयत्नविशेषणत्वाद् आस्याद्बाह्या ये प्रयत्ना विवारादयो बाह्ययत्नाः सन्ति ते निराकृता भवन्ति आभ्यन्तरयत्नाश्च प्रयत्नशब्देन गृहीता भवन्ति। तथाह्युक्तं महाभाष्ये – "प्रयत्नविशेषणमास्योपादानम्। सन्ति ह्यास्याद् बाह्याः प्रयत्नाः। ते हापिता भवन्ति। तेषु सत्स्वसत्स्वपि सवर्णसंज्ञा सिद्धा भवति।" इति।

के आभ्यन्तरप्रयत्ना इति चेदुच्यन्ते आस्यान्तर्गतस्थानेषु जिह्वाग्रादीनां वर्णाभिव्यक्तिजनकस्पर्शेषत्स्पर्शदूरावस्थानसमीपावस्थानरूपाभ्यन्तरकार्यकारिणः ये ते

स्पृष्टेषत्स्पृष्टविवृतसंवृतरूपा आभ्यन्तरप्रयत्ना भवन्ति। तेषां हि आस्यान्तर्गतत्वम् आस्यान्तर्गततत्तत्स्थानेषु वायुसंयोजकत्वेन सिध्यति इति उद्योतटीकायां नागेशस्याशयः।

आस्याद्बाह्या यत्ना भवन्ति–विवारः संवारः श्वासः नादः घोषः अघोषः अल्पप्राणः महाप्राणश्चेति। तेषामास्याद्बाह्यत्वाद् व्यावर्तनं भवतीति आस्यपदं सार्थकमिति नाास्ति दोषः।

एवं शङ्कायाः समाधाने सत्यपि पुनः अन्या एका शङ्का समुदेति यद् आस्यं हि ओष्ठातप्रभृति–काकलकात्प्राग् भवति। अवर्णस्य चोच्चारणस्थानं काकलकाद् अधस्तादुपजत्रुस्थानमिति केषाञ्चिन्मतम्। एवमास्याद्बाह्यत्वाद् अवर्णोच्चारणस्थानस्य अवर्णस्य सवर्णसंज्ञा न स्यादिति दोषः। तथाह्युक्तं महाभाष्ये – "एवमप्यवर्णस्य सवर्णसंज्ञा न प्राप्नोति। किं कारणम्। बाह्यं ह्यास्यात्स्थानमवर्णस्य।" इति।

अवर्णनिष्पत्तौ सर्वमेव मुखं व्याप्रियते इति अवर्णस्योच्चारणस्थानं मुखमिति स्वीकारे आस्याद्बाह्यत्वाभावात् सिध्यति अवर्णस्य सवर्णसंज्ञा। एवं सम्पूर्णमुखस्थान-कत्वस्वीकारे दोषः समाहितो भवति।

एवमवर्णस्य सम्पूर्णमास्यमेव देश उच्चारणस्थानम्, न तु आस्ये देश उच्चारणस्थानमस्ति। अतः आस्ये येषां तुल्यो देशः इति व्यपदेशस्तु न शक्यते इति शङ्का समुद्भवति। अत्र च समाधानं प्रोक्तं भाष्ये – "व्यपदेशिवद्भावेन व्यपदेशो भवति।" इति।

अर्थाद् "व्यपदेशिवदेकस्मिन्" इति परिभाषया व्यपदेशः सिध्यति। कैयटमते तु अत्र बुद्धिकृतभेदाश्रयो व्यपदेशः। सम्पूर्णं मुखम् आस्यशब्देनोच्यते, विशिष्टवर्णोत्पादनहेतुः मुखस्य विशिष्टांशो देशशब्देनोच्यते। तथाह्युक्तं प्रदीपे – "सर्वावस्थायुक्तमास्यम् आस्यशब्देन उच्यते, देशशब्देन तु विशिष्टैवावस्था वर्णोत्पादनहेतुः। तत्रा बुद्धिकृतभेदाश्रयो व्यपदेशः।" इति।

प्रदीपव्याख्यानरत्नप्रकाशकारः कैयटमतं न पुष्णाति। तन्मते "आद्यन्तवदेकस्मिन्" (1.1.21) इति सूत्रगतवार्तिकाभिप्रायेण अभेदे भेदव्यपदेशो भवति। एवं स्वत एवाभेदे भेदव्यपदेशे सिद्धे तस्य व्युत्पादनक्लेशः अयुक्तः। अत कैयटमतं व्यर्थम्।

एवञ्च "आस्ये तुल्यदेशप्रयत्नं सवर्णम्" इति न्यासः नास्ति दुष्टः। किञ्च, एवं न्यासे "सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसाम्यात्" इति वार्तिकोक्तः ऊर्ग्जः इत्यादौ दोषोऽपि निराकृतो भवति।

**1.4 सूत्रपक्षविचारः** – "आस्ये तुल्यदेशप्रयत्नं सवर्णम्" इति न्यासान्तरेण दोषनिवारणं तु भवति परन्तु अन्यदोषाभावे सत्यपि सूत्रभेददोषो भवति। तदेव आक्षिप्याह भाष्ये – "सिध्यति। सूत्रं तर्हि भिद्यते।" इति। एवं न्यासान्तरस्वीकारे

पाणिनीयसूत्रमेव त्यक्तमिति दोषः सम्भवतीति महाभाष्यकृत आशयः। अतः "तुल्यास्यप्रयत्नं सवर्णम्" (1.1.9) इति सूत्रं समादृतं महाभाष्ये।

**1.4.1 सूत्रपक्षे दोषनिरासः** यथान्यासपक्षे स्वीक्रियमाणे "सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसाम्याद्" इति वार्तिकेन ऊर्ग्जः इत्यादौ यो दोषः प्रोक्तः स तु तिष्ठतीति आक्षेप्तारः समाक्षिपन्ति। अस्याक्षेपस्य भाष्यकारेण समाधानं विहितम्।

आस्यशब्दो हि द्विविधः एकः कृदन्तो मुखपरको द्वितीयश्च तद्धितान्तो मुखस्थताल्वादिस्थानादिपरकः। अस्यन्ति अनेन वर्णान् इति अन्नमास्यन्दते इति वा विग्रहे 'असु क्षेपणे' इति धातोः "ऋहलोर्ण्यत्" (3.1.124) इति सूत्रेण ण्यति निष्पन्न आस्यशब्दो मुखपरकः। तस्य मुखार्थे रूढस्यास्यशब्दस्य नात्र सूत्रे ग्रहणम्, अपि तु द्वितीयस्य तद्धितान्तस्य मुखस्थताल्वाद्युच्चारणस्थानपरकस्य आस्यशब्दस्य अत्र ग्रहणं क्रियते। तथाहि आस्ये भवमिति विग्रहे "शरीरावयवाद्यत्" (5.1.6) इति सूत्रेण यत्प्रत्यये प्रक्रियाकार्ये आस्यशब्दो निष्पद्यते। एवञ्च आस्यशब्दार्थ आस्ये भवं निष्पन्नमिति। आस्ये निष्पन्नं भवति स्थानं करणञ्च। स्थानं ताल्वाद्युच्चारणस्थानं करणं च आभ्यन्तरप्रयत्नः। अत एवोक्तं महाभाष्ये - "नैष दोषः। न हि लौकिकमास्यम्। किं तर्हि? तद्धितान्तमास्यम्। आस्ये भवम् आस्यम्, "शरीरावयवाद्यत्"। किं पुनरास्ये भवम्? स्थानं करणं च।" इति।

अत्र प्रश्नः समुदेति तद्धितान्तास्यपदेन आभ्यन्तरयत्नात्मकस्य करणस्य बोधात् पुनः सूत्रे प्रयत्नग्रहणस्य किं प्रयोजनमिति। यद्यपि आस्यशब्देनैव स्थानस्य प्रयत्नस्य च ग्रहणं भवति तथापि पृथग्ग्रहणं प्रत्येकं व्यापारनिरासाय। अर्थाद् एकैकं स्थानमादाय प्रयत्नमादाय वा सवर्णसंज्ञा यथा न स्याद्, उभयोस्तुल्यत्वे एव सवर्णसंज्ञा स्यादिति कैयटरत्नप्रकाशकारयोर्मतम्। नागेशमते तु प्रयत्नपदबलाद् आस्यशब्देन स्थानस्यैव ग्रहणम्।

**1.4.2 सूत्रपक्षे सूत्रार्थविचारः**- एवं च सूत्राथी भवति - "ताल्वादिस्थानं प्रयत्नश्च यस्य वर्णजालस्य तुल्यं तस्य वर्णजालस्य सवर्णसंज्ञा स्यात्।" इति।

अत्र पुनर्दोषः समुदेति। पूर्वं मुखपरकस्यास्यशब्दस्य प्रयत्नविशेषणत्वं स्वीकृतं तेन मुखस्थानां स्पृष्टाद्याभ्यन्तरयत्नानामेव प्रयत्नशब्देन ग्रहणमासीत्। परन्तु इदानीमास्यशब्दः तद्धितान्तः ताल्वादिस्थानपरकः, न च स प्रयत्नविशेषणम्। एवं प्रयत्नशब्देन मुखबाह्यानां विवारादीनां बाह्ययत्नानामपि ग्रहणं भवति। तेन शकारादिना छकारादेः सावर्ण्यापत्तिदोषः। तथाहि शकारछकारयोः उच्चारणस्थानं तालु-बाह्ययत्नाश्च श्वासाघोषविवारमहाप्राणाः। एवं शकारछकारयोः उच्चारणस्थानबाह्ययत्नसाम्यात् सवर्णसंज्ञापत्तिः स्यात्। एतदेव ध्वनयन्नाह - "एवमपि प्रयत्नः अविशेषितो भवति।" इति।

अत्र समाधानमस्ति यत्प्रयत्नशब्देन न हि सामान्ययत्नो बुध्यते अपि तु आभ्यन्तरयत्न

एव बुध्यते। कथमिति जिज्ञासायामुच्यते प्रयत्नो नाम प्रारम्भो यत्नस्येति न तु प्रयतनं प्रयत्न इति। प्रारम्भो यत्नस्य इत्यत्र यत्नस्येति निर्धारणे षष्ठी। अत्र एकवचनं च जातिपरकम्। प्रारभ्यते इति विग्रहे प्रपूर्वकाद् आङ्-पूर्वकाद् रभ्-धातोः बाहुलकात् कर्मणि घञा प्रारम्भशब्दो निष्पन्नः। अत्र प्रशब्देन प्राथम्यं द्योत्यते। एवं प्रारम्भ इत्यस्यार्थः प्रथमम् आरभ्यमाण इति। अत्र प्राथम्यं च वर्णोत्पत्त्यव्यवहितप्राग्भावित्वरूपम्। एवञ्च यत्नानां मध्ये वर्णोत्पत्तेः पूर्वमारभ्यमाणो भवति प्रयत्नः। अथवा प्रारभ्यते वर्णाभिव्यक्तिर्येन इति विग्रहे प्रपूर्वकाद् आङ्-पूर्वकाद् रभ्-धातोः बाहुलकात् करणे घञ्प्रत्यये प्रारम्भशब्दो निष्पन्नः। तेन यत्नानां मध्ये यः प्रारम्भ आद्यः वर्णोत्पत्त्यव्यवहितपूर्वकालिकः स प्रयत्न इति। विषयेऽस्मिन् महाभाष्ये प्रोक्तं – "न हि प्रयतनं प्रयत्नः। किं तर्हि प्रारम्भो यत्नस्य प्रयत्नः।" इति।

यत्नो हि द्विविध आभ्यन्तरो बाह्यश्च। तथाहि शब्दप्रयोगेच्छया उत्पन्नेन मनोऽभिहतकायाग्निना प्रेरितो वायुः वेगात् मूर्धानमधिगच्छति। ततः मूर्धानमभिहत्य प्रतिनिवृत्तो वायुः यत्नविशेषसहायेन वर्णोच्चारणस्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तानि स्थानानि आहत्य वर्णानभिव्यनक्ति। ततः परं स यत्नविशेषसाहाय्यमवाप्य परावृत्तिकाले गलविवारादीन् विकासयति। तत्रो ये यत्ना आस्यान्तर्गतोच्चारणस्थानाभिघातकास्ते आस्यान्तर्गतकार्यकारित्वाद् आभ्यन्तरा इत्युच्यन्ते। ये यत्ना गलविवारादिविकासकास्ते बाह्या भवन्ति। यत्नेषु आद्यत्वाद् आभ्यन्तरयत्ना एव अत्र प्रारम्भपदवाच्याः।

कैयटेनास्मिन् विषये उक्तं प्रदीपे – "तत्र पूर्वं स्पृष्टतादयश्चत्वारः। पश्चान्मूर्धनि प्रतिहते निवृत्ते प्राणाख्ये वायौ विवारादयो बाह्या एकादश प्रयत्ना उत्पद्यन्ते।" इति।

पूर्वमिति वर्णोत्पत्तेः पूर्वं स्पृष्टेषत्स्पृष्टविवृतसंवृताख्याः चत्वार आभ्यन्तरयत्ना उत्पद्यन्ते। निवृत्ते प्राणाख्ये वायौ विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः स्वरितश्चेति बाह्या एकादश उत्पद्यन्ते इति कैयटतात्पर्यम्।

आभ्यन्तरयत्नानां चातुर्विध्यं नाङ्गीकरोति रत्नप्रकाशकारः। तस्य मते आभ्यन्तर-यत्नाः स्पृष्ट ईषत्स्पृष्टः संवृतः विवृतः विवृततरः विवृततमश्चेति षट् सन्ति। तथाहि गदितं तेन-

"यत्तूक्तम् आभ्यन्तराश्चत्वारो यत्ना बाह्या एकादश इति तन्न, षण्णामाभ्यन्तराणां द्वादशानां बाह्यानां च भाष्यकृतः सम्मतत्वात्। प्रकृतभाष्ये चतुर्णामेव बाह्यानामुत्तरसूत्रे चतुर्णामाभ्यन्तराणां साक्षाद्दर्शितत्वेऽपि प्रदेशान्तरे अत्रानुपात्तप्रयत्नेन द्विविधेन भगवतैव व्यवहृतत्वात्, युक्तिसहत्वाच्च।" इति।

महाभाष्यकृन्मते स्पृष्टेषत्स्पृष्टविवृतेषद्विवृतविवृततरविवृततमसंवृताख्याः सप्त

आभ्यन्तरप्रयत्ना इति छायाटीकाकृतो वैद्यनाथपायगुण्डेमहोदयस्याशयः।

एवं च "तुल्यास्यप्रयत्नं सवर्णम्" (1.1.9) इति सूत्रस्याथी भवति - "यस्य ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च तुल्यं तस्य वर्णजालस्य सवर्णसंज्ञा।" इति।

एकार ओकारश्च सन्ध्यक्षरमस्ति। तत्रा एकारे ओकारे च पूर्वभागः अस्ति अकारः। तत्रा प्रथमभागेनाकारेण सह अकारस्य सावर्ण्यम् आपद्यते उभयोरेव कण्ठस्थानकत्वाद् विवृतप्रयत्नकत्वाच्च। एवञ्च प्रारम्भो यत्नस्येत्युच्यमाने सत्यपि अकारस्य एकारस्य अकारस्य ओकारस्य च सावर्ण्यापत्तिदोषः समुदेति। अस्याः शङ्कायाः समाधानं तावत् सन्ध्यक्षरे एकारे ओकारे च पांसूदकवत् प्रश्लिष्टः अकारः। यथा पङ्कस्योदकस्य च संमिश्रणं यदि जायते तदा तयोः अयं पङ्कः इदमुदकम् इति भागविवेकः कर्तुं न शक्यते तथैव प्रश्लिष्टवर्णेषु अयमकार अयमिकार अयमुकार इति भागविवेकः कर्तुमशक्यः। अत एकारे अकारस्य भिन्नतया अननुभवात् प्रश्लिष्टस्याकारस्य अकारेण सह सावर्ण्यं कल्पयितुमशक्यमिति नास्ति अकारैकारयोः सावर्ण्यम्।

परन्तु ऐकारे हि अत्वादिरूपेण अकारादेरुपलब्धत्वाद् ऐचोः सावर्ण्यापत्तिशङ्का समुदेति। तेन हरे ऐ इत्यादौ "एङः पदान्तादति" (6.1.109) इत्यनेन पदान्ताद् एकारात् परस्य ऐकारस्य पूर्वरूपापत्तिदोषः। एषा हि शङ्का समुदिता यत्किञ्चित्स्थान-साम्यमादाय सवर्णसंज्ञाभिप्रायेण। एतद्दोषनिवारणाय भाष्ये उक्तं - "नैतौ तुल्यस्थानौ।" इति।

अर्थात् सवर्णसंज्ञायां यावत्स्थानसाम्यं विवक्षितमिति भाष्यकारस्य मतम्। यावत्स्थानसाम्यं नाम येषां वर्णानां ययोर्वर्णयोर्वा सवर्णसंज्ञा भवति तयोस्तेषां वा उच्चारणस्थानमेकमेव स्यात्, न तु किञ्चिदपि भिन्नम्। अत्र अकारस्योच्चारणस्थानं कण्ठः ऐकारस्य औकारस्य च कण्ठतालु। एवमुच्चारणस्थानविभेदात् नास्ति ऐकाराकारयोः औकाराकारयोश्च सवर्णसंज्ञापत्तिः।

यावत्स्थानसाम्यविवक्षायां "तोर्लि" (8.4.60) इति सूत्रेण परसवर्णरहितः तद्वान् आसामिति निर्देशः प्रमाणम्। तद्वान् इत्यत्र दकारस्योच्चारणस्थानं दन्तः, वकारस्य चोच्चारणस्थानं दन्तोष्ठम्। यत्किञ्चित्स्थानसाम्यमादाय सवर्णसंज्ञा भवति चेद् वकारलकारयोः सवर्णसंज्ञा सिध्यति। वकारस्योच्चारणस्थानं दन्तोष्ठं लकारस्य च दन्तः। एवं द्वयोर्वर्णयोः ईषत्स्पृष्टप्रयत्नकत्वात् दन्तरूपयत्किञ्चित्स्थानसाम्यत्वाच्च सवर्णापत्तिः। तेन तद् वान् इति स्थिते "तोर्लि" (8।4।60) इति सूत्रेण लकारे इव वकारे परे दकारस्य परसवर्णापत्तिः स्यात्। एवं तद्वान् इत्यत्र परसवर्णाभावो ज्ञापयति सवर्णसंज्ञायां यावत्स्थानसाम्यं विवक्षितं न तु यत्किञ्चित्स्थानसाम्यम्।

एवं "सवर्णसंज्ञायां भिन्नदेशेष्वतिप्रसङ्गः प्रयत्नसाम्यात्" इति यो दोषः प्रदत्तः स

यथान्याससूत्रस्वीकारेऽपि न भवति। ऊर्ग् अन्नम्, तस्माज्जातः इति विग्रहे ऊर्ग्जशब्दो निष्पन्नः। सूत्रे आस्यशब्देनोच्चारणस्थानस्य स्वीकारान्न गकारजकारयोः सवर्णसंज्ञा। गकारजकारयोः यथाक्रमम् उच्चारणस्थानं कण्ठः तालु च। एवं गकारजकारयोः सावर्ण्याभावाद् ऊर्ग्जः इत्यादौ "झरो झरि सवर्णे" (8.4.65) इति सूत्रेण झरि जकारे परे झरो गकारस्य लोपो न भवति। एवं नास्ति भिन्नदेशेष्वतिप्रसङ्गः सवर्णसंज्ञायाम्।

एवं "तुल्यास्यप्रयत्नं सवर्णम्" (1.1.9) इति सूत्रपक्षे नास्ति दोषः।

**1.5 समीक्षणम्** - अस्मिन् प्रबन्धे आदौ सूत्रार्थं सामान्यतया समुपस्थाप्य महाभाष्यदिशा अस्य सूत्रस्य स्थाने प्रस्तुतस्य "आस्ये तुल्यदेशप्रयत्नं सवर्णम्" इति न्यासान्तरस्य विचारो विहितः। वस्तुतस्तु आस्यप्रयत्नशब्दयोः अर्थनिर्णयवेलायामेव एतस्य न्यासान्तरस्याविर्भावः। अत आदौ अस्यन्त्यनेन वर्णान् इति विग्रहे आस्यशब्देन लोके प्रसिद्धं मुखमेव स्वीकृतम्। प्रपूर्वकाद् यततेः भावे नङा निष्पन्नेन प्रयत्नशब्देन च आभ्यन्तरबाह्यानां समेषामेव वर्णाभिव्यक्तिसहकारिणां यत्नानां ग्रहणं कृतम्। ततः जबगडदानां आस्यरूपतुल्यस्थानकत्वात् स्पृष्टाभ्यन्तरप्रयत्नकत्वाच्च सवर्णसंज्ञापत्तिदोषः प्रकल्पितः।

अस्मिन्नेव पक्षे दोषनिवारणाय न्यासान्तरस्य समुद्भवः। वस्तुतः सिद्धान्तमजानन् एव आक्षेप्ता एवं न्यासान्तरं कल्पयति। तत सूत्रपक्षसमर्थनं भाष्यकारेण कृतम्। तत्रा आस्यप्रयत्नशब्दयोः सूत्राभिप्रेतः निर्दुष्टः अर्थः परिकल्पितः। आस्यं भवति आस्ये भवं ताल्वाद्युच्चारणस्थानम्। प्रयत्नश्च यत्नेषु वर्णोत्पत्तेः अव्यवहितपूर्वकालिकः आभ्यन्तरयत्नः।

आस्यशब्दस्य ताल्वाद्युच्चारणस्थानपरकत्वे प्रयत्नशब्दस्याभ्यन्तरयत्नपरकत्वे सूत्रेणेष्टसिद्धिः। आस्यशब्दस्य मुखपरकत्वे प्रयत्नशब्दस्य आभ्यन्तरबाह्योभयपरकत्वे दोषराहित्याद् न्यासान्तरेणेष्टसिद्धिः।

परन्तु न्यासान्तरपक्षे सूत्रभेदरूपदोषो भवति। पाणिनिकृतस्य सूत्रस्य त्यागो भवतीति दोषः। सूत्रस्य न केवलं दृष्टफलकत्वं तद् अदृष्टमपि जनयति। "छन्दोवत्सूत्राणि भवन्ति" इति भाष्योक्तेः वेदाध्ययनवद् अध्ययनेन पुण्यात्मकम् अदृष्टफलमस्त्येव। अतः "आस्ये तुल्यदेशप्रयत्नं सवर्णम्" इति न्यासान्तरस्यापेक्षया "तुल्यास्यप्रयत्नं सवर्णम्" (1.1.9) इति सूत्रमेव समीचीनम्। एवं महाभाष्योक्तः न्यासान्तरप्रसङ्गः आस्यप्रयत्नशब्दयोः सूत्राभिमतार्थनिर्णयपरक एव न तु सूत्रस्य वैकल्पिकत्वोपस्थापक इत्यलं पल्लवितेनेति शिवम्।

**सन्दर्भाः**

१. व्याकरणमहाभाष्यम्, -1, पृ. 239

२. महाभाष्यप्रदीपव्याख्यानानि, - 1, पृ. 364 (रत्नप्रकाशः)

३. व्याकरणमहाभाष्यम्, - 1, पृ 239 (छाया)

४. महाभाष्यप्रदीपव्याख्यानानि, - 1, पृ 364 (उद्योतनम्)

५. त्रैव, पृ 364 (उद्योतनम्)

६. व्याकरणमहाभाष्यम्, - 1, पृ. 239

७. किमास्योपादान इति। आस्य एव सर्ववर्णानां निष्पादादिति भावः - तत्रौव, पृ. 240 (प्रदीपः)

८. तत्रौव, पृ. 240

९. तत्रौव, पृ. 241 (आक्षेपवार्तिकम्)

१०. ततश्च ऊर्ग्ज इत्यादौ झरो झरीति लोपप्रसङ्गः - तत्रौव, पृ 241 (प्रदीपः)

११. तत्रौव, पृ. 241

१२. तत्रौव, पृ. 241 (प्रदीपः)

१३. तत्रौव, पृ. 241 (न्यासान्तरेण समाधानवार्तिकम्)

१४. तत्रौव, पृ. 241

१५. एवमपि किमास्योपादाने प्रयोजनम्, सर्वेषां हि तत्तुल्यम्- तत्रौव, पृ. 241

१६. तत्रौव, पृ. 242

१७. तत्रौव, पृ. 242 (उद्योतः)

१८. तत्रौव, पृ. 242

१९. काकलस्याधस्तादुपजत्रुस्थानमवर्णस्यैक इच्छन्ति - तत्रौव, पृ. 243 (प्रदीपः)

२०. तत्रौव, पृ. 243

२१. तत्रौव, पृ. 244

२२. तत्रौव, पृ. 244 (प्रदीपः)

२३. महाभाष्यप्रदीपव्याख्यानानि, -1, पृ. 372 (रत्नप्रकाशः)

२४. यद्यपि सिध्यति तर्हि तथापि सूत्रभेदो भवतीत्यर्थः। - व्याकरणमहाभाष्यम्, - 1, पृ. 244 (छाया)

२५. तादृशन्यासे पाणिनिकृतं सूत्रं त्यक्तमेवेति स एव दोष इति भावः।- महाभाष्यप्रदीपव्याख्यानानि, - 1, पृ. 373 (रत्नप्रकाशः)

२६. व्या. म., - 1, पृ. 244

२७. तत्रौव, पृ. 244

२८. करणमिति। स्पृष्टतादि जिह्वाया अग्रोपाग्रमध्यमूलानि वा - तत्रौव, पृ. 244 (प्रदीपः)

२९. तत्रौव, पृ. 244

३०. तत्रौव, पृ. 244 (प्रदीपः)

३१. महाभाष्यप्रदीपव्याख्यानानि, ख. 1, पृ. 373 (रत्नप्रकाशः)
३२. व्याकरणमहाभाष्यम्,- 1, पृ. 244 (उद्योतः)
३३. तत्रौव, पृ. 244
३४. तत्रौव, पृ. 245 (उद्योतः)
३५. महाभाष्यप्रदीपव्याख्यानानि, - 1, पृ. 373 (रत्नप्रकाशः)
३६. व्याकरणमहाभाष्यम्, - 1, पृ. 244
३७. तत्रौव, पृ. 245 (उद्योतः)
३८. तत्रौव, पृ. 244 (प्रदीपः)
३९. महाभाष्यप्रदीपव्याख्यानानि, - 1, पृ. 373 (रत्नप्रकाशः)
४०. व्याकरणमहाभाष्यम्, - 1, पृ. 244 (छाया)
४१. यदि प्रारम्भो यत्नस्य प्रयत्नः, एवमप्यवर्णस्य एङोश्च सवर्णसंज्ञा प्राप्नोति - तत्रौव, पृ. 245
४२. ततश्च तदननुभवेन केवलताल्वादिस्थानकत्वेन न तयोः सावर्ण्यप्राप्तिरिति भावः - तत्रौव, पृ. 245 (उद्योतः)
४३. यत्किञ्चित्स्थानसाम्ये सवर्णसंज्ञेत्यभिमानः - तत्रौव, पृ. 245 (उद्योतः)
४४. तत्रौव, पृ. 245 (उद्योतः)
४५. तोलीति परसवर्णरहित-'तद्वानासा'मिति निर्देशाद् यावत्स्थानसाम्यमत्र विवक्षितमिति भावः - तत्रौव, पृ. 246 (उद्योतः)
४६. याकरणमहाभाष्यम्, - 1, पृ. 153

## परिशीलितग्रन्थावली


1. एम, एस, नरसिंहमाचार्यः, 1973, महाभाष्यप्रदीपव्याख्यानानि, प्रथमखण्डः, फ्रेञ्च इनस्टिटिउट अफ पण्डिचेरी (French Institute of Pandichery), पण्डिचेरी।

2. भट्टोजिदीक्षितः, 2004, वैयाकरणसिद्धान्तकौमुदी बालमनोरमा- तत्त्वबोधिनी-व्याख्योपेता (1-भागः), संशोधकौ- गिरिधरशर्मा परमेश्वरानन्दशर्मा च, मोतीलाल बनारसीदास, वाराणसी।

3. महर्षिः पतञ्जलिः, 2014, व्याकरणमहाभाष्यम्, प्रथमखण्डः, सम्पादकः - जोशी भार्गवशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।

4. महर्षिः पतञ्जलिः, 2010, व्याकरणमहाभाष्यं नवाह्निकम् (प्रदीपोद्योततत्त्वा-लोकोपेतम्), चौखम्बा प्रकाशनम्, वाराणसी।

5. महर्षिः पतञ्जलिः, 2013, व्याकरणमहाभाष्यं सप्रदीपोद्योतभावबोधिनीहिन्दी-

व्याख्योपेतम्, 1-5 आह्निकानि, सम्पादकः जयशङ्करलालत्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी।

6. महर्षिः पाणिनिः, 2007, पाणिनीयशिक्षा, सम्पादकः- शिवराज आचार्यः कौण्डन्न्यायनः, चौखम्बा सुरभारती प्रकाशन, वाराणसी।

७. महर्षिः पाणिनिः, अष्टाध्यायी, सम्पादकः - गोपालशास्त्री, चौखम्बा-संस्कृत-संस्थानम्, वाराणसी।

# पातञ्जलमहाभाष्ये वैदिकलौकिकपक्षयोः उपयोगित्त्वम्

**शैलेन्द्र प्रसाद उनियालः**
वेदविभागः
श्रीरघुनाथकीर्ति-परिसरः
देवप्रयागः, पौडी गढवाल, उत्तराखण्डः

व्याकरणं प्रत्ययाद्युपदेशेन पदस्वरूपं तदर्थ-निश्चयायोपयुज्यते। तथा च ऐन्द्रवायव ग्रहब्राह्मणे समाम्नायते-वाग्वै पराच्यव्याकुरुता-वदत्ते देवा इन्द्रमब्रुवन्निमां वाचं व्याकुर्विति। सोऽब्रवीद्वरं वृणै मह्यं चैवैषवायवे च सह गृह्याता इति तस्मादैन्द्रवायवः सह गृह्यते। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुह्यते। अग्निमीडे पुरोहितं-ऋण।ण।ण।ण, इत्यादि वाक् पूर्वस्मिन् काले पाराची समुद्रादि.ध्वनिवदेकात्मिका सती अव्याकृता प्रकृति प्रत्ययः पदं वाक्यमित्यादि विभागकारि ग्रन्थरहिता आसीत् तदानीं दैवैः प्रार्थित इन्द्र एकस्मिन्नेव पात्रे वायोः स्वस्य च सोमरसग्रहणरूपेण वरेण तुष्टः तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्यादि विभागं सर्वत्राकरोत् -

तस्मादियं वाक् इदानीमपि पाणिन्यादि- महर्षिभिर्व्याकृता सर्वैः पठ्यते। एतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्त्तिके दर्शितः - रक्षोहागमलघ्वसन्देहाः प्रयोजनम् एतानि रक्षादिप्रयोजनान्तराणि च महाभाष्ये भगवताऽशेषविद्विशेषतया व्याख्यातम्। रक्षार्थं वेदानामध्येयं व्याकरणम् लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यति वेदार्थं चाध्यवस्यत।

ऊहः - ऊहः खल्वपि न सर्वै लिङगैर्न सर्वाभिर्विभक्तिभिः वेदे मन्त्रा निगदिताः ते चावश्यं यज्ञगतेन यथायथं विपरिणमयितव्या तान्ना वैयाकरणः विपरिणमयितुं तस्मादध्ययेयं व्याकरणम्।

आगमः - आगमः खल्वपि ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च प्रधानं च षट्स्वङ्गेषु व्याकरणम् प्रधाने च कृतो यत्नः फलवान् भवति। लघ्वर्थं चाध्येयं व्याकरणम् वृहस्पतिरिन्द्राय दिव्यं वर्ष सहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम तस्माद् ऋषयोऽप्युपदेशस्यनान्तं यान्ति पृथक्त्वशः। लक्षणेन हि सिद्धानामन्तं यान्ति विश्चितः।।

**रक्षोहागम - वार्त्तिकम्-**

असन्देहार्थं चाध्येयं व्याकरणं स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत। किं स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति तां नावैकरणः स्वरतोऽध्यवस्यति। यदि समासान्तोदात्तत्वं तदा कर्मधारयः अथ पूर्वपद प्रकृतिस्वरत्वं ततो बहुब्रीहिः। तेऽसुराः हेलयो हेलय कुर्वन्तः पराबभूवु तस्मात् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छा ह वा यदपशब्दः।

म्लेच्छा मा भूमेत्यध्येयं व्याकरणम् दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।

दुष्टान् शब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्। लोके वेदे च द्वयोः पक्षयोः महाभाष्यस्यालोचनेन सिद्ध्यति यद् व्याकरणस्य अध्ययनेन पुष्टः जन एव वेदतो लोकतो वा सकलार्थानभिलषितानार्थान् प्राप्तुं शक्नोति।

भगवता यास्केनापि निर्ऋति पदे विचारयता प्रोक्तं यद् त एते वक्तुरभिप्रायवाशादर्थचतत्त्वमपि भजन्ते। यथाश्वरोह वैशिस्ययात्साधुन्साधुतराश्चार्थान्स्रवन्ति। महाभाष्ये पस्पशाह्निके कात्यायन प्रयुक्तः भ्राजश्लोको बोधयति यद् यो व्यवहारकाले शब्दानां साधुतयौचित्येन् प्रयुङक्ते स एव सम्यक् प्रयोगकर्त्ता अनन्तं प्राप्नोति यः शब्दार्थ सम्बन्धं वैयाकरणः जानाति जयति च। व्याकरणज्ञ एव सम्यक वेदान् परिपालयिष्यति लोकेऽपि यः अपशब्दान् प्रयुञ्जानः जनः निन्दायाः पात्रत्वं भजते सः अपशब्दैः दुष्यति इति। तस्या वाचः किं स्वरूपमित्या ऋग्वेदे चत्वारि श्रृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासोऽअस्य त्रिधावद्धो वृषभो रो रवीति महो देवो मत्तर्या आविवेश। चत्वारि श्रृङगाणि-चत्वारि पदजातानि नामाख्यातोपसर्ग-निपाताश्च। त्रयो अस्य पादाः -त्रयः कालाः भूतभविष्यद् वर्त्तमानाः। द्वेशीर्षे - द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्तहस्तासौ अस्य-सप्तविभक्तयः प्रसिद्धाः। त्रिधा बद्धः - त्रिषु स्थानेषु बद्ध उरसि कणे शिरसि वृषभो वर्षणात् वर्षति कामान् इति वृषभः। रोरविति शब्दं करोति कुत एतत् रौतिः शब्द कर्मा महादेवो मर्त्यां आविवेश महान देवः शब्दः मर्त्यां मनुष्यान् मरणधर्मान तान् आविवेश। तत्रौव ऋग्वेदे वर्णितं यत्तस्याः त्रीणि पदानि तत्रा नामाख्यातोपसर्गनिपाताश्च इत्यत्र चकार ग्रहणात् परापश्यन्तीमध्यमा खरीत्याख्यायाः समुच्चयं नागेशभट्टपादाः स्वीकुर्वन्ति यतोहि बैखर्याः एव कृतो नादः परश्रवणगोचरः भवति। अस्मिन्महाभाष्ये नाम करणस्य प्रकारो विज्ञायते यथाधुनिकाः केचिज् जनास्तथा पुत्रस्य नाम कुर्वन्ति चिन्टुपिन्टु भोलु भौलू इत्यादीनिः निरर्थकानि नामान्येव कुर्वन्ति तथा न कार्यमस्य विशिष्टो विधिर्भगवता भाष्यकारं प्रदर्शितः स लौकिकैः अवश्यमेव ग्राह्यः। यथा याज्ञिकाः पठन्ति दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात् घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपूरुषानूकमनरिप्रतिष्ठितं, तद्धि प्रतिष्ठिततमं भवति। आद्यक्षरं घोषप्रयत्नवान्, मध्येऽन्तःथानि स्युः अवृद्धं “वृद्धिर्यस्याचामादिस्तद्वृद्धम्” “त्यदादीनि

च" आ ऐ औ" रहितानि नामाक्षराणि "एङ्प्राचांदेशे" इति सूत्रैः वृद्धसंज्ञा "त्रिपुरुषसंस्मारकं पिता,पितामह, प्रपितामहानां स्मृतिदं नाम स्यात्। शत्रुस्मारकं नाम न भवेदिति, कत्यक्षरात्मकं नाम भवेदिति चेत्-द्वे अक्षरं चुरक्षरं वा नाम कुर्यात् कृतं कुर्यान्न तद्धितम्। तथा कन्यानां नाम विषमसंख्याक्षरेण कुर्वन्तीति सम्प्रदायः। अतो निर्विवादेन गदितुं शक्यते यत् पातञ्जल-महाभाष्ये लौकिक-वैदिकपक्षयोः उभयोः महदुपयोगित्वं सिद्ध्यति।

**सन्दर्भाः**

१. ऋग्वेदभाष्यभूमिका पृष्ठ-१२१ चौखम्बा पब्लिशर्स-२०००

२. तै.सं.7.4.7.3

३. पाणिनिशिक्षा ५२

४. निरुक्त दुर्ग भाष्य -२ध२

५. यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दै

६. ऋग - ४.५८.३

७. ऋग् - १.१६.४.४५

८. महाभाष्ये १.१ पस्पशाह्निके

९. अष्टा.१.१.७३

१०. पाणि.१.०१.७४

११. पा.१.०१.७५

# धाात्वर्थः-विचारः

**सुरेश पाण्डेयः**
सहायकाचार्यः, गंगानाथ झा परिसरः, इलाहाबाद

गुरवः ''फलं धात्वर्थो व्यापारः प्रत्ययार्थ'' इति स्वीकुर्वन्ति। तन्मते पच्-धातोरर्थस्य विक्लित्तेरनुकूलत्व-सम्बन्धो न तिप्प्रत्ययार्थव्यापारेऽन्वयः। अत्रैव प्रथमान्तपदबोध्यस्य संख्या-विशिष्टस्य देवदत्तस्य निष्ठसम्बन्धेनान्वयः। तथा च 'भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानी'[1]ति यास्कवचनानुरोधेन समवाय-सम्बन्धावच्छिन्नैकत्ववत्त्वावच्छिन्न-प्रकारतानिरूपितनिष्ठत्वसम्बन्धावच्छिन्नदेवदत्तत्वावच्छिन्नप्रकारतानिरूपिता या च निष्ठत्वसम्बन्धावच्छिन्नतण्डुलत्वावच्छिन्नप्रकारता-निरूपितनिरूपकत्वसम्बन्धावच्छिन्न कर्मतात्वावच्छिन्नप्रकारतानिरूपितानुकूलत्व-सम्बन्धावच्छिन्नविक्लित्तित्वाच्छिन्न प्रकारतानिरूपितव्यापारत्वावच्छिन्ना विशेष्यता तदाश्रयो बोधः। अर्थाकत्वविशिष्टदेवदत्तनिष्ठस्तण्डुलकर्मकविक्लित्त्यनुकूलो व्यापारः। वैयाकरणस्तु धातोर्विक्लित्त्यनुकूलव्यापारोऽर्थ इति स्वीकरोति। तन्मते देवदत्तस्य तिबर्थैकत्वविशिष्टकर्त्तरि अभेदसम्बन्धेनान्वयः तस्य धात्वर्थव्यापारे निष्ठत्वसम्बन्धेन, अत्रैव विक्लित्तिरूप-फलस्यानुकूलत्वसम्बन्धेनान्वयः तण्डुलस्य निष्ठत्वसम्बन्धेन कर्मतायां तस्या निरूपकत्वसम्बन्धेन विक्लित्तिरूपफलेऽन्वयः। तथा च अभेदसम्बन्धाावच्छिन्न-देवदत्तत्वावच्छिन्न-प्रकारतानिरूपितनिष्ठत्वसम्बन्धावच्छिन्नैकत्व- विशिष्टकर्तृत्वावच्छिन्न-प्रकारतानिरूपिता या च निष्ठत्वसम्बन्धाावच्छिन्नतण्डुलत्वावच्छिन्न प्रकारतानिरूपित-निरूपकत्व- सम्बन्धावच्छिन्नकर्मतात्वावच्छिन्नप्रकारता- निरूपितानुकूलत्वसम्बन्धाावच्छिन्न विक्लित्तित्वावच्छिन्नप्रकारतानिरूपितव्यापारत्वावच्छिन्ना विशेष्यता तदाश्रयो बोधः इति अयमपि यास्कवचनानुरोधेन व्यापारविशेष्यकबोधं स्वीकरोति। यद्यपि शाब्दबोधो उभयोर्न यास्कवचनविरोधः, तथापि तिबर्थस्य व्यापारत्वे कर्त्तरि कर्मणि च लकारो भवतीत्यर्थप्रतिपादकेन 'लः कर्मणि चे'[2]ति सूत्रेण सह विरोधः स्यात् मीमांसकस्य। न चात्र 'कर्तृपदस्य धर्मप्रधानत्वेन कर्त्तृत्वं व्यापारत्वं, तस्य व्यापाररूपत्वेन नानुशासनविरोधाो ममापीति वाच्यम्। 'नहि गोधा सर्पन्ती सर्पणादहिर्भवती'[3] ति प्रकृतिनियमेन धर्मिप्रधाानपरकस्य 'कर्त्तरि कृदि'[4]ति सूत्रघटकस्य चकारानुकृष्टस्य 'कर्त्तृ'पदस्यात्र धर्मपरकत्वेऽनुभवविरोध प्रमाभावात्। किं च 'तुष्यतु दुर्जन' न्यायेन तथा स्वीकारेऽपि 'पचति', 'पक्ष्यति', पक्वानि' इत्यादौ फूत्कारादिबोधाय, अनेकप्रत्ययानां शक्तिकल्पनाऽपेक्षया, एकस्य

धातोस्तथाकल्पने महालाघवात् न च यथा–अनेकप्रत्ययानां व्यापारे शक्तिकल्पनायां गौरवं तथाऽनेकधातूनामपि यस्तूभयोः समो दोषः परिहारोऽपि तादृशः। नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे। इति समानमेव गौरवम्। न च फूत्कारादीनां प्रत्ययार्थत्वे 'गच्छती'त्यादौ तद्बोधवारणाय प्रत्ययार्थफूत्कारत्वावच्छिन्नविषयकशाब्दबोधम्प्रति पच्समभिव्याहृतप्रत्ययजन्योपस्थितेः कारणत्वस्य विशेषरूपेण वक्तव्यत्वेनातिगौरवात्। धातुत्वावच्छिन्नस्य व्यापारे शक्तिकल्पनायामपि व्यभिचारवारणाय विशेषव्यापारबोधं प्रति तद्धातुसमभिव्याहारस्य तव मतेऽपि कारणत्वेन समानगौरवम्। फल-व्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्, फलसमानाधिकरणव्यापारवाचकत्वम-कर्मकत्वमित्याकारक सकर्मकाकर्मकव्यवहारस्येदानीमुच्छेदप्रसंगात्। न च प्रत्ययार्थ-व्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम्। प्रत्ययार्थव्यापारसमानाधिकरण-फलवाचकत्वमकर्मकत्वमिति स्वीकारेण न तद्व्यवहारस्योच्छेद इति वाच्यम्। इदानीं प्रत्ययेन कर्तुरनभिधानात् देवदतः पचतीत्यत्र देवदत्तशब्दात्तृतीयापत्तेः। न च यथा पच्यते तण्डुलो देवदत्तेनेत्यत्र प्रधानेन तेनाश्रयाक्षेपात् कर्मणोऽभिधानेन तण्डुलशब्दात् द्वितीयानुत्पत्तिः तथोक्तस्थले प्रधानेन व्यापारेणाश्रयाक्षेपात् कर्तुरभिधानेन तृतीयाया अप्राप्तिरिति वाच्यम्। जातिशक्तिवादिनो गुरोर्जात्याक्षिप्तव्यन्तेरिव कर्त्तृकर्मणोः प्रधानापत्त्या 'देवदत्तः पचती' त्यत्र 'विक्लित्त्यनुकूलव्यापाराश्रयो देवदत्तः' इत्याकारकप्रथमान्तार्थ-विशेष्यकयास्कवचनविरूद्धबोधस्य प्रसंगात्। अत्रास्मन्मते मीमांसकपूर्वपक्षे मूलग्रन्थे 'प्रधानेने' त्याकारकपदनिवेशोऽग्रिमग्रन्थेन सह समन्वयावश्यकः। इदानीं तन्मुद्रितपुस्तके पाठाकारस्तु 'व्यापारेणाश्रयाक्षेपात् कर्त्तुरभिधानम्' इति। एतावन्मात्रपाठस्वीकारे तु 'गुरूः शिष्याभ्यां पाचयती' इत्यत्र वैयाकरणप्रतिपादित- मीमांसकखण्डनस्य खण्डनं न स्यात्। तथाहि-वैयाकरणमते-'गुरूः शिष्याभ्यां पाचयतीत्यत्र पच्-धातोरर्थस्य विक्लित्त्यनुकूलव्यापारस्य णिजर्थव्यापारेऽनुकूलत्वसम्बन्धेनान्वयः। तथा च-इतरसम्बन्धाानवच्छिन्नगुरुत्वावच्छिन्नप्रकारतानिरूपितनिष्ठत्वसम्बन्धावच्छिन्नैकत्व-विशिष्टकर्तृत्वावच्छिन्न प्रकारतानिरूपिता या च निष्ठत्वसम्बन्धाा-वच्छिन्नौदनत्वावच्छिन्न-प्रकारतानिरूपितनिरूपकत्वसम्बन्धावच्छिन्नकर्मतात्वावच्छिन्न-प्रकारतानिरूपितानुकूलत्व सम्बन्धावच्छिन्नविक्लित्तित्वावच्छिन्न प्रकारतानिरूपितानुकूलत्वसम्बन्धावच्छिन्न प्रयोज्यशिष्यद्वयनिष्ठव्यापारत्वावच्छिन्नप्रकारतानिरूपित व्यापारत्वावच्छिन्न विशेष्यता, तदाश्रयो बोधः। अत्र प्रयोज्य (शिष्यद्वयस्य) कर्तुस्तिप्प्रत्ययेनानभिधानात् तृतीयायाः, प्रयोजकस्य (गुरोः) कर्तुस्तिपाभिधानात् प्रथमायाः सिद्धिः। मीमांसकमते पचेर्विक्लित्तिः, ततो णिचः (प्रयोजकनिष्ठ)व्यापारस्तिपः (प्रयोज्यशिष्यद्वयनिष्ठः) व्यापारोऽर्थः। लस्य प्रयोजकत्वसम्बन्धेन णिजर्थव्यापारे तस्य जन्यत्वसम्बन्धेन तिबर्थव्यापारेऽन्वयः। अर्थात्-विक्लित्तिप्रयोजकव्यापारजन्यव्यापारः 'पाचयती' त्यस्यार्थः।

वैयाकरणमते तु पाचयतेः -विक्लित्त्यनुकूलव्यापारानुकूलव्यापारोऽर्थः। तथा च

निष्ठत्वसम्बन्धावच्छिन्नतण्डुलत्वावच्छिन्नप्रकारतानिरूपितनिरूपकत्वसम्बन्धावच्छिन्न-कर्मतात्वावच्छिन्नप्रकारतानिरूपितप्रयोजकत्वसम्बन्धाावच्छिन्नविक्लित्तित्वावच्छिन्नप्रकारता निरूपितजन्यत्वसम्बन्धावच्छिन्न-(प्रयोजकगुरुनिष्ठ) व्यापारत्वावच्छिन्नप्रकारतानिरूपित (प्रयोज्यशिष्यद्वयनिष्ठ) व्यापारत्वावच्छिन्नविशेष्यताकबोधो मीमांसकस्य। अत्र प्रयोज्यशिष्यद्वयनिष्ठव्यापारेण शिष्यद्वयस्याक्षेपात् कर्त्रे-(शिष्ययो) रभिधानेन तृतीयाया अप्राप्त्या प्रथमाया आपत्तिः। प्रयोजकगुरुनिष्ठव्यापारस्य विशेषणत्वेन तिप्प्रत्ययेनानभिधाानात् प्रथमाया अप्राप्त्या तृतीयाया आपत्तिरिति वैयाकरणेन 'गुरुः शिष्याभ्यां पाचयती'त्यस्य स्थाने 'गुरुणा शिष्यौ पाचयत' इति दोषो दत्तः। व्यापारेण स्वाश्रायाक्षेपात् कर्तुरभिधानमित्यत्र प्रधानेनेति पदनिवेशे एव तद्दोषस्य सगतिः। अन्यथा - अप्रधाानेनापि गुरुनिष्ठव्यापारेण प्रयोजकस्य गुरोराक्षेपात् णिचा कर्त्तुः प्रयोजकगुरोभिधानेन प्रथमायाः सिद्धौ तृतीयापत्तिरूपदोषो वैयाकरणस्यासङ्.गतः स्यात्। न च प्रधानेनेत्यस्य स्थाने 'तिडर्थेनेति निवेशे न ग्रन्थस्यासगतिः। तथा निवेशे सति भावविहितघादीनां व्यापारावाचकत्वे संयोगरूफलस्य द्विष्ठत्वेन देवदत्तो गमनवानितिवत् ग्रामो गमनवानिति प्रयोगापत्तेः। (संयोगरूपफलाश्रयो ग्रामोऽपि) व्यापारवाचकत्वे तेनापि स्वाश्रयाक्षेपे कर्तुरभिधानापत्तिः। अर्थात् - देवदत्तस्य गतिरित्यत्र भावविहितत्तिना कर्त्तुः (देवदत्तस्य) अभिधानात् कृद्योगेऽनभिधानात्कर्त्तुः षष्ठीत्यर्थप्रतिपादकेन ''कर्तृकर्मणोः कृती''[५] ति सूत्रेण देवदत्तशब्दात्षष्ठ्यनापत्तिः। अतस्तिड.र्थेनेति पदस्य निवेशासम्भवात्। न च 'प्रत्ययार्थेने'ति निवेशे नोक्तदोषः। तथा निवेशे णिच्प्रत्ययार्थेन व्यापारेण प्रयोजकस्य गुरोराक्षेपात् प्रथमासिद्धौ 'गुरोरनभिधानेन तत्र त्र प्रथमाया अनापत्तेरि'ति ग्रन्थेन सह विरोधप्रसंगात्। अतः पूर्वापरग्रन्थसमालोचनया 'प्रधानेने'ति पदनिवेश सर्वमवदातमिति शम्।

**सन्दर्भाः**

१. निरुक्ते १.१
२. पा.३.४..६९
३. महाभाष्ये
४. पा.३.४.६७
५. पा.२.३.६५

# वैयाकरणानुमतः शब्दतत्त्वविमर्शः
# ( महाभाष्योक्तविशेषसन्दर्भे )

**बनमाली बिश्वालः**
राष्ट्रिय-संस्कृत-संस्थानम्
श्रीरघुनाथकीर्तिपरिसरः
देवप्रयागः, पौडी गढवाल, उत्तराखण्ड
आवासीय-सङ्केतः
५७, वसन्त विहार, झूसी, इलाहाबाद - २११०१९

**प्रस्तावना** - शीर्षकाङ्कितं 'शब्दतत्त्वम्' इत्येकं समस्तं पदम्। शब्दस्य शब्दानां वा तत्त्वम्' शब्द-तत्त्वम्। व्याकरणशास्त्रे शब्दतत्त्व-सिद्धान्तोऽयं कदा प्रारब्धः इत्यस्मिन् विषये विचारात् प्राक् प्रसङ्गवशादेतदपि विचाणीयमस्ति यत् कस्तावत् शब्दः, कश्च तस्य अर्थः, कश्च तयोः सम्बन्धः इति। ततः शब्दस्य किं स्वरूपम्, शब्दतत्त्वस्य च कथं विकासोऽभवदित्यादिविषयेऽपि विचारोऽपेक्ष्यते। शब्दतत्त्वस्य नैके पक्षाः सम्भवन्ति। तेषु तस्य व्यावहारिकपक्षः प्रमुखो वर्तते येन सामान्यो जनः साक्षात् सम्बद्धोऽस्ति।

अत्र एतत्-कथनस्य आवश्यकतैव नास्ति यत् शब्दतत्त्वस्य व्यावहारिकपक्षः एव तस्य अन्येभ्यः सर्वेभ्यः पक्षेभ्यः प्रबलः भवति। यतोहि शब्दमयमिदं व्यवहारजगत्। शब्दं विना ह्येतस्य जगतः स्थितिरपि कल्पयितुं न शक्यते। संसारे यदि शब्दाख्यं ज्योतिर्नाभविष्यत् तर्हि भुवनत्रयं नूनं तमसावृत्तम् अभविष्यदिति दण्डिना काव्यादर्शे मुक्तकण्ठं प्रतिपादितम् -

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**[१]

ज्ञानं नाम प्रकाशरूपम्, अज्ञानञ्च अन्धकार-रूपम् इति सार्वजनीनं तथ्यम्। संसारे एवं न किञ्चिज्ज्ञानं वर्तते यत् शब्दं विना व्यक्तं भवितुमर्हतीति वाक्यपदीये भर्तृहरिणा प्रतिपादितम् -

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।** [२]

वस्तुतः वाक्यपदीयस्य इयमेकैव कारिका  शब्दतत्त्वस्य व्यावहारिकपक्षं सुष्ठु रेखाङ्कयितुमर्हति।

एतस्य शब्दस्य अनुशासनं व्याकरणमेव करोति। अर्थात् शब्दरूपेण व्याकरणं सर्वविधस्यापि प्रयोगस्य अनुशासनं करोति। अत एव शब्दानुशासनमिति व्याकरणस्य नामान्तरमप्यस्ति। 'व्याक्रियन्ते प्रकृति-प्रत्यय-विभाग-पूर्वकं शब्दा अनेन' इति व्याकरणस्य व्युत्पत्तिरपि तथ्यमेतत्पुष्णाति। 'तदस्य तदस्मिन् स्यादि'ति पाणिनि-सूत्रस्य[३] व्याख्यान-प्रसङ्गे कैयटः प्रतिपादयति - "यत्रार्थे लोकाः शब्दान् प्रयुञ्जते तदर्थाभिधायिन एव शास्त्रेणानुविधीयन्ते प्रयोगमूलत्वाद् व्याकरणस्मृतेः।"[४] यतो हि साधु-शब्द-प्रयोगाय व्याकरण-नियमानां ज्ञानमत्यावश्यकम्। लोके यादृशाः प्रयोगाः भवन्ति वैयाकरणैः तादृशाः नियमाः विरच्यन्ते। वस्तुतः प्रयोगाणां साधुत्वायैव व्याकरण-नियमाः प्रणीयन्ते। अत एव प्रयोग-शरणं व्याकरणमिति काचिदुक्तिः प्रसिद्ध्यति। लोक-प्रयोगमनादृत्य व्याकरणं पदमेकं न गच्छति। एवं शब्द-व्याकरणयोः घनिष्ठः सम्बन्धः सर्वजनग्राह्यो वर्तते। "महान् हि शब्दस्य प्रयोगविषयः" इति महाभाष्ये[५] पतञ्जलिः अभिप्रैति। अनेन व्याकरणस्य व्यापकत्वमपि गतार्थं भवति।

शब्द-प्रयोग-विषये न केवलं प्रक्रियायाः महत्त्वम् किन्तु अर्थविचारोऽपि तथैव महत्त्वं भजते। यतो हि साधुशब्दो नाम केवलं सुन्दरं शरीरं वर्तते, तन्निष्ठोऽर्थश्च तस्य आत्मा। आत्मानुशीलनं दर्शनशास्त्रस्य विषयोऽस्ति। अत एव व्याकरणस्य दर्शनशास्त्रत्वमपि विद्वद्भिरङ्गीक्रियते। यथा दर्शनशास्त्रेषु आत्मनो ब्रह्मणो वा चर्चा प्राधान्येन विधीयते, तथैव व्याकरणे शब्दब्रह्मणो विचारोऽवश्यम्भावीत्यतः प्रायः व्याकरणग्रन्थेषु तद्विषये चर्चा समुपलभ्यते। वस्तुतः व्याकरणात्पदसिद्धिः भवति, पदसिद्धेश्च अर्थनिर्णयः, अर्थनिर्णयात् तत्त्वज्ञानं भवति तत्त्वज्ञानाच्च परं श्रेयोऽर्थात् मोक्षावाप्तिर्भवतीति वक्तुं शक्यते।

शब्दतत्त्वं तत्स्वरूपञ्च - विभिन्नैः शास्त्रकारैः शब्दस्य लक्षणं भिन्न-भिन्न-प्रकारेण कृतम्। न केवलं वैयाकरणाः किन्तु नैयायिकाः, मीमांसकाः तथा अन्ये च दार्शनिकाः स्व-स्व-शास्त्र-दृष्ट्या शब्द-स्वरूपं विवेचितवन्तः। तेषां विचारेषु क्वचित् साम्यं वर्तते क्वचिद्वैषम्यं च परिलक्ष्यते। अत्र यद्यपि मुख्यतया वैयाकरणाभिमतं शब्दतत्त्वं विशिष्य च महाभाष्याभिमतं शब्दतत्त्वं पुरस्कृत्यैव विचाराः प्रस्तोतव्याः सन्ति तथापि प्रसङ्गतः नैयायिक-मीमांसकानामपि केचन विचाराः  प्रस्तूयन्ते -

नैयायिक-मीमांसकाभिमतं शब्दतत्त्वम् - श्रोत्रग्राह्योऽर्थः शब्दः, अथवा श्रोत्रग्राह्यगुणविभाजकधर्मवत्त्वम् शब्दत्वमिति नैयायिकाभिमतं सामान्यं शब्द-लक्षणम्। नैयायिकेषु अनन्भट्टेन  "श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। सः द्विविधः ध्वन्यात्मकः वर्णात्मकश्च। ध्वन्यात्मकः भेर्यादौ, वर्णात्मकः संस्कृतभाषादिरूपः" ६

इति तर्कसंग्रहे प्रतिपादितमस्ति। विश्वनाथपपञ्चाननेन मुक्तावल्यां [७] तथा उदयनेन किरणावल्यां [८] च ध्वन्यात्मकः वर्णात्मकश्चेति द्विविधः शब्दः अङ्गीकृतः। द्विविधश्चासौ शब्दः कुत्रचिद् अवर्णलक्षण-वर्णलक्षणत्वेनापि प्रसिद्धः। तत्राा ध्वन्यात्मकः अवर्णलक्षणः अकारादिरूपः वर्णात्मकश्च वर्णलक्षणः। ध्वन्यात्मक-शब्दस्य परिभाषाप्रसङ्गे मुक्तावलीकारः वदति - तारतारतरत्वादिधर्मवानभिघातादिजन्योऽस्फुटः ध्वन्यात्मकः कण्ठसंयोगादिजन्यः स्फुटः कखादिरूपः वर्णात्मकश्च। किरणावलीकारस्य मते ध्वन्यात्मकः वर्णात्मकः शब्दश्च प्रत्येकं त्रिधा विभज्यते। तस्य विचारोऽत्र विस्तारभयान्न क्रियते। शब्दोत्पत्तिः द्विधा भवति वीचितरङ्गवत्, कदम्बपुष्पमञ्जरीवच्चेति मुक्तावलीकारोऽभिप्रैति। मीमांसकानां मते कण्ठताल्वाद्यभिघातानां श्रवणेन्द्रियविषयाणां वर्णानामेव शब्दत्वं वाचकत्वं चास्ति। प्रकरणपञ्जिकायां कः शब्दः इति जिज्ञासायामुच्यते - वर्णा इति। तत्राा च हेतुं दर्शयितुमुच्यते - "तेषामेव श्रोत्रग्राह्यत्वात्"।

वैयाकरणाभिमतं शब्दतत्त्वम् - वैयाकरणा अपि शब्दस्य द्वैविध्यमङ्गीकुर्वन्ति - स्फोटात्मकं ध्वन्यात्मकञ्च। स्फोटात्मकः शब्दो नित्यः। शब्दानुशासनं तु नादाभिव्यङ्ग्यस्य स्फोटरूपस्य शब्दस्य न सम्भवति। वस्तुतः ध्वनिरूपे शब्दे प्रक्रियादिकार्यं भवति। लोके ध्वनिमेवाभिलक्ष्य शब्दव्यवहाराद् ध्वनेः शब्दत्वमङ्गीकृतं वैयाकरणैः। परन्तु अनयोर्मध्ये स्फोटात्मको शब्दः मुख्यः। 'शब्दब्रह्म'-प्रसङ्गे वर्णात्मकः वर्णलक्षणात्मको वा शब्दः ग्राह्यः। यस्य लक्षणं शब्द्यते ज्ञाप्यते अभिधीयतेऽनेन अर्थः इति स्वीक्रियते। येनोच्चारितेनार्थः प्रतीयते स शब्दः इति शृङ्गारप्रकाशे वर्ण्यते। स च शब्दः स्फोटरूपोऽस्तीति 'स्फुटति अर्थः यस्मादि'ति स्फोटलक्षणाज्ज्ञायते। वर्णात्मकः शब्दः पुनः द्विविधः - सार्थकः निरर्थकश्च। सार्थकः प्रकृति-प्रत्यय-निपातरूपः, निरर्थकश्च कचटतपादिरूपः। सार्थकोऽपि शब्दः पुनः द्विविधः - वैदिकः लौकिकश्च। लौकिकः विधिनिषेधार्थवादभेदेन त्रिविधः। यथा - पाकं कुर्यात् (विधिः), इदमनिष्टं न कुर्यात् (निषेधः), अयं ब्राह्मणः स्वमहिम्ना सर्वं जगत्पवित्रं करोति (अर्थवादः)। वैदिकोऽपि पुनः विधिः मन्त्रः नामधेयम् निषेधः अर्थवादश्चेति पञ्चविधः। आप्तोक्तः एव लौकिकः शब्दः प्रमाणभूतः। वैदिकशब्दस्तु सर्वथा प्रमाणभूतः। शृङ्गारप्रकाशे शब्दस्य द्वादश उपभेदाः वर्णिताः सन्ति - प्रकृतिः, प्रत्ययः, उपस्कारः, उपपदम्, प्रातिपदिकम्, विभक्तिः, उपसर्जनम्, समासः, पदम्, वाक्यम्, प्रकरणम्, प्रबन्धश्चेति। अनेन वाक्य-प्रकरण-प्रबन्धादीनामपि शब्दत्वं ज्ञाप्यते।

उपर्युक्तविचारादनुमीयते यद् वैयाकरणेष्वपि शब्दस्वरूपविषये मतानैक्यं दृश्यते। वस्तुतः पाणिनेरारभ्य नागेशं यावद् वैयाकरणैः स्वस्वमतानुसारं शब्दो व्याख्यातः। पाणिनिः यद्यपि साक्षात् शब्दस्वरूपं न विवृणोति तथापि तस्य केभ्यश्चित् सूत्रेभ्योऽनुमीयते यत् तेन स्फोटात्मकः, ध्वन्यात्मकश्च उभयविधः शब्दः स्वीकृतः। "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[९] इति सूत्रे तेन स्फोटात्मकः शब्दः स्वीकृतः। यतो हि तत्सूत्रानुरोधेन

अर्थविषयकबोधजनकशब्दमुद्दिश्यैव प्रातिपदिकसंज्ञा विधीयते। स्फोटात्मकं शब्दं विना शब्दे अर्थविषयकबोधजनकत्वशक्तिर्नोत्पद्यते। इको यणचि इति सूत्रे च तेन ध्वन्यात्मकः शब्दोऽभिप्रेतः। यतो हि केवलं स्फोटात्मकशब्दस्वीकारे इकः स्थाने यणादेशः न स्यात्। अमरकोशेऽपि व्याकरणशास्त्रदिशा द्विविधः शब्दः स्वीकृतः। व्याकरणशास्त्रे यो वाचकः साधुः स शब्दः स्फोटात्मकः अपरस्तु ध्वन्यात्मकः इति तत्राा विवरणमुपलभ्यते।

सिद्धे शब्दार्थसम्बन्धे[१०] इति वार्तिकच्छलेन कात्यायनेनापि स्फोटात्मा शब्दः स्वीकृतः। वार्तिकप्रयुक्तः शब्दः स्फोटरूपमर्थं व्यनक्ति। अन्यथा शब्दस्य नित्यरूपं नैव सिद्ध्येत्। भाष्यकृता पतञ्जलिना शब्दस्वरूपविचारप्रसङ्गे स्फोटात्मकः ध्वन्यात्मकश्च शब्दः सङ्केतितः।' येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्दः'११ इति वदता तेन स्फोटात्मकशब्दस्य लक्षणं प्रतिपादितम्। 'प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते'१२ इति च वदता तेन ध्वन्यात्मकशब्दस्य लक्षणं विहितम्। तपरस्तत्कालस्येति सूत्रे अपि भाष्ये १३ स्फोटः शब्दः ध्वनिः शब्दगुणः इति प्रतिपादितं वर्तते। तत्राा निम्नलिखिता कारिकाऽपि उद्धृता वर्तते -

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**
**अल्पो महाँश्च केषाञ्चिदुभयं तत्स्वभावतः।।** [१४]

महाभाष्याभिमतं शब्दस्वरूपम् - यद्यपि महाभाष्यस्य भाषा सरला सुबोध्या चास्ति तथापि प्रायः जटिलाः विषयाः प्रतिपादिता भवन्ति। अनेक-शास्त्रीय-विषयाणां चर्चा तथा विचाराणां गभीरता चेत्यादि अस्य ग्रन्थस्य नैकाः विशेषताः सन्ति। प्रश्नोत्तरी-पद्धति-कारणात् अस्मिन् ग्रन्थे विहिता शास्त्रचर्चा जीवन्ती प्रतीयते। क्वचित् किञ्चिद् हास्यं, क्वचिद् व्यंग्यं, क्वचित् प्राचीन- दृष्टान्ताः, क्वचित् कल्पिताः कथाः च अस्य ग्रन्थस्य बहुरूपि-स्वरूपं प्रतिपादयन्ति।

महाभाष्यस्य मुख्यम् एकमेव क्षेत्रं च शब्दः। तथापि शब्द-स्वरूपम्, शब्दात् ज्ञातम् ज्ञायमानञ्च अर्थ-स्वरूपम्, अर्थ-प्रकारः, अर्थ-प्रकारानुसारी शब्द-प्रकारः, जनेषु शब्दविषयकावबोधादि-विषयाणां विवेचनमपि पतञ्जलिना सूक्ष्मतया विहितम्। स्वर्ग-मृत्यु-पुनर्जन्म -प्रत्यक्ष-अनुमान,-शब्द-प्रमाणादि -विषयाणां निर्देशः अत्र प्रसङ्गवशात् भवति।

महाभाष्यस्य प्रारम्भे एव पतञ्जलिना शब्द-स्वरूपं विवेचितम्। यस्याभिव्यक्तिमात्रेण अर्थज्ञानं भवति स शब्दः इति शब्दस्य तटस्थ-लक्षणम्। लोके अर्थज्ञानकारकध्वनेः संज्ञा शब्दः - इति स्वरूप-लक्षणं तु जनानामवबोधनार्थमुक्तम्। महाभाष्यकारेण अन्यत्र बहुषु स्थलेषु 'शब्दः नित्यः', ध्वनिश्च कार्यम् (अनित्यम्) इति प्रतिपादितम्। कार्यरूपाद् ध्वनेः अर्थ-बोधको नित्यः शब्दः अभिव्यक्तः भवति इति व्याकरणशास्त्रीय-सिद्धान्तः प्रस्थापितः।

अयं विषयः यद्यपि वार्तिककारेण 'सिद्धे शब्दार्थसंबन्धे' इत्येतस्मिन् प्रथम-वार्तिके एव संक्षिप्य प्रस्तुतः, तथाप्येष विषयो न सन्देह-विनिर्मुक्तः। अतः वार्तिककारस्य शब्दस्वरूपविषये कः निश्चितसिद्धान्त इति वक्तुं न शक्यते। 'सिद्ध'-शब्दस्य नित्यः, पूर्वनिष्पन्नः, पूर्वज्ञातः, इत्यादयः अर्थाः वाङ्मये प्रसिद्धाः सन्ति। अस्मिन् वार्तिके यस्य 'सिद्ध' - शब्दस्य प्रयोगः, तस्य अर्थः 'नित्यम्' इति पतञ्जलेः अभिप्रायः। शब्दार्थ-संबन्ध इत्यत्र समाहार-द्वन्द्वम्। अतः शब्दः, अर्थः तथा तयोः संबन्धश्चेति त्रयः पदार्थाः नित्यरूपाः इत्येव व्याकरण-सिद्धान्तत्वात् वार्तिककारेण एभिः शब्दैः प्रारम्भे एव स्पष्टतया प्रस्थापितमिति पतञ्जलिः अभिप्रैति। परन्तु यथा लोके शब्दः उत्पन्नः, शब्दः नष्टः, अर्थः उत्पन्नः, अर्थो नष्टः, संबन्ध उत्पन्नः, संबन्धो नष्ट इत्येवम्प्रकारकः प्रयोगो भवति तथा शब्दार्थ-विषयेऽपि 'उत्पन्नः' 'नष्टः' इत्येवम्विधः व्यवहारः सर्वत्र प्रसिद्धः। अतः शब्दार्थसंबन्स्य नित्यत्व-व्यवहारे प्रत्यक्षानुभवः विपरीतश्चेत्तस्य नित्यत्वं कथं सम्भवतीति शङ्का तु स्वतः सिद्धा।

पतञ्जलिना तथा अन्यैः आलोचकैश्च अस्या बाधायाः परिहार एवं प्रस्तुतः - शब्दः द्विविधो भवति - नित्यरूपः कार्यरूपश्चेति। कार्यरूपाद् ध्वनिरूपात् शब्दात् नित्य-शब्दः अभिव्यक्तो भवति। कार्यस्य अथवा अनित्यस्य ध्वनिरूपस्य शब्दस्य सन्दर्भे 'उत्पन्नः शब्दः', 'नष्टः शब्दः' इत्यादयो व्यवहाराः क्रियन्ते तथा अनुभवः अपि तथैव दृश्यते। परन्तु सः कार्य-शब्दः वास्तविकः शब्दो नास्ति। केवलं शब्द-प्रयोग-प्रमादादेव जनाः तथा व्यवहरन्ति। एवं ध्वनिसमूह-द्वारा व्यक्तः अर्थ-बोधकः शब्दो नित्यः सन्नपि वक्तुः श्रोतुश्च बुद्धौ सदैव अवस्थीयते। स एव शब्दः वैयाकरणैः स्फोट इति कथ्यते। एवमेव पतञ्जलिना शब्दस्य स्वरूप-विषये सिद्धान्तः प्रतिष्ठापितः।

अस्मिन् प्रसङ्गे शास्त्रकारेषु मतभेदो दृश्यते। केचन शास्त्रकाराः एवं मन्यन्ते यत् शब्दात् जातिरूपः अर्थः ज्ञायते। तन्मतानुसारेण तु अर्थस्य नित्यता प्रमाणिता भवति। किन्तु ये शास्त्रकाराः एवं मन्यन्ते यत् शब्दात् व्यक्ति-रूपमात्रम् अर्थः ज्ञायते, तन्मतानुसारेण शब्दः अनित्यः। केचन शास्त्रकाराः एवमभिप्रयन्ति यत् शब्दात् जातिः, आकृतिः तथा व्यक्तिः इत्येते त्रयः अर्थाः प्रतीयन्ते। आकृतेः अर्थस्तु अवयवसंस्थानम्। तत् तु अवश्यमेव नश्यति। तर्हि अर्थ नित्यः इति कथं वक्तुं शक्यते। महाभास्यकारः कथयति यत् शब्दात् ज्ञातः अर्थः यः कश्चिदपि भवतु नाम स तु नित्यो भवत्येव, एषा एवास्माकं गतिः। तानि वस्तूनि नित्यानि भवन्ति यानि विशिष्ट-स्थलेषु नष्टानि भवन्ति, किन्तु तस्य सत्ता न विनश्यते। तस्य वस्तुनः सत्ता अन्यत्र कुत्रचिद् भवत्येव। पतञ्जलिना अस्मिन् प्रसङ्गे नित्यत्वस्य सर्वमान्यं लक्षणं परिवर्तितम्। उत्तरवर्तिनि काले टीकाकारैः व्यवस्थानित्यता, व्यवहारनित्यता तथा प्रवाहनित्यता चेत्येते शब्दाः तदर्थे रूढ़ाः कृताः वर्तन्ते। एवं शब्दः नित्यः, अर्थः अपि प्रवाहनित्यः। एवमेव नित्यशब्द-

नित्य-अर्थयोः सम्बन्धः अपि नित्यो भवति। अत एव वार्तिककारेण 'सिद्धे शब्दार्थ-संबन्धे' इति प्रतिपादितम्। किन्तु महाभाष्यकारेण नित्यत्व-कल्पनायां कृतमेतत् परिवर्तनं न कस्यापि कृते मान्यं भवितुमर्हति। तस्य कारणमेतदेवास्ति यत् नित्यत्वस्य तद् द्वितीयं लक्षणं यदि मान्यं क्रियेत तर्हि मनुष्यः, वृक्षः, घटः, पटश्चेति सर्वेषां पदार्थानां नित्यत्वं मन्तव्यम्। एतेन नित्य- अनित्ययोः विभाजनमेव निरर्थकं स्यात्। महाभाष्यकारस्य मनस्यपि तत् शल्यमासीत्। अतस्तेन शब्दार्थ-संबन्धे त्रिपद-समाहारद्वन्द्वम् अस्वीकृतम्। आदौ अर्थ-संबन्धे षष्ठी तत्पुरुषं मत्वा ततः शब्द -अर्थसंबन्धयोः समाहारद्वन्द्वं मन्तव्यम्। अपरं च शब्द-अर्थयोः संबन्धः नित्यो भवतीति वार्तिकस्याशयः व्याकरण-शास्त्रस्य सिद्धान्तः अवगन्तव्यः।

अर्थो नित्यो वा अस्तु अनित्यो वा, शब्दो नित्यो वाऽस्तु अनित्यो वा परन्तु शब्द-अर्थयोः संबन्धः नित्य एव भवति, इत्येवं वार्तिकस्याशय इति भाष्यकारः प्रतिपादयति। परन्तु संबन्धः द्वयोः संबन्धिनोः आश्रितो भवति। अतः द्वौ संबन्धिनौ यदि नित्यौ स्तः तर्हि एव तयोः संबन्धः नित्यो भवेत्। द्वयोः संबन्धिनोः एकः अनित्यः भवति चेत्तर्हि संबन्धः अपि अनित्यः भवेत्। अस्य आक्षेपस्य निराकरणं टीकाकारैः नैक-प्रकारेषु प्रस्तुतम्। द्वयोः संबन्धिनोः एकः संबन्धी अपि नित्यः भवति तर्हि संबन्धः नित्यः भवति। संबन्धः योग्यतारूपः भवति। अन्ये वस्तुनि आगते सति सः अभिव्यक्तः भवति। एतदतिरिक्तं नैयायिकैः जाति-व्यक्त्योः, गुण-गुणिनोः, अवयवावयविनोः संबन्धः नित्यो मतः। यदि अनयोः संबन्धिनोः उभयोः अनित्यत्वेऽपि तयोः संबन्धस्य नित्यत्व-स्वीकारेऽपि न काऽपि बाधा प्रतीयते तर्हि नित्य शब्द-अनित्य-अर्थयोः संबन्धस्य नित्यत्व-स्वीकारे का बाधा भवेत्।

एतदपि सम्भवति यद् अस्मिन् वार्तिके प्रयुक्तस्य 'सिद्ध'-शब्दस्य प्रसङ्गे वार्तिककारस्य मनसि यः अर्थः वर्तते सः 'पूर्व- निष्पन्नः' अथवा 'पूर्व-ज्ञातः भवेत्। सूत्रकारेण तथा वार्तिककारेण च अयं शब्दः 'पूर्वनिष्पन्नः' अथवा 'पूर्वज्ञातः' इत्यस्मिन्नर्थे केषुचित् स्थानेषु स्वीकृतः। यदि एषा वास्तविकता ध्याने अवस्थाप्येत तर्हि व्याकरण-शास्त्रे शब्द-नित्यत्वस्य कल्पना प्रथमतः पतञ्जलिना स्थापिता। तमेव शास्त्रस्य प्राणमवगत्य स्थले स्थले तेन तस्याः कल्पनायाः समर्थनं कृत्वा एतत् स्थिरीकृतम्। उत्तरवर्तिनि काले टीकाकारैः तत् सुपुष्पितं सुफलितं कृतमिति कथनं युक्तं प्रतीयते।

**अर्थ-प्रकाराः** - शब्दात् ज्ञातव्यः अर्थः चतुःप्रकारकः। अतः शब्दः अपि चतुर्विधः - जाति, गुण, क्रिया तथा संज्ञा चेति। एतदुक्त्वा भाष्यकारः कथयति यत् जातिः, गुणः तथा क्रिया चेति त्रीणि प्रकाराणि भवन्ति तथा संज्ञा-शब्दाश्च एषु त्रिषु एव समाविष्टाः भवन्ति तथा प्रत्येकञ्च शब्दः व्युत्पन्नः भवतीति शाकटायनस्य एतं पक्षं पतञ्जलिः सिद्धान्तरूपेण स्वीकृतवान्। स शब्द एव आदौ जाति-गुण-क्रिया-रूपेषु

त्रिषु अर्थेषु कस्यचिदेकस्य बोधक- रूपेण प्रयुक्तो भवति। मूलरूपेणासौ स्थूलो न भवति। सः व्युत्पन्नयुक्त एवेति पतञ्जलेः अभिप्रायो भवितुमर्हति। एवं टीकाकाराणामपि कथनमस्ति। यत् किञ्चिद्भवतु नाम, जाति- गुण- क्रियाणामित्येते त्रिविधा अर्थाः सर्वमान्याः सन्ति। महाभाष्यकारेण एषां त्रयाणामर्थानां लक्षणं प्रस्तुतम्। एतानि लक्षणानि प्राथमिक-स्वरूपाणि तथा स्थूलानि सन्ति। क्रिया नित्यशः परोक्षानुमेया वर्तते - इत्येवं प्रकारेण पतञ्जलिः मनुते। एतत् कथनं तु मीमांसकानां मतवद् भवति। पतञ्जलिना गुणस्य या व्याख्या कृता, तदनुसारेण सः सांख्य-संमत- सत्त्वरजस्तमोरूपो नास्ति तथा न वा नैयायिक- संमत- शब्द- स्पर्शादि चतुर्विंशति- गुणेभ्यः एकः, अपितु पृथगेव। नैयायिकानां मतानुसारेण ज्ञानं नाम संयोग- गुणः, किन्तु वैयाकरणानां मतानुसारं सा क्रिया। लिङ्ग-विषयेपि व्याकरण-शास्त्रस्य व्यवहारः किञ्चिद् भिन्न एव। शब्दसिद्धिं लक्ष्यीकृत्य व्याकरण-शास्त्रेण स्वमार्गः स्वतन्त्ररूपेण निर्मितः इति भाष्यकारः अभिप्रैति। तात्पर्यमेतद् वर्तते यत् शब्दसिद्धिः एकमेव उद्देश्यमस्ति। अतः पतञ्जलिना जाति-गुण-क्रियादीनां या व्याख्या कृता सा न केवलम् अन्य-शास्त्रकाराणामभिप्रायादपितु व्यवहारेऽपि किञ्चित् शिथिला प्रतीयते।

वाक्यपदीयकारेण भर्तृहरिणा उपादान-अनुपादानत्वेनापि द्विविधः शब्दः स्वीकृतः। नदी-निर्झर-मणि-नूपुर-वीणा-मृदङ्गादीनां शब्दाः ये व्याकरण-प्रक्रियायां नोपादीयन्ते ते अनुपादानाः। तद्भिन्नानां व्याकरण-प्रक्रियायाम् उपादीयमानानाञ्चोपादानत्वम्। प्रकारान्तरेणापि शब्दो वाग्रूपाऽवाग्रूपत्वेन च द्विधा प्रोक्तः। वाग्रूपोऽपि मनुष्यवाक् मनुष्येतरवाक्त्वेन च द्विधा विभक्तः। मनुष्यवाचः साध्वसाधुत्वेन भेदद्वयं स्वीकृतम्। अनयोः मनुष्य-वाग्रूपः शब्द एव उपादानम्। एवं भर्तृहरिणाऽपि ध्वन्यात्मकः स्फोटात्मक इति द्विविधः शब्दः स्वीकृतः। ध्वनिस्तु द्विविधः - प्राकृतः, वैकृतश्च। प्राकृतः स्वाभाविकः यः स्फोटरूपस्य शब्दस्योपलब्धौ हेतुः भवति। येन ध्वनिना प्राथम्येन स्फोटोपलब्धिर्भवति सः प्राकृतध्वनिः। येन चोपलब्धोऽपि सः प्रचिरतरकालं यावदुपलभ्यते सः वैकृतो ध्वनिः। भर्तृहरेर्मतानुसारं ध्वनेः स्फोटात् पृथक् प्रतीतिर्न भवति। स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते १५। कैयटमतेऽपि शब्दो व्यङ्ग्य-व्यञ्जकत्वेन द्विविधः। ध्वनिः व्यञ्जकः स्फोटः व्यङ्ग्यः इति तपरस्तत्कालस्येति सूत्रे१६ प्रदीपः प्रतिपादयति। स्फोटो नादाभिव्यङ्ग्यो वाचक इति शब्दस्वरूपव्याख्यानप्रसङ्गे नागेशोऽपि स्फोटात्मकं ध्वन्यात्मकमिति द्विविधं शब्दस्वरूपमङ्गीकरोति। लोके व्यहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद्वर्णरूप ध्वनिसमूहः शब्दः। ध्वनिपदेनात्र वैखर्याः ग्रहणं स्फोटपदेनाभिव्यञ्जकत्वादिको मध्यमावस्थ आन्तरशब्द उच्यते यथा जपाकुसुमलौहित्याविभागेन स्फटिकादीनां ग्रहणं भवति।

वागपि शब्दरूपा भवति। सा च अनेकत्र ब्रह्मरूपेण वर्णिताऽस्ति। तद्यथा 'वाग् वै ब्रह्म' इति वचनम् ऐतरेयब्राह्मणे १७, शतपथब्राह्मणे १८, वृहदारण्यकोपनिषदि १९

चोपलभ्यते। 'वाग्ब्रह्म'[२०] इति गोपथब्राह्मणे 'वाग्घि ब्रह्म'[२१] इति ऐतरेयब्राह्मणे 'वागिति तद् ब्रह्म'[२२] इति जैमिनीयोपनिषदि च यानि वचनान्तराण्युपलभ्यन्ते तान्यपि वाचः ब्रह्मत्वं प्रतिपादयन्ति। 'ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते' इति छान्दोग्योपनिषद्वचनमपि [२३] वाचः ब्रह्मणा सादृश्यं साधयति। एवं वाचः ब्रह्मत्वे शब्दस्यापि ब्रह्मत्वमुपपन्नम्।

शब्दचर्चाप्रसङ्गे वाचः प्रसिद्धाश्चतस्रोऽवस्थाः परा-पश्यन्ती-मध्यमा-वैखरी-रूपाः विवेचनीयाः सन्ति। परा वाक् शब्दब्रह्मरूपा मूलाधारे अर्थात् कुण्डलिन्यां वर्तते, पश्यन्ती च नाभिप्रदेशे संस्थिता शोभते। मध्यमा हृदि तिष्ठति एवं च वैखरी कण्ठदेशे वर्तते इति परमलघुमञ्जुषायां स्फोटनिरूपणप्रसङ्गे नागेशः प्रतिपादयति। प्रसङ्गेऽस्मिन् सः अधोलिखितां कारिकामुद्धरति - "परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता। हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।।" आसु चतसृषु वाक्षु वैखरी व्यवहारयोग्या भवतीति ज्ञापयितुं सः वदति - "वैखर्या हि कृतो नादः परश्रवणगोचरः। मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।।" अर्थात् यद्यपि मध्यमावैखरीभ्यामुभाभ्यां नादः क्रियते तत्राा फले भेदः दृश्यते। अनयोर्मध्यमा-नादः स्फोटरूपशब्दस्य व्यञ्जकः, वैखरी-नादश्च सर्वेषां श्रावणप्रत्यक्षविषयो भवति। वस्तुतः परा, पश्यन्ती, मध्यमेति त्रय्यः वाचः सूक्ष्मरूपाः भवन्ति याः गुहायां निहिताः नेङ्गयन्ति, न चेष्टन्ते न वा निमिषन्ति। अतः वैखरीवाचमेव मनुष्या वदन्ति। एतत्प्रसङ्गे ऋग्वेदस्य कश्चन मन्त्रः महाभाष्यस्य पस्पशाह्निकेऽपि उद्धृतोऽस्ति -

**चत्वारि वाक् परिमिता पदानि तानि विदुर्मनिषिणः।**
**गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।**[२४]

परा वाक् वर्णादिविशेषरहिता चेतनमिश्रा सृष्ट्युपयोगिनी जगदुपादानभूता कुण्डलिनीरूपेण प्राणिनां मूलाधारे वर्तते। सा च कुण्डलिन्याः प्राणवायुसंयोगे व्यज्यते। वाक्षु केवलमियमेव निःष्पन्दा वर्तते। अन्याः पश्यन्त्यादयश्च सस्पन्दाः सन्ति, याः एतस्याः विवर्तरूपाः सन्ति। इयमेव परा वाक् 'सूक्ष्मस्फोट' इत्युच्यते। अत एव भर्तृहरिणा व्याकरणस्य त्रिविधवाग्विषयत्वं प्रतिपादितम् -

**वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।**
**अनेकतीर्थभेदस्य त्रय्यः वाचः परं विदुः।।**[२५]

वस्तुतः एतासां चतसृणां वाचां क्वचिद् व्याकृताव्याकृतेति भेदद्वयेन वर्गीकरणं दृश्यते। व्याकृतेति शब्देन पश्यन्त्यादित्रय्याः, अव्याकृतेति शब्देन च शक्ति-शक्तिमदादि-भेदशून्यायाः परावाचः व्यवहारः। एवमेव महाभारतेऽपि वाक्पूर्विकायाः सृष्टेः विषये चर्चा समुपलभ्यते -

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।**[२६]

उपर्युक्तायां कारिकायां वाक्-पदेन पश्यन्ती एव ग्राह्या। वस्तुतः तस्या एव ओंकारो, वेदः, शब्दब्रह्मेत्यादीनि नामान्तराणि प्रसिद्ध्यन्ति।

**शब्दार्थसम्बन्धः** - शब्दतत्त्वस्य परिधौ शब्दार्थः तथा शब्दार्थयोः सम्बन्धः अपि आयाति। पाणिनि-कात्यायन-पतञ्जलिभिः शब्दार्थसम्बन्धस्य नित्यत्वमङ्गीकृतमिति भर्तृहरिः वाक्यपदीये प्रतिपादयति -

**नित्याः शब्दार्थसम्बन्धाः समाम्नाताः महर्षिभिः।**
**सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः।।**[२७]

भर्तृहरेः मतानुसारम् उच्चरितः शब्दः तत्त्वत्रयम् अभिव्यनक्ति - शब्दः, वक्तुः इच्छा तथा तत्पदार्थश्च-

**ज्ञानं प्रयोक्तुर्बाह्योऽर्थः स्वरूपं च प्रतीयते।**
**शब्दैरुच्चरितैस्तेषां सम्बन्धः समवस्थितः।।**[२८]

तन्मतानुसारेण शब्दे अर्थः स्वभावतः एव निरूढो वर्तते न तु केनचिदारोपितः। अतः शब्दः नित्यः, तस्य अर्थः नित्यः तथा तयोः सम्बन्धः अपि नित्यः। उक्तं च भर्तृहरिणा वाक्यपदीये -

**स्वभावत एव निरूढो न तु पुरुषेण निवेशित इत्यर्थः।** [२९]

इन्द्रिय-विषययोः यः सम्बन्धः स एव सम्बन्धः शब्दार्थयोः। भर्तृहरिः वाक्यपदीये तादृशमभिमतमुपस्थापयितुं वदति -

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां योग्यता तथा।।** [३०]

भर्तृहरिः शब्दार्थयोः सम्बन्धं नित्यं मनुते। शब्दार्थयोः मध्ये अभिव्यज्य-अभिव्यञ्जकभावः सम्बन्धः वर्तते। तत्राा शब्दः अर्थस्य कारणरूपोऽस्ति। अतः तयोः मध्ये कार्यकारणसम्बन्धः अपि वर्तते इति भर्तृहरिः वाक्यपदीये प्रतिपादयति -
शब्दः कारणमर्थस्य स हि तेनोपजन्यते।

**तथा च बुद्धिविषयाद्यर्थाच्छब्दः प्रतीयते।।**[३१]

शब्दतत्त्वस्य ब्रह्मत्वम्- वस्तुतः शब्द-ब्रह्म नाम शब्दतत्त्वस्य नामान्तरमस्ति। शब्दस्य ब्रह्मत्वं तु शास्त्रेषु बहुत्र प्रतिपादितम्। यतो हि तस्मिन् ब्रह्मणः लक्षणानि प्रायः घटितानि भवन्ति। शब्दः सद्रूपः नित्यत्वात्। शब्दस्य नित्यत्वपक्षः महता समारम्भेण पतञ्जलिना महाभाष्ये विमृष्टः - अयं नित्यः शब्दः अस्त्येव कुटस्थेष्वविचालिषु

भावेषु वर्तते ३२। महाभाष्यदीपिकायामपि 'एतच्चार्थस्वरूपं स्फोट:, अयमेव शब्दात्मा नित्य:' इति उक्तं भर्तृहरिणा ३३। वाक्यपदीयेऽपि भर्तृहरि: वदति –

**सत्यं वस्तु तदाकारैरसत्यैरवधार्यते।**
**असत्योपाधिभि: शब्दै: सत्यमेवाभिधीयते।।** [३४]

वस्तुत: शब्द: चिद्रूप: वर्णित: ज्ञानमयत्वात्। वाक्यपदीयेऽपि भर्तृहरि: शब्दस्य ज्ञानमयत्वं प्रतिपादयतीति पूर्वमालेखस्यारम्भे सङ्केतितमस्माभि:। वस्तुत: ज्ञानस्य शब्दरूपेण परिणाम: भवति। शब्दश्च आनन्दरूप: स्वीकृत: आत्यन्तिकसुखदत्वात् स्वर्गफलदत्त्वाच्च। तथा चोक्तं पतञ्जलिना महाभाष्ये – एक: शब्द: सम्यग्ज्ञात: शास्त्रान्वित: सुप्रयुक्त: स्वर्गे लोके कामधूग् भवति इति [३५]। "य: शास्त्रपूर्वकं शब्दान् प्रयुङ्क्ते सोऽभ्युदयेन युज्यते, अथवा पुनरस्तु ज्ञाने एव धर्म:" [३६] इत्यादि महाभाष्यवचनान्यपि शब्दस्य ब्रह्मत्वपक्षं समर्थयन्ति। अस्मत्परम्परायां शब्दस्य जगत्कर्तृत्वं प्रसिद्धम्। 'वागेव विश्वा भुवनानि जज्ञे', 'वाग्घि प्रजापति:' ३७ 'वाग्वै प्रजापति:' ३८, 'प्रजापतिर्वै वाक्पति:' ३९ इति शतपथब्राह्मणस्य वाक्यानि तत्राा प्रमाणभूतानि सन्ति। अपरं च प्रजापतिर्हि वाक् इति तैत्तिरीयब्राह्मणस्य ४० वचनमपि तथ्यमेतत् समर्थयति। भर्तृहरिरपि वाक्यपदीये वदति यत् शब्दब्रह्म एव जगद्रूपेण विवर्तते –

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**
**ववर्ततेऽर्थभावेन प्रक्रियाजगत: यत:।।**[४१]

अतात्त्विकोऽन्यथाभाव: विवर्त:, सतात्त्विकोऽन्यथाभाव: परिणामश्चेति यद्यपि विवर्तपरिणामयोर्भेदो वरीवर्ति तथापि जगदेतद् शब्दब्रह्मण: विवर्तरूपं, परिणामरूपमिति चोभयथा भर्तृहरिणा प्रतिपादितमिति वक्तुं शक्यते। यतो हि 'शब्दस्य परिणामोऽयमित्याम्नायविदो विदु:' ४२ (वाण्प. १.१२०) इति वदता तेन समस्तमपि जगत् शब्दस्यैव परिणामभूतमित्यपि उद्घोषितम्। अयं च शब्द: नित्य: बोधस्वभावश्च शब्दार्थमय: आन्तर: स्फोट:। आन्तरस्फोटरूपस्य शब्दब्रह्मापरपर्यायस्य शब्दतत्त्वस्य संविज्ञाने मोक्षप्राप्ति: सम्भवति। एषोऽपि शब्द: वैदिकवाङ्मये वृषभ–महोदेवादिसंज्ञया वर्णित:–

**चत्त्वारि शृङ्गा त्रयोऽस्य पादा द्वे शीर्षे सप्तहस्तासोऽस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यम् आविवेश।। ४३।।**

ऋषभेण महता देवेन सायुज्यम् अर्थात् शब्दब्रह्माभेदेनात्मज्ञानं मुमुक्षुभि: अभिप्रेतम्। तथा चोक्तम् वाक्यपदीये

**अपि प्रयोक्तुरमात्मानं शब्दमन्तरवस्थितम्।**
**प्राहुर्महान्तं वृषभं येन सायुज्यमिष्यते।। (वाण्प.१.१३०)**

उपर्युक्तमन्त्रस्य 'द्वे शीर्षे' इति मन्त्रांशं व्याख्यायता पतञ्जलिना उक्तम् - "द्वौ शब्दात्मनौ, नित्यः कार्यश्च"। ४४ अयञ्च विचारः भगवद्गीतायामपि वर्णितोऽस्ति -

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।**
**क्षरः सर्वाणि भूतानि कुटस्थोऽक्षर उच्यते।।**

**उत्तमः पुरुषः त्वन्यः परमात्मेत्युदाहृतः।**
**यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वरः।।४५**

व्याकरणाध्ययन-प्रयोजन-वर्णन-प्रसङ्गे महाभाष्ये सः वदति यत् "महता देवेन नः साम्यं यथा स्यादित्यध्येयं व्याकरणम्।"[४६] अक्षरसमाम्नाय-प्रसङ्गेऽपि महाभाष्ये पतञ्जलिः वदति- "सोऽयम् अक्षरसमाम्नायः वाक्समाम्नायः, पुष्पितः फलितश्चन्द्रतारकावत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः, सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति मातापितरौ चास्य स्वर्गे लोके महीयते"[४७]। शतपथब्राह्मणेऽपि[४८] 'आम्नाये संहृतभोग्यभोक्तृशक्तेः वागात्मनो बहुधा करणत्वम् आम्नातम्' इति वचनमुपलभ्यते यत्र 'वागात्मन्' इति पदेन शब्दब्रह्म वर्णितं वर्तते। 'ओमित्येकाक्षरं ब्रह्म' इत्यत्र प्रणवः शब्द-ब्रह्मरूपो वर्तते। सूतसंहितायां प्रणवः परापरभेदेन द्विविधः कल्पितः वर्तते - परः ब्रह्मात्मकः, अपरश्च शब्दात्मकः -

**परं परतरं ब्रह्म ज्ञानानन्दादिलक्षणम्।**
**कर्षेण नवं यस्मात् परं ब्रह्म स्वभावतः।।**

**अपरः प्रणवः साक्षात् शब्दरूपः सुनिश्चितः।**
**प्रकर्षेण नवत्स्य हेतुत्वात् प्रणवः स्मृतः।।**

इयं सृष्टिः शब्द-ब्रह्मपूर्विका वर्तते इति मनु-संहितायां प्रमाणमुपलभ्यते। वेदशब्देभ्यः जगतः सृष्टत्वात् शब्दस्य ब्रह्मत्वमिति तत्राा प्रतिपादितमस्ति -

"वेदशब्देभ्यः एवादौ पृथक् संस्थाश्च निर्ममे।ण्ण एकाक्षरं परं ब्रह्म प्राणायामः परं तपः, अक्षरं त्वक्षरं ज्ञेयं ब्रह्म चैव प्रजापतिः।"[४९] इत्यत्र अक्षरशब्देन ओंकारः गृह्यते। एषोऽक्षरशब्दः शब्दतत्त्वेन स्फोटात्मना स्फोटनाम्ना वा व्याकरणशास्त्रे सिद्धिपथमागतः। भर्तृहरिमते परा वागेव ब्रह्मपदवाच्या भवति। एकमपि तत् शक्तिव्यपाश्रयात् भिन्नं भिन्नं भवति इति वाक्यपदीये प्रमाणमुपलभ्यते - 'एकमेव यदाम्नातं भिन्नं शक्तिव्यपाश्रयात्' इति। एवमेव तथेदममृतं ब्रह्म निर्विकारमविद्यया। कलुषत्वमिवापन्नं भेदरूपं विवर्तते।। [५०] इत्यपि अपरत्रोच्यते।

शब्दतत्त्वस्य ब्रह्मत्वाङ्गीकारे प्रयोजनम्- सर्वेषां शास्त्राणां लक्ष्यं भवति पुरुषार्थ-चतुष्टयसम्प्राप्तिः। धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु मोक्षस्य प्राधान्यं सर्वत्र विशिष्य भारतीयदर्शननेषु स्वीकृतम्। षट्सु वेदाङ्गेषु प्रधानं व्याकरणमित्यतस्तस्य

मोक्षसाधकत्वमपि सप्रमाणं प्रतिपादितं बहुत्र। वाक्यपदीये "इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः[५१] इति वदता भर्तृहरिणा मोक्षप्राप्तिप्रसङ्गे व्याकरणस्य भूमिका रेखाङ्किता। एवं शास्त्रेषु यद्यपि जन्माभावरूपं, आत्यन्तिकसुखसाधकम् इत्येतादृशं मोक्षस्य बहुविधं लक्षणम् उपलभ्यते तथापि परब्रह्मणि परमात्मनि विलयमेव मोक्षस्वरूपमिति निर्विवादतया स्वीक्रियते। शब्दस्य ब्रह्मत्व-स्वीकारे एतदेव मुख्यं प्रयोजनम्। शब्द-ब्रह्मणि निष्णातः वैयाकरणः परब्रह्माधिगमात् मोक्षाय अधिकारी भवति इति वचनमुपलभ्यते-

**द्वे ब्रह्मणी वेदितव्ये शब्द-ब्रह्म परं च यत्।**
**शब्द-ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।**[५२]

**शब्दतत्त्वसिद्धान्तस्योत्पत्तिः क्रमविकासश्च** - शब्दतत्त्व-सिद्धान्तः कियान् प्राचीनः इति विचारे सति सः सिद्धान्तः वैदिककालाद उद्भूतः इति ज्ञायते। यतो हि वैदिक-साहित्ये अनेकत्र तस्य सूक्ष्मसङ्केतः प्राप्यते। वस्तुतः ऋक्संहितायाम् "चत्वारि शृङ्गा"[५३] इत्यादि मन्त्रमाध्यमेन तस्य बीजवपनं जातम्। यजुर्वेदेऽपि 'इदं शब्दब्रह्म उत्तमं ज्योतिः' इति वचनमुपलभ्यते। एतदेव मतमपरत्र पल्लवितं दृश्यते। तद्यथा- उत्तरो देवो नादः दिशः सूर्यः रविः रवो वा। शब्दब्रह्मैव उत्तमं ज्योतिरित्ययं वैदिकक्रमः।[५४]

स्मृतिकारेषु मनुस्मृतिकारः मनुः शब्दब्रह्मणः पोषको दृश्यते। पुराणकाले महाभारते[५५], भागवते[५६], भगवद्गीतायां[५७], बृहत्-नारदपुराणे[५८] च सृष्टौ शब्दब्रह्मणः भूमिका सङ्केतिताऽस्ति। अक्षररूपस्य शब्दरूपस्य वा वेदस्य ब्रह्मत्वस्वीकारे नारायणत्वाङ्गीकारे च प्रकारान्तरेण शब्दब्रह्मणः समर्थनं जायते। यतो हि 'सर्वा वाचो वेदमनुप्रविष्टाः नावेदविन्मनुते ब्रह्म किञ्चित्' इत्याद्युक्तिभिः प्रमाणितं भवति यत् यः वेदं न जानाति सः ब्रह्म ज्ञातुं न प्रभवति। शब्दब्रह्मणोऽवगमनं न तथा सुकरं वर्तते इत्यतः तत् समुद्रवत् अनन्तपारं, गम्भीरं, दुर्विग्राह्यं च वर्णितं वर्तते-

**वेदा ब्रह्मात्मविषयास्त्रिकाण्डविषया इमे।**
**परोक्षवादा ऋषयः परोक्षं मम च प्रियम्।**
**शब्दब्रह्म सुदुर्बोधं प्राणेन्द्रियमनोमयम्।**
**अनन्तपारं गम्भीरं दुर्विग्राह्यं समुद्रवत्।।**[५९]

बृहत्-नारदपुराणे, श्रीमद्भागवते च वेदः साक्षात् नारायणः इति प्रतिपादितो वर्तते। तत्रा च क्रमशः "वेदो नारायणः साक्षात्[६०], वेदो नारायणः साक्षात् स्वयम्भुरिति शुश्रुमः"[६१] इति वचने प्रसिद्ध्यतः। श्रीमद्भगवद्गीतायामपि तादृशेव मतं कयाचिद् भिन्नया शैल्या प्रतिपादितमस्ति। कर्मण उत्पत्तिः ब्रह्मणो भवति ब्रह्म च अक्षरसमुद्भूतं वर्तते। वेदस्य च अक्षररूपत्वं प्रसिद्ध्यति। अनेनापि वेदस्य नारायणसम्बद्धत्वं सूच्यते। तथा चोक्तम् - "कर्मब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्"[६२] इति।

वैयाकरणेषु पतञ्जलिः शब्दब्रह्मविषये स्पष्टमुल्लिखति। सोऽपि प्रसङ्गेऽस्मिन् साङ्केतिकं वैदिकमभिमतं पल्लवयति। ऋग्वेदादुद्धृतस्य 'चत्वारि शृङ्गा' इत्यादि-मन्त्रस्य व्याख्यावसरे महाभाष्यस्य टीकाकारैः उक्तम् - महान् = परब्रह्मस्वरूपः, देवोऽन्तर्यामिरूपः, साम्यं सायुज्यमिति। अनन्तरं भर्तृहरिः एतदेवाभिमतं विस्तारितवान्। वाक्यपदीयस्य प्रथमे श्लोके सः शब्दब्रह्मणः अर्थरूपेण विवर्तनं दर्शयति। तस्य मतानुसारम् अनादि-निधनं सर्वग्राह्यग्राहकाकारवर्जितं तत् शब्दब्रह्म मायासहितं सत् नामरूपात्मकमिदमखिलं जगत् बुद्धौ आकलय्य स्वकालाख्यया शक्त्या तन्मात्रपदवाच्यानि आकाशादीनि उत्पादयति। वाक्यपदीये नैकेषु प्रसङ्गेषु शब्दब्रह्मविषये उल्लेखः प्राप्यते -

**तस्माद् यः शब्दसंस्कारः सा सिद्धिः परमात्मनः।**
**तस्य प्रवृत्तिस्तत्त्वज्ञस्तद्ब्रह्मामृतमश्नुते।।**[६३]

**ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।**
**विवृत्तं शब्दमात्राभ्यः तास्वेव प्रविलीयते।।**[६४]

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**
**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः।।**[६५]

अनन्तरं नागेशादिभिः लघुमञ्जुषादिग्रन्थेषु शब्दब्रह्मणः महत्त्वादिविषये चर्चां कृतवन्तः। मञ्जूषायां नागेशः शक्त्याश्रयप्रकरणे शब्दब्रह्मणः स्वरूपं विवृणोति। प्रलयकाले माया परमात्मनि लीयते। परन्तु तस्याः आत्यन्तिको नाशो न भवति। तस्यामवस्थायां सर्वं सुप्तवत् तिष्ठति। ततः यथाकालं मायापुरुषयोः उत्पत्त्यनन्तरं बिन्दुरूपमव्यक्तं त्रिगुणं शक्तिमत्त्वं च जायते यस्य अचिदंशः बीजम्, चिदचिन्मिश्रोऽशः नादः, चिदंशश्च बिन्दुरस्ति। तस्माद् बिन्दोः अव्यक्तात्मा वर्णादिविशेषरहितः नादमात्रं रवः समुत्पन्नः यः रवः शब्दब्रह्मेति संज्ञया निगद्यते। एतादृशं मतं प्रपञ्चसारतन्त्रे[६६] तथा शारदातिलके[६७] चोपलभ्यते। लघुमञ्जूषायां "क्रियाशक्तिसाधनायाः शब्द-शब्दार्थकारणम्। प्रकृतेर्विन्दुरूपि. याः शब्दब्रह्माभवत् परा।।" इति वदता नागेशेनापि मतमेतत् समर्थितम्।

**उपसंहारः** - उपर्युक्तविचाराधारेण एतदुपसंहर्तुं शक्यते यत् शब्द-तत्त्वविचारप्रसङ्गे पाणिनि-प्रभृतयः प्राचीनवैयाकरणा तथा जागरुकाः न दृश्यन्ते यथा तत्परवर्तिनः आचार्याः पतञ्जलिप्रभृतयः। वस्तुतः महर्षिपतञ्जलेः महाभाष्यादारभ्य एतद्विषयकं विशद-चिन्तनं समुपलभ्यते। ततः भर्तृहरि-नागेशादिभिश्च तच्चिन्तनमग्रेसारितम्। शब्दतत्त्वादिविषये तु पतञ्जलिरपि तथा मुखरो न दृश्यते यथा भर्तृहरिः। एतद्विषये भर्तृहरि-नागेशयोर्मध्ये कश्चन मतभेदोऽस्ति। भर्तृहरि-मतानुसारं नित्यं शब्दब्रह्म शब्दभावेन विवृतं सदर्थभावेन विवर्तते। सः शब्दब्रह्मणः सर्वजगदुपादानत्वं कुटस्थत्वं नित्यत्वं च अङ्गीकरोति। किन्तु नागेशः शब्दब्रह्मणः नित्यत्वं यावत्सृष्टिस्थित्या व्यवहारनित्यतया च स्वीकरोति। शङ्करः यद्यपि शब्दात् सृष्टिः भवतीति मनुते तथापि सः भर्तृहरिवत् शब्दस्योपादानत्वं

न अङ्गीकरोति। सम्पूर्णे व्याकरणशास्त्रे 'शब्द' इति शब्दः प्रायेण वर्ण-प्रकृति-प्रत्यय-धातु-पद-वाक्य-महावाक्य-परा-पश्यन्ती-मध्यमा-वैखरी-ध्वनि-शब्दप्रमाणादिष्वर्थेषु प्रयुक्तो वर्तते। 'शब्दब्रह्म' इत्यस्य कृते नादब्रह्म-स्फोट-शब्दतत्त्व-उत्तमज्योतिरादिशब्दानां प्रयोगः द्रष्टुं शक्यते। नादः इति यद्यपि शब्दस्य नामान्तरं वर्तते तथापि तेन ध्वन्यात्मकशब्दस्य बोधः सम्भवति। वस्तुतः वैयाकरणानां मते लौकिक-पारमार्थिकभेदेन शब्दस्य द्वैविध्यमित्यपि वक्तुं शक्यते। तत्राा ध्वन्यात्मकशब्दस्य लौकिकत्वम्, स्फोटात्मकशब्दस्य च पारमार्थिकत्वमभिप्रेतम्। वैयाकरणाः शब्दस्य कार्यत्वं नित्यत्वञ्च अङ्गीकुर्वन्ति। तैः ध्वन्यात्मकशब्दस्य कार्यत्वम्, स्फोटात्मकशब्दस्य च नित्यत्वमङ्गीकृतम्। नैयायिकास्तु ध्वन्यात्मकमेव शब्दमङ्गीकुर्वन्ति। अतस्ते शब्दस्य नित्यत्वं नाङ्गीकुर्वन्ति। वृत्तिमेव मुख्यं ज्ञानं मन्वानास्ते शब्दस्य न स्वप्रकाशकत्वं न वा नित्यत्वं मन्वते। पक्षान्तरे मीमांसकास्तु वैयाकरणानां मार्गमनुसरन्तः शब्दस्य नित्यत्वं स्वीकुर्वन्ति।

**सन्दर्भाः**


१. काव्यादर्शः १.४

२. वाक्यपदीयम् १.१२३

३. पा. सू. ५.१.१६

४. प्रदीपः (पा.सू. ५.१.१६)

५. महाभाष्ये पस्पशाह्निकम्

६. तर्कसंग्रहः (दीपिकासहितः) श्री रामकृष्णमठ, मिलापोर, चेन्नइ, १९९४, पृ.६७

७. न्यायसिद्धान्तमुक्तावली, कारिका १६४-६८

८. किरणावली, मुक्तावली, १६४-१६८

९. पा.सू. १.२.४५

१०. सिद्धे शब्दार्थसम्बन्धे (वार्तिकम्) महाभाष्यम् १.१.१ (पस्पशाह्निकम्)

११. तत्रैव

१२. तत्रैव

१३. तत्रैव पा. १.१.७०

१४. तत्रैव

१५. वाक्यपदीयम् १.८१

१६. प्रदीपः, पा. सू. १.१.७०

१७. ऐतरयब्राह्मणः ६.३

१८. शतपथब्राह्मणः २.१.४.१०, १४.४.१.२३, १४.६.१०.५

१९. वृहदारण्यकोपनिषद् १.३.२१, ४.१.२

२०. गोपथब्राह्मण: (पूर्वभाग:) २.१०
२१. ऐतरेहब्राह्मण: २.१५.४.२१
२२. जैमिनीय उपनिषद् २.९.६
२३. छान्दोग्योपनिषद् - ६.३.२
२४. ऋग्वेद: - १.१६४.४५ (महाभाष्यस्य पस्पशाह्निकेऽपि उद्धृतम्)
२५. वाक्यपदीयम् - १.१४४
२६. महाभारतटीका, शान्तिपर्व - २३२.२४
२७. वाक्यपदीयम् १.२३
२८. वाक्यपदीयम् ३.१
२९. वाक्यपदीय-टीका .३.१
३०. वाक्यपदीयम् ३.३.२९
३१. वाक्यपदीयम् ३.३.३२
३२. महाभाष्यम् पा. ८.१.४
३३. महाभाष्यदीपिका ३-४
३४. वाक्यपदीयम् - ३.२.२
३५. महाभाष्यम्, पा. ६.१.८४
३६. तत्रैव १.१.१ (पस्पशाह्निकम्)
३७. शतपथब्राह्मण: १.३.६.२७,
३८. तत्रैव ५.१.५.६, १३.४.१.१५
३९. तत्रैव ३.१.३.२२,
४०. तैत्तिरीयब्राह्मण: १.३.४.५
४१. वाक्यपदीयम् १.१
४२. तत्रैव १.१२०
४३. ऋक्संहिता - ४.५८.३
४४. महाभाष्यम् १.१.१ (पस्पशाह्निकम्)
४५. श्रीमद्भगवद्गीता १५.१६-१७
४६. महाभाष्यम् १.१.१ (पस्पशाह्निकम्)
४७. तत्रैव १.१.२ (प्रत्याहाराह्निकम्)
४८. शतपथब्राह्मण: - ६.५.३-४
४९. मनु २.८३-८४
५०. वाक्यपदीयम् १४.१-२

५१. तत्रैव १.१६
५२. मैत्रेयोपनिषद् ६.२२
५३. ऋक्संहिता- ४.५८.३
५४. यजुर्वेदः - २०.२१
५५. महाभारतम्, शान्तिपर्व २३२.३०
५६. श्रीमद्भागवतम् - १२.९.३६
५७. भगवद्गीता - ६.४४
५८. बृहत्-नारदपुराणम् - ४.१७
५९. श्रीमद्भागवतम् ११.२१.३५-३६
६०. बृहत् नारदपुराणम् ४.१७
६१. श्रीमद्भागवतम् ६.१.४०
६२. श्रीमद्भगवद्गीता - ३.१५
६३. वाक्यपदीयम् १.१२३
६४. तत्रैव १४.३-४
६५. तत्रैव १.११
६६. प्रपञ्चसारतन्त्रे १.४१
६७. शारदातिलकम् १.११-१२,
चैतन्यं सर्वभूतानां शब्दब्रह्मेति मे मतम्। तत्रैव १.२

व्याकरणविभागः, राष्ट्रियसंस्कृतसंस्थानम्
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

